# पाणिनीय-व्याकरणे स्त्रीप्रत्ययानामध्ययनम्



डॉ शिवकान्त झा

1. प्रस्तुत ग्रन्थ में समस्त पाणिनीय व्याकरण में "स्त्रियाम्" इस अधिकार सूत्र में पठित स्त्रीप्रत्यय विधायक सूत्रों, वार्तिकों एवं उनके निषेधक सूत्रों तथा वार्तिकों का अध्ययन किया गया है।

2. "मुरारेस्तृतीयः पन्थाः" इस सूक्ति का अनुसरण करते हुए एक नवीन पद्धति का अनुसरण इस ग्रन्थ में किया गया है। इस ग्रन्थ में लेखक ने न सूत्रक्रम को अपनाया है न ही लक्ष्यक्रम को। अपितु अक्षरक्रम का अनुसरण किया गया है।

3. पाणिनि ने अष्टाध्यायी के "स्त्रियाम्" इस अधिकार सूत्र से दस स्त्री प्रत्ययों का विधान किया है — ऊङ्–ङीन्–ङीप्–ङीष्–चाप्–टाप्–डाप्–ति–ष्फ एवं ष्यङ्। इन प्रत्ययों में यद्यपि अनुबन्ध–विनिर्मुक्त आकाररूप, ईकाररूप, ऊकाररूप, तिरूप ष्फरूप एवं ष्यङ्रूप मुख्य छः प्रकार के ही हैं। इनका अक्षरक्रम से विलक्षण अध्ययन कर इस ग्रन्थ में प्रस्तुत किया गया है।

4. इस ग्रन्थ में लेखक ने लिङ्ग का स्वरूप उनके भेदों, प्रत्यय का स्वरूप उनके भेदों एवं स्त्रीप्रत्यय द्योतक हैं अथवा वाचक इन सभी विषयों का विस्तृत अध्ययन प्रस्तुत किया है।

5. यद्यपि स्त्रीप्रत्ययों का ज्ञान अन्य व्याकरण के आकर ग्रन्थों से भी हो सकता है, किन्तु वह अधिक समय साध्य है। अतः न्यूनसमय में व्याकरण जिज्ञासुओं एवं परीक्षापिशाचीग्रस्त छात्रों को स्त्रीप्रत्ययों का ज्ञान सुलभता से हो जाय एतदर्थ भूरिश्रम करके इस ग्रन्थ को लिखा गया है।

# पाणिनीयव्याकरणे

# स्त्रीप्रत्ययानामध्ययनम्

हंसा प्रकाशन
जयपुर

# पाणिनीय व्याकरणे स्त्रीप्रत्ययानामध्ययनम्

डॉ० शिवकान्त झा

ISBN : 81-86120-04-1
प्रथम संस्करण : 1994



मूल्य : 150/- (एक सौ पचास रुपये मात्र)

प्रकाशक :
हंसा प्रकाशन,
316 खूंटेटों का रास्ता,
किशनपोल बाजार,
जयपुर-302001 (राज.)

मुद्रक :
अंकित प्रिन्टर्स
3832 विष्णु मार्ग,
गणगौरी बाजार,
जयपुर-302001

# मंगलाचरणम्

केषाञ्चित् पुरजितपदाम्बुजरजो राज्येव राज्यप्रदा

केषाञ्चित् कमलापते श्चरणयोश्चिन्तैव चिन्तामणिः ।

अस्माकन्तु कपालिकेलिकलिका कल्याणसम्वर्द्धिनी

कामं कामगवीनवीन जलद श्यामाभिरामागतिः ।।1।।

महोदारापारा स्फुरदुरगहाराहिवलया

तडिल्लेखा लोलोलसितरसना कृत्तिवसना ।

महामेघश्यामाशरद ऋतु धामाननरूचा

रणत्काञ्चीदामा हरतु हरवामा परिभवम् ।।2।।

ललाटे निःशङ्कं ज्वलति विधिरेखाहि कठिना

तथापित्वां मातः शरणमुपजातः पुनरहम् ।

लभन्ते त्वत्सेवा जनित सुखमेवावनिगता

क्ववावैधी सृष्टिः पततियदि दृष्टिस्तव शिवे ।।3।।

पिता ते शैलेन्द्रो गणपति कुमारौ च तनयौ

कृपानाथो नाथः शतमखनुखास्तेरिजनाः ।

न दृष्टा सामग्रीस्तव कृपणतायाः स्तदिह किम्

क्वलब्धा कारुण्याञ्चित्नयनशीले कृपणता ।।4।।

किमम्बा धावन्तं पथिनिपतितं चञ्चलतया

गृहीत्वा कारुण्यात् सपदि शिशुमुत्थापयतिनो

स्वकर्मव्यत्याशादहह पतितेनन्यगतिके

करालम्बोदेयो मयि जननि ते मैथिलशिशौ ।।5।।

□□□

# अनुक्रमणिका

# भूमिका

नैतत् परोक्षं प्रेक्षावतां यद् वेदार्थप्रतिपादकेषु सुप्रसिद्धेषु षट्सु वेदाङ्गेषु प्रधानं व्याकरणमेवेति । ततः प्रधाने च कृतोयत्नः फलवान् भवति । अतः शब्दसाधुत्व-प्रतिपादनपरा व्याकरणस्मृतिः लोके सुप्रसिद्धा जाता । अस्याः पाणिनिस्मृतेश्च प्रथमः प्रवक्ता महर्षिः पाणिनिः शब्दशास्त्रकुलगुरुतां भजते । अनेन कुलगुरुणा सैषा-व्याकरणस्मृतिः सूत्रेषूपनिबद्धा । तानि च सूत्राणि अष्टभिरध्यायैर्गुम्फितत्वाद् 'अष्टाध्यायी'ति नाम्ना व्यवह्रियते । अस्यामष्टाध्याय्यां लौकिक-वैदिकोभय-विधिशब्दप्रक्रियाविलासो विलसति । अनेन लोकवेदोभयमार्गेण संचरमाणः स एष पाणिनि मुनिः अक्षरसमाम्नायादारभ्य शब्दसिद्धिप्रतिपादनपरं विलक्षणं तन्त्रं प्रणिनाय । यस्मिन् पथि पाणिनेः प्राक् कोऽप्याचार्यः न सञ्चचार । इदमेव पाणिनि-व्याकरणस्य व्याकरणान्तरेभ्यो वैशिष्ट्यम् । अतो वैशिष्टयविरहादेव प्राक्तनानि व्याकरणान्तराणि सहजमतया विस्मृतिपथं गतानि । विलसति च लोकवेदोभयशब्दानुशासनपरत्वात् पाणिनीयं तन्त्रमेव निखिलव्याकरणराशिशिरो-रत्नायमानमिति ।

पाणिनिसूत्राणामर्थं विशदीकर्तुं प्राचीनकालादेव बहवो वृत्तिकाराः प्रयतन-परा अभूवन् । तेषु व्याडि-कुणि-प्रभृतिभिराचार्यैर्गुम्फिता वृत्तयः सुप्रसिद्धा आसन्, किन्तु अनुपलब्धिहेतोर्न ताः समुपलभ्यन्ते वर्तमानकाले ।

अतः पाणिनीयसूत्रतत्वार्थं विशदतया व्याचिख्यासुः शेषावतारो भगवान् पतञ्जलिस्तदेव वार्तिकानि समालोड्य समालोच्य च महाभाष्याख्यं ग्रन्थरत्नं प्रणिनाय । महाभाष्यविरचनान्तरं पाणिन्युपज्ञं व्याकरणं सर्वाङ्गपूर्णं समभवत् । तस्या भाषा भाषमाना सर्वा लक्ष्यसिद्धिर्निर्दोषतां संजाता । तदेवं सूत्रानुसारि-व्याख्यानमनुसृत्य व्याकरणाध्ययनाध्यापन-रीतिर्विद्वद्भिरनुमोदिता प्रख्यापिता च । कालक्रमेण सूत्रानुसारिणी प्रक्रिया शनैः शनैः शैथिल्यमभजत । कालप्रभावादेव व्याकरणाध्यापने क्लेशमनुभवन्तो विद्वांसः कार्यकालपक्षाङ्गीकार एव छात्राणाम-

भिरुचिं पश्यन्तो लक्ष्यसाधनात्मिकां सरणिं मनुसृत्य प्रक्रियाग्रन्थान् व्यरचयन्। अग्रे बहुतिथे काले गते प्रमामाद् अष्टाध्यायीसूत्रक्रमपाठः प्रायशो विलुप्तः, केवल प्रक्रियाग्रन्थानां पठन-पाठनक्रम एव सर्वत्र प्रचलितोऽभूत्। इत्थं च व्याकरणस्याध्येतारो मूलतोऽतिदूरं गताः।

वस्तुतः सूत्रार्थसम्पादने महाभाष्याद्याकरग्रन्थेषु प्राचीन-प्रक्रिया-ग्रन्थेषु च पाणिन्यष्टकस्य सूत्रपौर्वापर्यक्रममनुसृत्यैव सर्वत्र समानेन रूपेण पतञ्जलिप्रभृतिभिर्निर्वाहः कृतो दृश्यते। तथापि प्रक्रियाग्रन्थेषु कार्यकालपक्षमाश्रित्य सूत्राणि विभिन्न प्रकरणेषु विकीर्णानि जातानि। तेन हेतुना विभिन्नप्रकरणेषु पठितानां सूत्राणां पारस्परिकं ज्ञानं काठिन्येन भवति। यतोहि अष्टाध्याय्यां सर्वाणि प्रकरणानि वैज्ञानिकेन विधिना सुसम्बद्धानि वर्तन्ते। अतस्तत्तत्प्रकरणस्य ज्ञानं सुतरामनायासेन यथाक्रमं जायते। अपरं च अष्टाध्याय्यां 'विप्रतिषेधे परं कार्यम्', 'असिद्धवदत्राभात्', 'पूर्वत्रासिद्धम्' इत्यादधिकारसूत्राणां प्रकरणेषु सूत्रक्रमज्ञानमन्तरा न कोप्यन्य उपायो विद्यते। अपितु सूत्राणां क्रमिकत्वमेवापेक्ष्यते। यतः सूत्राणां पौर्वापर्यज्ञानमन्तरा 'पूर्वम्', 'परम्', 'आभात्', 'त्रिपादी', 'सपादसप्ताध्यायी', 'बाध्यबाधकभावश्चेत्यादि' ज्ञानं कथमपि न सम्भवेत्। अथ च सूत्रपाठक्रमव्यत्यासेनाधीतवतां छात्राणां सूत्रपाठक्रम-ज्ञान-वैपरीत्यात् प्रतिपदं प्रतिसूत्रं वा पाठं पूर्णतया बुद्धौ नाधिरोहति। एवं दोषमपाकर्तुमेव पूर्वस्मिन् कालेपि वृत्तिकाराः प्रायतन्त।

पाणिनीयशास्त्रस्य प्राचीनाऽध्ययनप्रकारस्तु सूत्रपाठक्रमानुसार्येवासीत्। सूत्रपाठक्रममनुसृत्य पुरा कथं व्याकरणाध्ययनं भवतिस्म इत्यत्र काशिकादयः प्राचीनवृत्तिग्रन्थास्तद्व्याख्यानग्रन्थाश्च प्रमाणम्। परन्तु वैक्रमाब्दस्यैकादशशताब्द्यां पाणिनीयतन्त्राध्ययनस्यापरः प्रकारः प्रादुर्बभूव। तदनुसारं यथाप्रक्रियं पाणिनीय-सूत्राणि संकलय्य पठनपाठनक्रमस्यारम्भो जातः। उत्तरोत्तरं च क्रमोऽयं विस्तरं पूर्णतां च गतः। अयं क्रमः प्रक्रियानुसारी क्रम इत्युच्यते। बौद्ध-धर्मकीर्ति-प्रवर्तित एवायं क्रम इति प्रतीयते। तत्र रूपावतार एव तदीयो ग्रन्थः प्रथमः। तदनन्तरं प्रक्रियाकौमुदी-वैयाकरणसिद्धान्तकौमुदी-मध्यसिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदी प्रभृतिग्रन्थाः क्रमशः रामचन्द्राचार्य-भट्टोजिदीक्षित-वरदराज—भट्टाचार्य्यैः व्यरच्यन्त। अथ सिद्धान्तकौमुद्यादिलघुशब्देन्दुशेखरादिनानाव्याख्याग्रन्थाः भट्टनागेश प्रमुखैराचार्य्यैर्विरचिताः। पाणिनेरष्टाध्याय्यां षट्विधं सूत्रं दरीदृश्यते।

तदुक्तम्—

"संज्ञा च परिभाषा च विधिर्नियम एव च ।

अतिदेशोधिकारश्चषड्विधं सूत्रमुच्यते ॥ इति ॥

तत्र विधिसूत्रेषु स्त्रीप्रत्ययविधायकानि सूत्राणि वार्तिकानि स्त्रीप्रत्ययनिषेधकानि चाधारीकृत्य पाणिनीयव्याकरणे स्त्रीप्रत्ययानामध्ययनमिति विषयकः शोध-प्रबन्धोऽयं मया विरचितः । विषयमिमादाय शोधप्रबन्धं विरचयितु प्रयतमानेन मया स्त्रीप्रत्ययसम्बद्धप्राचीननवीनोभयपद्धत्योः समस्तं पाणिनीयानुशासमधीत्य काचन नूतना पद्धतिः 'मुरारेस्तृतीयपन्थाः' इति सूक्तिमनुश्रृत्य समाश्रिता। यत्रोऽत्र शोधप्रबन्ध न सूत्रक्रमः, नापि लक्ष्यक्रमः समाश्रितः किन्त्वक्षरक्रमः समाश्रितः । पाणिनीयाः स्त्रीप्रत्ययाः उङ्–ङीन्–ङीप्–चाप्–टाप्–डाप्–ति ष्फ ष्यङ्, इत्येते दश स्त्रियामित्यधिकारे विहिताः दरीदृश्यन्ते । तथापि अनुबन्धविनिर्मुक्ताः आकाररूपाः, ईकाररूपाः, उकाररूपाः, ति-रूपाः, ष्फ-रूपाः ष्यङ्यरूपाः, श्चेति षडेव सन्तीति विभाव्य यथाक्षरक्रमं सर्वेषामेषां विलक्षणमध्ययन मया शोधप्रवन्धे प्रस्तुतम् । तत्र प्रथमाध्याये लिङ्गस्वरूप तद् भेदाध्ययनम्, प्रत्ययस्वरूपतद्भेदाध्ययनं स्त्रीप्रत्ययानां स्त्रीत्वद्योतकत्वाध्ययनं च ।

द्वितीयाध्याये आकाररूपाणां स्त्रीप्रत्ययानामध्यनम्, ईकाररूपस्त्रीप्रत्ययेषु ङीन् प्रत्ययाध्ययनं च, तृतीयाध्याये ईकाररूप स्त्रीप्रत्ययेयु ङीप्-प्रत्ययस्याध्ययनम् । चतुर्थाध्याये ईकाररूप स्त्रीप्रत्ययेषुङीष्प्रत्ययाध्ययनम् । पञ्चमाध्याये ऊकाररूप स्त्रीप्रत्ययस्य अध्ययनम्, आकारे-कारोकारव्यतिरिक्त-स्त्रीप्रत्ययानामध्ययनम्, स्त्रीप्रत्ययानां ति, ष्फ, ष्यङ्, प्रत्ययानामध्ययनं, च स्त्रीप्रत्ययानां स्त्रीप्रत्ययान्तर्गतकतिपयादेशानाञ्च स्त्रीत्वाव्यतिरिक्तार्थानामध्ययनं, टाबादि स्त्रीप्रत्ययानुबन्धाध्ययनं च प्रास्तवम् । यद्यपि व्याकरणविपश्चिदपश्चिदानां पाणिनीयाकारग्रन्थेभ्यः स्त्रीप्रत्ययपरिज्ञानं सुलभम्, तथापि आधुनिकानां वैयाकरणानां प्रचुरसमयसाध्याध्ययनसाध्यमाकरग्रन्थस्थ स्त्रीप्रत्यय-परिज्ञानं न सुलभमिति विभाव्य विपश्चिदपश्चिमानां प्रमोदाय स्वान्तः सुखायाधुनिकपरीक्षापिशाचीग्रस्तानामन्तेवासिनां स्त्रीप्रत्ययपरिज्ञानसौलभ्याय भूरिश्रमेण विरचितं नव्यं भव्यं चेमं ग्रन्थं विदुषां प्रस्तुत्यामन्दानन्दमनुविन्दे । अनेन ग्रन्थेन कस्यचनाभावस्य पूर्तिर्भविता यतो नाद्यावधि केनापि विषयमिमधिकृत्येदृशः ग्रन्थः विरचितः ।

परमश्रद्धेय-शिक्षामन्त्रालयस्य संयुक्तशिक्षापरामर्शदातृ-पूज्य डॉ. रामकरण-शर्ममहानुभावानां राष्ट्रिय-संस्कृत-संस्थान-निदेशक, डॉ. मण्डनमिश्र महोदयानां परमश्रद्धास्पद-गुरुवर डॉ. हर्षनाथमिश्रमहोदयानां चासीमया करुणया सर्वदा सर्वथा चाहमयक्रतेत्र। तत्र भवद्भिः गुरुवरैः नव देलहीस्थ श्रीलालबहादुशास्त्रि केन्द्रीय संस्कृत विद्यापीठ वरिष्ठप्राचार्यैः न्याय-व्याकरण-साहित्याचार्य-विद्यावाचस्पति डॉ. श्रीमणिनाथझाशर्म-महानुभावैर्मुहुर्मुहुः प्रदत्तोत्साहैः साहाय्यैश्च विघ्नसमूहं निहत्य मया शोधप्रबन्धोऽयं व्यरचीति तेषां समेषां पादपङ्कजेषु नतेन शिरसा स्वीयान् प्रणामाञ्जलीन् समर्पयामि।

अन्यांश्च विद्यापीठस्य गुरुचरणान् पुस्तकालयाध्यक्षं, शोधविभागाध्यक्षं प्रति च प्रणतिपुरसरं स्वकीयां कृतज्ञतां प्रकटयामि। येषामेतेषां मदीयोऽयं प्रबन्धः पूर्णतां गतः।

प्रबन्धस्य अस्य प्रकाशनाय वित्तीयसाहाय्यप्रदानानुकम्पाविधायकं राष्ट्रिय-संस्कृत संस्थात प्रतिं चाहमस्मि कृतज्ञः।

"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ इति ॥

—शिवकान्त झा

———

प्रथमोऽध्यायः

# (क) लिङ्गस्वरूपं तद्भेदाश्च

यद्यपि लिङ्ग्यतेऽनेनेति व्युत्पत्या 'इदितोनुम् धातोः' (7·1·58) इति कृत-नुमागमाद् 'लिगि गतौ' (भ्वा. प. से. 155) इति धातोः करणे घञि निष्पन्नोऽयं लिङ्गशब्दः व्यहाराल् कोषाच्च क्लीवलिङ्गः नानार्थकश्च,[1] तथापि नपुंसकोऽयं लिङ्गशब्दः पानिणीयव्याकरणे लक्षणार्थकोमन्यते। तदुक्तम्—महावैयाकरणेन परम गुरुणादीनवन्धुभा महोदयेन—

"पुंस्त्वादि लौकिकं पुंस्त्री[2] क्लीवानां लक्षणं यतः।
तेनोच्यते लिङ्गमिति लिङ्गलक्षणवाचि यत्॥

लौकिकेषु पुंस्त्वस्त्रीत्वनपुंसकत्वेषु लक्षणत्वरूपं लिङ्गत्वमक्षतमेव, लक्ष्यन्तेहि लौकिक पुंस्त्वादिभिः पुरुष—स्त्री—क्लीवरूप व्यक्तिविशेषाः, इति तदर्थः।

**पुमादि शब्द व्युत्पत्तिः**—"पूञोडुम्सुन्" इत्यौणादिक[3] प्रत्ययेन पुनातीति विग्रहे 'पुम्स्' शब्दः सिद्धः, तस्य पुमान् पुमांसावित्यादीनिविभक्त्यन्तरूपाणि। तत्र पुनातीतिविग्रहमात्रम् नतु तदर्थानुगमः। अस्य प्रवृत्तिनिमित्तंहि मेढ्रवत्वं लौकिकम्, सत्वादि गुणानां वृद्धि परिणामलक्षणं शास्त्रीयञ्च पुंस्त्वम्, अन्यद्धि व्युत्पत्ति

1. लिङ्गं चिह्ने नुमानेच सांख्योक्त प्रकृतावपि।
शिवमूर्ति विशेषे च, मेहनेऽपि नपुंसकम्॥ (इति मेदिनी)
2. लिङ्गवचन विचारे—श्लो. 5
3. उणादयोबहुलम् (3·3·1) एते वर्तमाने संज्ञायां च बहुलस्युः केचिदविहित अप्यूह्याः—

संज्ञासु धातुरूपाणिप्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु॥ —इति।

निमित्तमन्यत् प्रवृत्तिनिमित्तमि' त्युक्तत्वात् । सरूप सूत्रे भाष्ये तु लोके कर्तृसाधनः सूते इतिपुमान्, सूतेः सप् इत्युक्तम् । एतदनुसारेण सूधातोः कर्तरि डुम्सुनि धातोः सकारस्य पकारादेशे च 'पुम्स' शब्दः सिध्यतीति लभ्यते । तत्र सूते इत्यस्य "योनिरूपे आधारे शु॰ त्यजाति, इत्यर्थः' इत्युद्द्योते भट्टनागेशः । परन्त्वेवं साधने पि पुम्स् शब्दस्य पूर्वोक्तमेव प्रवृत्तिनिमित्तं मन्तव्यं न तु शुक्रत्याग कर्तृत्वम्, अत एव बालेपि पुमानयमिति व्यवहारः ।

स्त्री शब्दस्तु संघातार्थकस्य स्त्यै धातोरधिकरणे ड्रटिसिध्यति । स्त्यायतः गंधी भवतः शुक्रजसी यस्यांसास्त्रीति विग्रहः । अस्यापि योनिमत्वं लौकिकं, सत्वादि गुणानां ह्रास लक्षणम् शास्त्रीय चञ्च स्त्रीत्वं प्रवृत्तिनिमित्तं बोध्यम् ।

नपुंसक शब्दव्युत्पत्तिस्तु न स्त्री पुमानिति, न भ्राण्नपान्न—वेदाना—सत्यानमुचि—नकुलनखनपुंसकनक्षत्रनक्नाकेषु प्रकृत्या' (6·3·5) इति सूत्रेण निपातनात् स्त्रीपुंसस्य पुंसकादेशःप्रकृतिभावान्नलोपाभावः । अस्यापि रोगवयः प्रभृत्य प्रयोज्य मिथुनकर्म योग्यत्वाभावयुतमेढ्रभगान्यतरवत्वेसति पुंस्त्वस्त्रीत्वन्यतर प्रयुक्त श्मुश्रुस्तनादि शुन्यत्वरूपं लौकिकम्, सत्वादि गुणानां स्थितिलक्षणं शास्त्रीयञ्च नपुंसकत्वं प्रवृत्तिनिमित्तम् । अत्रेदमबधेयं पुंस्त्री नपुंसक शब्दाः पुंस्त्वादि धर्म विशिष्ट शक्ताः, ते च क्वचित् धर्ममात्रतात्पर्येनप्रयुज्यन्ते । यथा घट शब्दः पुल्लिङ्गः गङ्गाशब्दः स्त्रीलिङ्गः धन शब्दः नपुंसकलिङ्ग इति । एषु लिङ्गपदार्थे सामानाधिकरण्येनान्वितार्थकत्वात् पुमादयः शब्दाः धर्म-मात्र बोधकाः पुंस्त्वं लिङ्गमर्थोयस्य स इत्यादि बोधात् । क्वचित्स्वार्थबोधतात्पर्येण प्रयुज्यन्ते, यथा "पुंमान पाप्मा' 'सुमसः स्त्री' इति । अत्र पुमान् इत्यादयः पुमाद्यर्थ बोधक पराः 'पाप्म' शब्दः पुंस्त्वविशिष्टार्थ बोधकः सुमन् शब्दः स्त्रीत्व विशिष्टार्थ बोधकः इत्यादि बोधात् ।

इत्थं लिङ्गं लक्ष्म च लक्षणमिति कोषाल्लक्षणं लिङ्गपदार्थः 'लक्ष्यतेऽनेनेति व्युत्पत्याचिह्नं लक्षणपदार्थः, येनचिह्नेन यद्वस्तु ज्ञायते तस्य वस्तुनस्तचिह्नमेव लिङ्गम्, यथा पशोः लोमवल्लाङ्गूलं गोश्च सास्नालाङ्गूलककुदखुर विषाणरूपं च चिह्नं क्रमशः पशुं गां च ज्ञापयति तथैव स्त्री—पुं—नपुंसक ज्ञापकं किञ्चिच्चिह्नमेव व्याकरणे लिङ्गमित्युच्यते । इत्थं स्त्रीत्व—पुंस्त्व—नपुंसकत्वधर्म विशेषेषु प्रयुज्यमानं सत् स्त्रीत्वाद्यर्थं बोधयतीति स्त्रीत्व—पुंस्त्व—नपुंसकत्वाख्यधर्मविशेषाः लिङ्गम् । यथा आत्म शब्दात् पुंस्त्वरूपधर्म विशेषो ज्ञायत इत्यात्म शब्दः पुंस्त्वरूप लिङ्गवान् स्त्रीत्वरूप धर्म विशेषो ज्ञायते चितिशब्दादिति चिति शब्दः स्त्रीत्वरूप—लिङ्गवान्, चेतनशब्दाच्च नपुंसकत्वरूपधर्म विशेषो ज्ञायत इति चेतन शब्दो नपुंसकत्वरूपलिङ्गवान् । यस्माच्छब्दाद्द्वौ धर्मविशेषौ ज्ञायेतेऽसौद्विलिङ्गवान्; यस्माच्च त्रयो धर्म विशेषा ज्ञायन्ते सोऽत्रिलिङ्गवान् इत्युच्यते ।

शास्त्रीयलिङ्गं सत्वादिगुणपरिणामाः तद् विशेषोवृद्धिपरिणामः पुंस्त्वं, ह्रास परिणामः स्त्रीत्वं, समतया परिणामो नपुंशकत्वम् ।

लौकिकलिङ्गन्तुलिङ्गपदशक्यतावच्छेदकं पुंस्त्वादिकम् । तत्र मेढ्रवत्वं लौकिक पुंस्त्वं, लौकिक स्त्रीत्वं योनिमत्वं, लौकिक नपुंसकत्वं तु रोगवयः प्रभृत्य प्रयोज्य मिथुनकर्म योग्यत्वा भावयुत मेढ्रभगान्यतरवत्वेसति पुंस्त्व स्त्रीत्वान्यतर प्रयुक्त श्मश्रूस्तनादि शुन्यत्वम् ।

अत्रबालेऽपिइयंव्यक्तिर्नपुंसकमितिव्यवहारापत्तिवारणाय सत्यन्तनिवेशः । इत्थं लिङ्गपदशक्यतावच्छेदक धर्मपदेत्र लिङ्गमिति । निर्गलितोऽर्थः ।

तथाहि—

लिङ्गंद्विविधं लौकिकं शास्त्रीयं च । तत्र लौकिकलिङ्गं चेतनमात्रवाचक ब्राह्मणकुमारादि वाच्यम् । अतएवायं ब्राह्मणोऽयं कुमार इत्यादौ स्त्रिया व्यावृत्तिः ।

शास्त्रीयन्तु लिङ्गं ततो विलक्षणमेवव्याकरणशास्त्रे—'तस्माच्छसोनः पुंसिः' (6·1·103) इत्यादो' निमित्ततयाऽऽश्रीयम्ताणम । नहि तत्र लौकिकं लिङ्गं निमित्तमास्थातुं शक्यम, घटानित्यादौ नत्वाद्यभावापत्तः । एतदुभयविधमपि लिङ्गमत्र विचार्यते ।

'घट शब्दः पुलिङ्गः' 'अथलिङ्गानुशासनम्' 'सम्पूर्णमुच्यतेवर्गंन्ना-मलिङ्गानुशासनम्' इत्यादि व्यवहारात् शास्त्रीय पुंस्त्वादिषू लिङ्गपदवाच्यत्वम-वधार्यते, किन्तु लौकिकपुंस्त्वादषु कथं लिङ्गशब्दवाच्यत्वं कथमवधार्यते ।

अत्रोच्यते—लौकिकेषु पुंस्त्वस्त्रीत्वनपुंसकत्वेषुलक्षणत्वरूपं लिङ्गत्वमभ्रतमेव । लक्ष्यन्तेहि लौकिकपुंस्त्वादिभिपुरुष-स्त्री-क्लीवरूपव्यक्तिविशेषाः । इत्थं च लौकिकं शास्त्रीयं चोभयमपि पुंस्त्वादिकं लिङ्गमुच्यते ।

'अयं पुमान्' इत्यादिव्यवहारप्रवर्त्तकं,ब्राह्मणमानये'त्यादौस्त्रिया व्यावर्त्तकं च लौकिकं पुस्त्वम् । तच्च शिश्नवत्वरूपम् । न चैवं छिन्नशिश्ने पुंसि पुमानयमितिव्यवहारानृपपत्तिः । शिश्नवत्वस्योपलक्षणत्वोपगमात् । एवञ्च शिश्नवत्वंसनानाधिकरणातद्व्यक्तित्वमत्वंपुंस्त्वमितिफलितम् । यथा लोमवल्लाङ्गूलस्योपलक्षणत्वं, तथेहापि वक्तुं शक्यत्वात् ।

अथैवमपि मेढ्रशून्यस्यैव यस्य जन्म तत्र कथं पुमानयमिति व्यवहारः ? एवं दृष्टान्तेपि जन्मतो लाङ्गूलशून्येलोमशून्यलाङ्गूलवति वापशौ कथं पशुव्यवहार इति

चेत्—अत्राहुर्दार्शनिकाः—यस्य यत् असाधारणं लक्ष्म, तस्य तत्सहितस्यैव जन्मनैयत्यम् । तथा च प्राणिनः शिश्नवत्वं वा योनिमत्वं वा नियतमेव । एवं पशूनां जन्म काले लोमवल्लाङ्गूलत्वं प्रकृतिस्वभावसिद्धत्वान्नियतम् ।

ननु शास्त्रे 'स्त्रियाम्' (4·1·3) 'तस्माच्छसो नः पुंसि' (6·1·103) 'नपुंसकाच्च' (7·1·19) इत्यादौ स्त्रीपुंन्नपुंसकशब्दानां शक्यतावच्छेदकानि स्त्रीत्वपुंस्त्वनपुंसकत्वानि किं स्वरूपाणि ? यदिस्तनकेशवत्वं स्त्रीत्वं लोमवत्वं पुंस्त्वम्, उभायाभावत्वेसति अंशतस्तदुभयवत्वं नपुंसकत्वं तर्हि खट्वाद्यचेतन-बोधकखट्वादिशब्दानामुक्तस्त्रीत्वादिबोधकत्वासम्भवेन 'खट्वा' 'घटान्' 'दधी' त्यादौ क्रमशः टाप्, नत्वं, सोर्लुक् च न स्यात् । यदि च सत्वादि गुणानामुपचयः पुंस्त्वम् अपचयः स्त्रीत्वं, तेषां स्थितिरूपं नपुंसकत्वम् ।

सांख्यमतेहि पुरुषातिरिक्त पदार्थमात्रस्य सत्वरजस्तमः स्वरूप प्रकृति-परिणामरूपतया त्रिगुणात्मकत्वेन सत्वादीनां च स्वेतरगुणापेक्षया वृद्धिह्रास-साम्यरूपोपचयापचयस्थितीनां च सम्भवेन चेतनाचेतन सकलपदार्थेषु सर्वलिङ्गसद्भावेन दोषाभावः, एवं पदार्थ मात्रे 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इत्यादि वाक्यैः सर्वलिङ्गप्रतीतिरित्युच्यते, तथापि 'पुरुषेब्राह्मणी', 'ब्राह्मण्यांब्राह्मणः ब्राह्मण मित्यादिप्रयोगापत्तिस्सर्वत्र सर्वलिङ्गसत्वेन तत्तलिङ्ग विवक्षया तत्तल्लिङ्गबोधक-त्वनिमित्तक ततत् कार्य्यं प्रवृत्ति सम्भवात् इति चेत्—अत्रोच्यते—

अचेतननिष्ठप्रवृत्तिनिमित्तकशब्दानां सत्वादिगुणोपचयादिरूप-शास्त्रीय-लिङ्गबोधकत्वमेव, चेतननिष्ठप्रवृत्तिनिमित्तकशब्दानां तु शास्त्रीयलिङ्गसहित लौकिकस्तनादिवत्वादिरूपलिङ्गबोकत्वम् । दारशब्दस्य च शास्त्रीयलिङ्गबोधक-त्वमेव । कस्य शब्दस्य किं लिङ्गबोधकत्वमित्यत्रतु कोश एव प्रमाणं, कस्यचिदेक-लिङ्गबोधकत्वं, कस्यचिल्लिङ्गद्वयबोधकत्वं, 'कस्यचिल्लिङ्गत्रय बोधकत्व' मित्यपि कोशादेवावगन्तम् ।

तथा च ब्राह्मण ब्राह्मणीशब्दवाच्यस्य शास्त्रीयस्त्रीत्वस्य सत्वेऽपि लौकिकस्त्रीत्वस्याभावेन शास्त्रीयलिङ्गसहितलौकिकलिङ्गस्याभावात् न ब्राह्मणे ब्राह्मणीशब्दस्य, न वा ब्राह्मण्याब्राह्मणशब्दस्य प्रयोगः ब्राह्मण शब्दस्य शास्त्रीयनपुंसकत्वलिङ्गबोधकत्वाभावेन लौकिकनपुंसकत्वलिङ्गवत्वपि 'ब्राह्मण-मिति न प्रयोगः । शास्त्रघटक स्त्रीपुन्नपुंसकशब्दानां च शास्त्रीय-स्त्रीत्वादिलिङ्गबोधकतया अचेतनबोधकशब्देषु शास्त्रीयलिङ्गबोधकेषू शास्त्रीयतत्तल्लिङ्गबोधकत्वमिति टावादि कार्य्य-सिद्धिः । चेतननिष्ठ प्रवृत्तिनिमित्त-केषु च शास्त्रीयतत्तल्लिङ्गसहितलौकिकतत्तल्लिङ्ग बोधकेषु शास्त्रीय-तत्तल्लिङ्गबोधकत्वमादाय शास्त्रीयकार्यं जायते । तत्रशास्त्रीयलिङ्गविशिष्टलौकिक

लिङ्गबोधकत्वं स्वीकृतम् । लौकिकमात्रलिङ्गबोधकत्वे शास्त्रीलिङ्गबोधकत्वनिमित्तं कार्य्याणामभावापत्तेः ।

न च लौकिक लिङ्गबोधकत्वनिमित्तकत्वमेव शास्त्रीयकार्याणामस्तु चेतनबोधकशब्दे शास्त्रीयलिङ्गबोधकत्वस्य नोपयोयोग इति वाच्यम्, अचेतनबोधक शब्दे शास्त्रीयलिङ्गबोध कत्वनिमित्तकार्यानापत्तेः दारानित्यादौ नत्वानापत्तेश्च ।

नच शास्त्रघटकस्त्र्यादिशब्दान्तानामुभयलिङ्ग बोधकत्वमस्ति, चेतन बोधकानां लौकिकलिङ्गबोधकत्वम् अचेतनबोधकानां शास्त्रीयलिङ्गबोधकत्वमादाय शास्त्रीय कार्योत्पत्तेः चेतन बोधकानांशास्त्रीय लिङ्गबोधकत्वंमास्त्वन,नुभवादिति वाच्यं, लिङ्गद्वयेनुगतरूपाभावेन तत्तद्धर्मावच्छिन्नविभिन्न शक्तेरावश्यकतया सकृदुच्चरितस्त्र्यादि शब्दानां सकृदुच्चरितन्यायविरोधादुभयबोधकत्वासम्भवेनावृत्ति कल्पने गौरवात् । न चानन्त चेतन बोधकशब्दानां शास्त्रीयलिङ्गशक्ति कल्पापेक्षया शास्त्रघटक कतिपयस्त्र्यादिशब्दानांम वृत्तिकल्पने एव लाघवमिति वाच्यम्, नकारङीबादि कार्याणां चेतनाचेतनबोधकशब्दोत्तराणामनुगत नत्वादिधर्माव-च्छिन्नतयानुगतनत्वाद्यवच्छिन्न कार्यतानिरूपिति कारणतावच्छेदकेनानुगतधर्मेणैव भवितव्यम्, तथा च शास्त्रीयलिङ्गबोधकत्वावच्छिन्न एव कारणतेतियुक्तम्, ततश्च शास्त्रीयलिङ्ग बोधकत्वमेव स्त्र्यादिशब्दानामिति निर्णये तत्कार्यानुरोधेन चेतनबोधकशब्दानामपि शास्त्रीयलिङ्ग बोधकत्वमावश्यकमित्यावृत्तौ लाघवम किंचित्करम् । अन्यथाऽनन्त ब्रह्माण्डस्वीकार लाघवेन शून्यवादस्यापि प्रामाणिक-त्वापत्तेः । अतएव योगजदृष्ट्या सर्वज्ञेनापि भाष्यकारादिना स्त्रियामित्या दावा-वृत्तिर्यं कृता । एवमप्यत्याग्रहश्चदस्तु स्त्र्यादिशब्दपठितशास्त्राणामावृत्तिश्चेतन बोधक शब्दानां लौकिकमात्रलिङ्गबोधकत्वमस्तु ।

ननु एकस्मिन् पदार्थे युगपत्सत्वादिगुणानामुपचयापचययोरसम्भवेन 'बह्निर्देवता' इन्द्रो देवते'त्यादावेककाले एव पदार्थगतस्त्रीत्वपुंस्त्वबोधक देवता बह्नि शब्दप्रयोगानुपपत्तिरिति चेत् न "सत्वादिगुणानामुपचय" इत्यादिना न्धाराणां गुणानामुपचयादिरति नार्थोऽपि तु तेषां मध्ये कस्य । देवैरयर्थस्तथा चैकस्योपचयः परस्यापचयः इत्यस्य युगपत् सम्भवेनैकदा लिङ्गद्वय बोधेबाधकाभावात् । अतएवैकस्मिन्नेत्र समये एवास्मिन्नेव पदार्थेपदार्थइति, व्यक्तिरिति च प्रयुज्यते । चेतना चेतनोभय बोधक शब्दनां शास्त्रीयलिङ्ग बोधकत्वमेव । अत एव पदार्थ-यक्ति-वस्तुः शब्दानामुभयत्र प्रयोगः तत्प्रत्ययान्त देवताहिशब्दानामपि शास्त्रीय लिङ्ग बोधकत्व-मेव । अत एवेन्द्रो देवतेत्यादय. प्रयोगाः ।

नच सत्वादीनां गुणात्वातत्र महत्परिमाणरूपोपचयापचययोह्रसिद्धि-रूपयोर्वा तयो रसम्भवी गुणेगुणाङ्गनगी कारादिति वाच्यं, सत्वरजस्तमसां गुण

पद वाच्यत्वेऽपि वैशेषिकमतसिद्धगुणत्वाभावेनादोषात् । नचामनस्सत्वादिगुणानात्मकया तत्र शास्त्रीय लिङ्गासम्भवेन तद्बोधक शब्दानां लिङ्गनिमित्तक कार्याभाव प्रसङ्ग इति बाच्चम्, शुद्धस्याद्वयत्मस्या त्मनः शब्द वाच्यत्वाभावात् । "यतोवाचो निवर्तन्तेप्राप्य मनसा सहे" ति श्रुतिरहङ्कारादि विशिष्टस्य तस्य शब्दवाच्यत्वं नानुपपन्नमहङ्कारस्य त्रैगुण्यात् शास्त्रीयलिङ्गस्य तत्रबाधात् ।

नचैवमपि लौकिकपुंस्त्वस्य शिश्नवत्वमिति लक्षणंपुमाकार नपुंसक व्यक्तावति व्याप्तमिति वाच्यम्, यतोलक्षणघटक शिश्ने संभोगयोग्यत्वं निवेश्यते । यदित्वेवमपि रोगादिवशात् संभोगा तर्हि शिश्नवति अव्याप्तिरित्युच्यते, तदा रोगाद्यप्रयुक्तं यत् संभोगानर्हत्वं तच्छून्यत्वं तत्र निवेश्यम् । तथा च रोगाद्य प्रयुक्तसंभोगयोग्यत्वाभाव रहित मेढ्रवत्वंलौकिकपुंस्त्वम् । नपुंसक शिश्ने रोगाद्य प्रयुक्तो जन्मसिद्धएव संभोगयोन्यत्वाभावोऽस्तीति न नपुंसकेऽतिव्याप्तिः । रोगादिनोपहतेन्द्रिये तु रोगादिकृत एव संभोगयोग्य त्वाभावो नतु तदकृत इति विशिष्टाभावासत्वात् रुग्ण वृद्धादौ नाव्याप्त मिदंलक्षणम् । आदिपदेन वयसोऽपि ग्रहणम् । अतएव शिशावपि नाव्याप्तिः । योग्यता निवेशाच्च ब्रह्मचारिणि न । तद्व्याप्तम् ।

लौकिक स्त्रीत्वन्तु इयं स्त्रीति व्यवहार प्रवर्तकं' ब्राह्मणीमानयेत्यादौ पुरुषव्यवच्छेमकम् । तच्च योनिमत्वम् । पुंलक्षण इवात्रापि दोषवारणाय रोगाद्य-प्रयुक्तमिथुनकर्मोपयोगयोग्यत्वाभावरहित योनिमेत्वंस्त्रीत्वमिति निर्वक्तव्यम् । लक्षणसमन्वय' पूर्वोक्तरीत्यो हनीयः । तथा चोक्तम्—

स्तनकेशवतीस्त्री स्याल्लोमशः पुरुषः स्मृतः "इति तत्र केशो योनिः लोम शिश्नः । स्तनेतितुपलक्षम् । तेनाजातस्तन्यां न.व्याप्तिः । वस्तु-तस्तु स्त्रीलक्षणे' स्तनेति नैव वाच्यम् ।

लौकिक नपुंसत्वं तु निरुक्तपुंस्त्व स्त्रीत्वोभयशून्यत्वे सति स्त्रीपुंससाधारणा-वयवशालित्वम् न स्त्री पुमातिति योगार्थानुसारित्वात् । घटादावतिव्याप्ति बारणाय विशेष्य दलम्—इत्याहुः ।

वयन्तु ब्रूमः—मेढ्रवत्वं लौकिकपुंस्त्वम् । लौकिक स्त्रीत्वं तु योनिमत्वम् । नच मूढ़मेढ्रभगान्यतरवन्नपुंसक व्यक्तावति व्याप्तिरिति वाच्यम्, इष्टापत्तेः । लौकिक नपुंसत्वं तु रोगवयः प्रभृत्यप्रयोज्य-मिथुन-कर्मयोग्यत्वाभावयुतमेद्भगान्यतरवत्वे सति पुंस्त्वस्त्रीत्वान्यतर प्रयुक्तश्मश्रुस्तनादिशून्यत्वम् । सत्यन्तानिवेशे बालेऽपि 'इयं व्यक्ति र्नपुंसकमि' ति व्यवहारापत्तिः ।

यत्र चैतल्लक्षणलक्षितं नपुंसकत्वं तत्र लौकिक पुंस्त्वस्त्रीत्वयोरेकतरं नियतम् । अर्थात् लोकप्रसिद्ध नपुंसकत्वं लौकिक पुंस्त्व स्त्री त्वान्यतर समाना-

धिकरणमेव तिष्ठतीति । अतएव मेढ्रवति नपुंसकजने 'अमुना नपुंसक ब्राह्मणेन कृतिमि' ति प्रयोगः उपपद्यते । उपपद्यते च योनिमति नपुंसकजने 'अनया नपुंसक-ब्राह्मण्याकृत'मिति प्रयोगः। लौकिक पुंस्त्वस्त्रीत्वाभ्यां लौकिक नपुंसकत्वस्य वैयधिकरण्याॅभ्युपगमेतु नोपपद्यते । तथाहि चेतनमात्र वृत्तिप्रवृत्तिकानां ब्राह्मण-कुमारादीनां शास्त्रीय पुंस्त्वस्त्रीत्व-शक्तत्वं, न नपुंसक शक्तत्वम् । अतएव नपुंसक व्यक्ति तात्पर्येणापि 'एतानि ब्राह्मणानी'ति नैव भवति प्रयोगः शास्त्रीय पुस्त्वादिक न् केवलान्वयि । एवंस्थितौ यदि नपुंसकव्यक्तौ लौकिकपुंस्त्व स्त्रीत्वे न स्वीक्रियेते तदा ब्राह्मणी मानयेत्यादौ पुरुषबोधाभावाय स्वीकरणीयस्य चेतनमात्र निष्ठप्रवृत्तिनिमित्तकात् ब्राह्मणादिपदात्प्रतीयमान शास्त्रीयपुंस्त्वादि सामानाधिकरण्येन तत्सजातीयलौकिकलिङ्गमपि प्रतीयतएवेतिनियमस्य भङ्गापत्तिः । 'अमुना क्लीबब्राह्मणेने'त्यादौ शास्त्रीयपुस्त्वसामानाधिकरण्येन नपुंसक व्यक्ति व्यावृत्त लौकिकपुंस्त्वस्य भानासम्भात्, 'अनया क्लीब ब्राह्मण्ये' त्यादौ शास्त्रीयस्त्रीत्वसामानाधिकरण्येन नपुंसकजनव्यावृत्त लौकिकस्त्रीत्वस्य भानासम्भवाच्च । उक्तनियमस्य भङ्गाभ्युगपगमे च उक्तस्य ब्राह्मण्यादि शब्दात् पुरुषबोधप्रसङ्गरूपदोषस्यापत्तेः', नपुंसकस्त्रीबोध तात्पर्येणापि 'अमुना नपुंसक ब्राह्मणेने'ति प्रयोगापत्तेश्च, नपुंसपुरुषबोधतात्पर्येणापि 'अनया ब्राह्मण्या कृतमि'ति प्रयोगापत्तेश्च । मम तु लौकिकंपुंस्त्वं वा लौकिक नपुंसकत्वत्यपि जने वर्तत एवेति नोक्तदोषावकाशः । अमुना ब्राह्मणेन' क्लीबब्राह्मणेनवेत्यादौ शास्त्रीयपुंस्त्वविशिष्ट लौकिक पुंस्त्वस्य भानान्नब्राह्मण्या बोधापत्तिः, न वा अनया ब्राह्मण्ये 'त्यादितः पुरुषबोधापतिः। शास्त्रीयलौकिक लिङ्गयोः साजात्यं च लिङ्ग विशेष बोधक समान शब्द वाच्यत्वेन बोध्यम् ।

'ब्राह्मणोऽयम्' 'ब्राह्मणीयम्' इत्यादौ शब्दशक्त्या प्रतीयमानमपि लौकिक-लिङ्गं तस्माच्छसो नः पुंसि', (6·1·103) 'स्त्रियाम्', (4·1·3) 'स्वमोर्नपुंसकात्' (7·1·23) इत्यादि व्याकरणशास्त्रेषु न निमित्तम्, 'घटान्' 'खट्वा' मधु' इत्यादौ नादेश—टाप प्रत्यय लुगाद्य भावप्रसङ्गात् । किन्तु तेभ्यो लौकिक लिङ्गेभ्यो विलक्षण किम प्यन्यदेव । तदुक्तं स्वरूप सूत्रे भाष्ये—''न वैयाकरणैः शक्यं लौकिकं लिङ्गमाश्रयितुम् । अवश्यं कश्चित् स्वकृतान्त आस्थेयः । को सौ स्वकृतान्तः ? संस्त्यान प्रसवौ लिङ्गमि' ति ।

**अस्यायमर्थः**—संस्त्यानं सत्वादिगुणानामुपचयरूपः परिणामः, प्रसवः अपचयपरिणाम्ः । तद् द्वयात्मकं लिङ्गं वैयाकरणैः शास्त्रेषुनिमित्तमाश्रयणीयमिति ।

तत्रोपचयः पुंस्त्वंलिङ्गम् अपचयः स्त्रीत्वलिङ्गमितिविवेकः। तदेवं शास्त्रीय पुंस्त्वस्त्रीत्वे निरूपिते ।

अथ शास्त्रीयनपुंसत्वं किम् ? तत्र केचित्-सत्वरजस्तमोगुणानां त्रयाणानुपचयापचय साम्यानि क्रमशः पुंस्त्व-स्त्रीत्व-नपुंसकत्वानीत्याहुः । अन्येतु—सत्वादिगुणानां मध्ये कस्यचिद् गुणस्योपचयः पुंस्त्वम्, अपचयः स्त्रीत्वं, साम्यं नपुंसत्वम्, नतु गुणत्रयस्य । तत्साम्ये प्रलयस्यैव सिद्धान्तितत्वादिति वदन्ति । परेतु साम्यं न नपुंसकत्वमपितुस्थितिः । अतएव यत्र त्रयाणामपि गुणानां वैषम्यं तत्रापि नपुंसकत्वमुपपद्यते इत्याहुः ।

वस्तु तस्तु सत्वरजस्तमोगुणानांमध्ये कस्यचिद्गुणस्योपचयांशः पुंस्त्वमपचयांशः स्त्रीत्वमिति सम्यगेव । नपुंसकता तु तत्र कस्यचिद्गुणस्य साम्यावस्था अर्थात् उपचयापचयराहित्येन समपरिणामः तथा चौक्तं सरूपसूत्र भाष्यप्रदीपे कैयटेन—"गुणानां" सत्वरजस्तमःपरिणाम रूपाणांशब्दादीनां वृद्धिह्रास मध्यमावस्थाः शब्दैकगोचरा लिङ्गत्वेन परिगृह्यन्ते,' इति ।

**अस्यायं भावः**—सांख्यसिद्धान्तानुसारेण सर्वेपदार्थाः प्रतिक्षण परिणामि गुणत्रयसंघातरूपा ऋतेपुरुषात् । तत्र कस्याचिद वृद्धिरूपः परिणाम, कस्यचित् ह्रास रूपः कस्यचिन्तु वृद्धिह्रास राहित्येन समपरिणाभोदीपवन्नियतः । एतादृश गुणपरिणामा एव तत्तच्छब्दमात्रवेद्याः सूक्ष्मत्वात्प्रमाणान्तरेण दुरधिगमा लिङ्गत्वेन स्वीक्रियन्ते वैयाकरणैः । तेन 'रामस्य दारा मैथिली कुलरत्नमि'ति एकस्मिन् मैथिली पदार्थे युगपत् पुंस्त्व स्त्रीत्व नपुंसकत्वानां त्रयाणामपि लिङ्गानां भानम् । लौकिकलिङ्गपरिग्रहेतु तादृश पुंस्त्वादीनामेकत्रसमावेशासम्भात् तदनुपपत्तिः । तटादिषु च कस्यापि तादृश लिङ्गस्यासद्भावेन तटः तटी तटमित्यादौ तत्प्रयुक्तशास्त्रीय कार्यमशक्यमेव स्यादिति ।

सत्वादिगुणपरिणामाः शास्त्रीयलिङ्गम् तद्विशेषो वृद्धिपरिणामः पुंस्त्वम् । ह्रासपरिणामः स्त्रीत्वम् । समतया परिणामो नपुंसकत्वम् । गुणपरिणाम-सामान्यधर्मो—लिङ्गत्वम् , तद्व्याप्यानि तु पुंस्त्वत्वादीनीति ।

यदा सत्वादि गुणानां त्रयाणामप्युपचय परिणाम एव, न कस्याप्यपचय परिणामो न वा समपरिणामस्तदा अपचय रूप स्त्रीत्वाभावात् साम्य परिणतिरूप नपुंसकत्वविरहाच्च तत्र तदा इयं व्यक्तिरिति इदं वस्त्वि ति च व्यवहारस्यानुपपत्तिरिति चेत् —न । नहि एकदा त्रयोऽपि गुणा उपचीयन्तेऽपचीयन्ते वा, किन्तु यदैको गुण उपचीयते तदाऽपरः कश्चिद् गुणोऽपचयं यात्येव । तृतीयस्तु कश्चित् सम एवावतिष्ठते इति नियमात् ।

इत्थमेव गुणपरिणतिर्नान्य थेति कथमवधारणीयमिति चेत् पदार्थतत्वविदो मुनेर्महाभाष्यकारस्य पतञ्जलेर्वचनात् गृहाण । उक्तं हि तेन सरूपसूत्रे "तच्चौभयं-सर्वत्र" । उपचयापचयोभयं सर्वत्र पदार्थे वर्तते, इति तदर्थः । यदि तु कदाचित्

साम्येन परिणतिविरह दशायां 'तत्र इदं वस्तु' इति व्यवहारानुपत्ति इत्ति ? अत्रोच्यते—समपरिणामोऽपि सार्वत्रिक इत्यपि भाष्यकारोक्त्यैव गम्यते। उक्तं हि तत्रैव भाष्ये—

"यद्युभयं सर्वत्र" कथं लिङ्गव्यवस्था ? विवक्षातः। उपचय-विवक्षायां पुमान्। अपचय विवक्षायां स्त्री। उभयोरप्यविवक्षायां तु नपुंसकम्। अस्यायमभिसन्धिः वक्त्रा विवक्षितोऽर्थस्तद्बोधकशब्देन प्रत्याय्यते। तदर्थबोधकतातु शब्दानांनियता। अतोयदार्थे उपचयांशो-विवक्षित-स्तदा तद्बोधक-पदार्थादि-शब्देन स एव यदाचापचय एव विवक्षितस्तदा तद्बोधक व्यक्त्यादिशब्देन स एव प्रत्याय्यते यदा पुनरेतदुभय न विवक्ष्यते अपितु साम्येक परिणाम एव विवक्षितो भवति तदा तद्बोधकवस्तादि शब्देनतदेवनपुंसकत्वमेव, बोध्यते। एवं च सर्वत्र सर्वलिङ्गसत्वेपि तद्व्यवस्थेति।

यद्यपि साम्यविवक्षायां नपुंसकमितिस्पष्टंनोक्तंभाष्ये तथापि गुणानां वृद्धि ह्रासमध्ययावस्था लिङ्गत्वेन परिगृह्यन्ते इति कैयट व्याख्यानुसारेण तत्रैव भाष्य तात्पर्यं लभ्यते। किञ्च तज्जातीय पुंस्त्वं स्त्रीत्वं च नपुंसकत्वेनापि तज्जातीये-नैव भाष्यम्। तथा च पुंस्त्व स्त्रीत्वे यदि गुणपरिणतिरूपे तर्हि नपुंसकत्वस्यापि गुण परिणाम रूपतैवोचिता। गुणपरिणामाश्चोपचयापचयसाम्यरूपा एवेति युक्तं नपुंसकत्वस्य गुणसाम्यावस्थारूपत्वम्।

अत्रेदं बोध्यम् सांख्य दर्शने प्रकृतिपुरुषश्चद्वावेव पदार्थे। तत्र सत्वरजस्तमो गुणात्मिका प्रकृतिः। सा च प्रतिक्षणपरिणामिनी। ततएव पुरुषभिन्नं सर्वमेव विश्वमुत्पद्यते। अतः कार्यकारणयोरभेदोपगमेन समस्तजगत् त्रिगुणात्मकम्। पुरुषस्त्व परिणामी चेतनश्च।

वैयाकरणश्च व्याकरणप्रक्रिया निर्वाहाय सांख्यमतमनुसृत्य तन्मते स्थितानेव गुणपरिणामान् लिङ्गपदेन तद्विशेषांश्च वृद्धिह्रास साम्य परिणामान् क्रमशः पुंस्त्वादि शब्दैः परिभाषन्तेस्म।

न्यायादिदर्शन प्रवर्तकाचार्यास्तु व्याकरणतो वा स्वयमेव वा परिशुद्धा देववाणीव्यवजह्रुरिति प्रयोजनविरहेणलिङ्ग निरूपणेषुआसीना एव।

एते न्यायादिनये पदार्थानां सत्वादि गुणात्मकतया नङ्गीकारेण तन्मते किन्नाम शास्त्रीय लिङ्गमिति शङ्कासमाहिता।

वस्तु तस्तु न्यायनयेपि लिङ्गनिरूपणमावश्यकमेव लिङ्ग-पुमादिशब्द व्यवहारस्य तन्मतेपि अपरिहार्थ्यत्वात्। अपि च अभेदान्वय बोधौपयिकतया समान-

लिङ्गत्वंप्रतिपादितं व्युत्पत्तिवादादिषु। नच लिङ्गसामान्यज्ञानं लिङ्ग विशेष ज्ञानं विना तदवगन्तुं शक्यम्। अतएव न्यायनये तत्स्वरूपं निरूपितं व्युत्पत्तिवाद् तत्वालोके।

"स्वमते गुणत्रयानङ्गीकारात्—सत्यां ब्राह्मण्यां ब्राह्मणोनास्ति, ब्राह्मणे च सति ब्राह्मणी नास्तीति प्रतीत रूत्पादात् लिङ्गन्योन्यादिमत्वलक्षण पुंस्त्व स्त्रीत्वादि प्रत्ययस्याङ्गींकरणीयत्वेपि तटस्तटीत्यादौ तत्प्रत्ययस्व बाधात् प्रयोजनाभावाच्च नाङ्गीकरणीयत्वमेवेति न पुंस्त्वादिबोधकत्वं पुलिङ्गत्वादिकम् अपितु प्राण्वप्राणीप्रतिपादकसाधारणं पदसंस्कार प्रयोजक पुलिङ्गत्वादिना परिभाषितत्वमेव। पुंस्त्वादि बोधस्वरूप योग्यत्वमेव पुलिङ्गत्वादिकम्। तत्वं चानुगतं प्रातिपदिकवृत्यानु-पूर्वीकत्वमित्यादि इत्यपि कश्चित् इति"।"

तत्वालोक ग्रन्थमिममधिक्षिपन्तो लिखन्ति लिङ्गवचनविचारे महावैयाकरणाः प..दीनड़न्धुझा महोदयाः पुलिङ्गत्वादेः पुलिङ्गत्वादेः पुलिङ्गत्वादिना परिभाषितत्व रूपत्वे पुलिड् गत्वादि बोधस्वरूप योग्यत्वरूपत्वंवा, तस्य पुंस्वादि बोधकत्व रूपत्वानङ्गीकारात्, पदसंस्कार प्रयोजकत्वानुपपत्तेः तथाहि अप्राणिबोधक तटादि शब्देभ्यो लिङ्गविषयक बोधानभ्युपगमे पङ्कःइत्यादौ उक्तरीत्या अमाद्या पत्तिर्दुष्परिहरा, अर्थ-निमित्तक कार्यमात्रस्य तत्तदर्थ विवक्षायामेव प्रवृत्तेः, अन्यथातिप्रसङ्गात्।

अपि च शास्त्रीयलिङ्गस्य शाब्दबोधाभावे उपमालङ्कारे उपमानोपमेय बोधकयो विभिन्नलिङ्गकत्वं दोष इत्यालङ्कारिकः सिद्धान्तो निर्बीजः स्यात्। तद्बोधोपगमेतु लिङ्गभेदप्रयुक्त वैधर्म्यविभास एव तस्य दोषत्वे बीजं भवति।

अपि च अचेतन बोधक पदात्प्रतीयमानमपि लिङ्गं लोके प्रवृत्ति निवृत्योरनुपयोगेनोपेक्षयाग्रहणात् शाब्दबोधे अविषयी भवदिवलक्ष्यते। यथा योगशास्त्रे भगवता पतञ्जलिमुनिना समाधेः शब्दसंकीर्णत्वे सवितर्कत्वोक्तया,

"न सोस्ति प्रत्ययो लोके यः शब्दानुगमाहृते।
अनुविद्धमिवज्ञानं सर्वं शब्देन भाषते॥

इति व्युक्तया च सूक्ष्मानुभवारुढतया च शाब्दबोधे भासमानाः अपि शब्दाः प्रवृत्तौ निवृत्तौ वानुपकारेणाविषयीभवन्त इव प्रतिभान्ति तथा लिङ्गान्यप्यपीति विभावयन्तु सुधियः इति। भगवान् पतञ्जलिस्तु तत्र तत्र कण्ठरवेण लिङ्गस्य प्रातिपदिकार्थत्वं तत्स्वरूपञ्च विस्तरेण निरूपितवान्। तथाहि— "प्रातिपादिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (2·3·46) इति सूत्रे भाष्ये—"अथलिङ्गग्रहणं किमर्थम्"? स्त्री पुमान् नपुंसकमित्यत्रापि यथा-स्यात। नैतदस्ति प्रयोजनम्।

एष एव चात्रास्ति प्रातिपदिकार्थः। इदं तर्हि 'कुमारी, वृक्षः कुण्डमि 'ति' यत्प्रातिपदिक स्त्रियां वर्तते तस्मात् टाबादयो भवन्ति। कस्मिन्नर्थे ? स्वार्थे इति' इति च। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (5·3·74) इति सूत्रे भाष्ये—किञ्च नपुंसकं ? नपुंसकस्य गुणः। कस्य च नपुंसकं गुणः ? प्रातिपदिकस्य' इति। 'कुत्सित' (5·2·74) इति सूत्र-भाष्ये—''अथवा स्वार्थमभिधाय शब्दो निरपेक्षंद्रव्यमाह समवेतम्' इत्युक्तम्।

अत्र कैयटः 'स्वशब्दोऽत्राऽऽत्मीयवचनोऽर्थशब्दोऽभिधेयवचनः। स्वोऽर्थः स्वार्थः। स चानेक प्रकारो जातिगुणक्रियासम्बन्धस्वरूपलक्षणः। यथा गौः शुक्लः षाचको राजपुरुषो डित्थ इति। स्वार्थमभिधाय तेन स्वार्थेन समवेतं द्रव्यमाह शब्दः। निरपेक्ष इत्यनेन (भाष्येण) तद्दर्शयति—यथा द्रव्येऽभिधातव्ये स्वार्थमपेक्षते शब्दो न तथा स्वार्थे भिधातव्येऽर्थगतं निमित्तान्तरमपेक्षते, द्रव्यशब्देनचेदं तदिति सर्वनामपरामर्शयोग्यं वस्त्वभिधीयते। तत्र जातिशब्दो यदाजातो 'वर्तते तदा आरोपितस्वरूपां स्वरूपेणैकीकृतां जातिमाहेति। तथा स्वरूपं स्वार्थः। जातिस्तु द्रव्यम्। यदा तु जातिविशिष्टं द्रव्यमाह तदा जातिः स्वार्थः। शुक्लादयो यदा गुणजातौ वर्तन्ते तदा तेषां स्वरूपंस्वार्थः, जातिस्तु द्रव्यम्। यदा गुणे वर्तन्ते तदा गुणसामान्यं स्वार्थः गुणो द्रव्यम्। यदा द्रव्ये वर्तन्ते तदा गुणः स्वार्थः' इति।

'समवेतस्य लिङ्गं वचनं विभक्तिं च इति भाष्यम्। अस्य आह शब्द इति शेषः। लिङ्गं स्त्रीत्वादि, वचनं संख्या, विभक्तिः कारकम्। यद्यपि लोके पदादुच्चरितात् पदार्था युगपत्प्रतीयन्ते नतु क्रमेण शब्दस्य विरम्य व्यापाराभावात् तथापि शास्त्रसंव्यवहाराय कल्पिताभ्यामन्वव्यतिरेकाभ्यां प्रयोगार्हस्य प्रातिपदिकस्य कल्पितामर्थवत्तां कल्पितन्यायवशात् क्रमवतोमस्तित्येदमुच्यते। क्रमश्चेदृशः— 'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते' इति न्यायात् पूर्वं स्वाथाभिधानेन भाव्यम्, पश्चात्तद्विशिष्टस्य लिङ्गादायस्य द्रव्यस्याभिधानेन। तेतो भेदा पेक्षबहिरङ्गसंख्यापेक्षया लिङ्गमन्तरङ्गमिति तदभिधोयते, ततः संख्या। साहि विजातीयक्रियापेक्ष साधनापेक्षया सजातीयापेक्षान्तरङ्गा। संख्याभिधानानन्तरन्तु कारकाभिधानमिति क्रमेण प्रतीयमानं स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकरूपं पञ्चकं प्रातिपदिकार्थः।

ननु लिङ्गस्य प्रातिपदिकार्थत्वे 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे' प्रथमा (2·3·46) इति सूत्रे लिङ्गग्रहणं व्यर्थम्, प्रातिपदिकार्ये प्रथमाविधानेन लिङ्गस्यापि प्रातिपदिकार्थ तया तत्र प्रथमा सिद्धेरिति चेन्न, तद्वैयर्थ्यापत्याऽत्र सूत्रे नियतोपेस्थितिकस्य प्रवृत्तिनिमित्तं तदाश्रययोर्वा प्रातिपदिकार्थपदेन ग्रहणास्यं ज्ञापनात्।

वस्तु तस्तु 'अर्थेप्रथमा' इति न्यस्यता मनोरमाकृतास्वादीनां प्रातिपदिकादेव विधानेन कस्मार्थे इत्याकाङ्क्षायां यस्मात् स्वादि विधिस्तदर्थ इत्यस्य लाभेन

प्रातिपदिकग्रहणस्य लिङ्गादि ग्रहणस्य च वैयर्थ्यं स्पष्टमेवोक्तम् । सूत्रोपक्रमे संज्ञाविध्येकवाक्यतयाऽव्ययेभ्यः सुपोऽप्राप्त्या तेभ्यः प्रातिपदिग्रहणस्य विधानार्थत्वं वदता 'तद्धितश्चासर्वविभक्ति' (1·1·38) इति सूत्रे 'बहुषु बहुवचनम्' (1·4·21) इति सूत्रे च ज्ञापकादिना प्रकारान्तरेणाव्ययेभ्योविभक्तिं साधयता भाष्यकृताऽपि प्रातिपदिग्रहणं प्रत्याख्यातप्रायम् ।

मुनित्रयाद्यभिमतस्य लिङ्गस्य स्वरूपजिज्ञासायां 'स्त्रियाम्' (4·1·3) इति सूत्रस्थ भाष्यमाश्रित्य किञ्चिदुच्यते । 'स्त्रियाम्' इति सप्तमीनिर्देशेन कार्य्यान्तरविधानायानूद्यते इति गम्यते । प्रसिद्धस्यार्थस्य कार्य्यान्तर विधानायानुवाददर्शनादिह व्याकरणे प्रातिपादिकादिवत् स्त्रियाः परिभाषितत्वाभावाल्लोके चाप्राणिषु खट्वादिषु स्त्रीत्वव्यवहृतेरदर्शनाद् भगवान्भाष्यकार आह.........'स्त्रियाम् इत्युच्यते' का स्त्रीनाम ? लोकत एतेशब्दाः प्रसिद्धाः स्त्री पुमान् नपुंसकमिति । सा स्त्री स पुमान् तन्नपुंसकमिति । किं पुनर्लोके दृष्ट्वैतदध्यवसीयते''' इयं स्त्री, अयं पुमान्, इदं नपुंसकमिति लिङ्गम् । किं पुनस्तत् ? ''स्तनकेशवतीस्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम्'' इति । स्तनकेशवतीत्यत्र भूमादौमतुप् एवं लोमश इत्यत्रापि । स्तनकेशवत्वञ्च प्रसिद्धत्वादन्यस्यापि स्त्रीप्रतिपत्तिहेतोः कुमार्य्यादिगतस्योपलक्षणम्, एवं लोमशत्वमपि पुंविज्ञान हेतुः कुमारादिगतस्योप लक्षणं बोध्यम् । 'उभयोरन्तरम्' इत्यत्रान्तरशब्दः सदृशार्थकः । तथा च तदभावे स्तनकेशवत्व-लोमशत्वोभयोरभावे सति यदभयोरन्तरं सदृशं तन्नपुंसकम् । तेना व्ययाख्यातार्थयोरुभयाभावेऽपि लिङ्गवत्त्वेन सादृश्याभावान्न नपुंषकत्वापत्तिः । इत्युक्त्या मयूरीकुक्कुटादीनां स्त्रीपुंससमुदायानां नपुंसकत्वं निराकृतं वेदितव्यम्, अन्यथा तत्रोभयोरन्तरमित्यनेन नपुंसकत्वापत्तिः । भवति हि समुदायसमुदायिनोरनवयवयोः सदृशइति नपुंसकत्वं स्यात् । यदितु 'परवल्लिङ्गं द्वन्द्व तत्पुरुषयोः' इत्यनुशासनेन समुदाये परलिङ्ग कत्वारोपान्न नपुंसकत्वप्रसवितरत्रेत्युच्यते, वस्तुस्वरूपनिरूपणापरमेवैतद्वगन्तव्यम् ।

ततः परं 'स्तनकेशवती' इति लक्षणे दूषणान्याह भाष्याकारः—'लिङ्गात् स्त्रीपुंसयोर्ज्ञाने सति भ्रकुंसे टाप् प्राप्नोति । यदि लोके दृष्ट्वा एतद्ध्यवसीयते इयं स्त्री, अस्ति तद् भ्रूकुसे । इह च चाःपश्य, वर्ध्रिकाः पश्य, खरकुटीः पश्येति तस्माच्छसो नः पुंसि' (6·1·103) बतिनत्वं प्राप्नोति । यद्धि लोके दृस्ट्वैतद ध्यवसीयते अयं पुमान् इति, अस्ति तद्वर्धिकादिषु इतिभाष्यम् । ननु स्तनकेशवतीस्त्री' इति लक्षणे नित्यपयोगो मतुब् विज्ञानाद् भ्रकुंसे तदभावात् स्त्रीत्वाभाव इति चेन्न, प्रनिपत्तृणां नित्यलिङ्गदर्शनेन तत्रापि स्त्रीत्वप्रसक्तेः सत्वात्, केशवपनेव तदानीं केशसम्बन्धा भावात स्त्रियामपि तदभाव प्रसङ्गाच्च । स्तनकेशवतीत्यत्राति

शये मतुवित्यपि न, तदतिशयसम्बन्धस्य कुमार्य्यामुत्तरकाल भावित्वात्ततः प्राक् स्त्रीत्वाभावापत्तेः।

किञ्च खरकुटी नापितगृहम्, च चा, केशनिर्मितपुमान्, वध्रिका केशमयी रज्जुः एतेभ्यो: बहुकेशवत्वरूप सादृश्यादिवार्थे कनितस्यलुपि तत्र मनुष्यवाच्यत्व सत्वेन पुंस्त्वात् खरकुटी- पश्य, च चापश्य, वधिकाः पश्य इत्यादौ 'तस्माच्छसो नः पुंसि' (6·1·103) इति नत्वापतेश्च 'स्तनकेशवतीस्त्री' इति लिङ्गविषयकं दर्शन हेयमेव।

अपि च, तद्दर्शने खट्वा-वृक्षादिषु लिङ्गं न सिध्येदुक्त लक्षणाभावात्। यद्धि लोके दृष्ट्वैतध्यवसीयते इयं स्त्री अयं पुमान्" इति, न तत् खट्वावृक्षयो-रूपलभ्यते। पूर्वोक्तदर्शने तयोः 'उभयोरन्तरं यत्र तदभावे नपुंसकम्' इत्युक्त्या नपुंसकत्वापत्तिः।

यद्वा खट्वायां स्त्रीत्वम्, वृक्षेपुंस्त्वं चासदेव भासते। कथं पुनरसन्नाम लिङ्गं द्रष्टुं शक्यम ? मृगतृष्णावत्। तद्यथा मृगास्तृषिताअपां धाराः पश्यन्ति। न च ताः सन्ति। मृगतृष्णाविषयांमरुमारीचिका यथा सत्येन जलरूपेण भासते, तथा खट्वा वृक्षावसता स्त्रीपुंसत्वेन भासेते। ननु मरीचिदर्शन सादृश्यात्तत्रपूर्वानुभूतं जलं स्मृतिपथमेतीत्युच्यते यदि, तदा भाष्यकार आह—गन्धर्वनगरं यथा इति यथा गन्धर्वनगरं दूरतो दृश्यते, उपसृत्यञ्च नोपलभ्यते, तद्वत् खट्वा वृक्षयो-र्लिङ्गसद्द्रष्टव्यम्। नहि गन्धर्वनगरमन्तरिक्षे केनचित्कदाचिदप्युपलब्धं येन तत्रापि स्मर्यत इति वक्तुं शक्यम्, अनुभूतस्यैवोद्बोधकशात् स्मृतिविषयत्वस्य सर्वानुभवसिद्धत्वात्।

सम्प्रति खट्वा वृक्षयोः सती एव स्त्री पुंस्त्वे कारणान्तरवशा-ज्ज्ञानं विषयतां नोपयात इति पक्षान्तरमादाय भाष्यकृता विविच्यते—

'आदित्यगतिवत् सन्न' इति। अथवा आदित्यगतिः सत्यपि नोपलभ्यते। तद्वत् खट्वा वृक्षोर्लिङ्गं सदपि नोपलभ्यते। आदित्यगतेः सत्तानुमानादिना सिद्धापि प्रत्यक्षप्रमाणविषयतां नावगाहते, किन्तु देशान्तरप्राप्त्यादिनानुमीयते। तथा खट्वावृक्षयोः तदपि लिङ्गं सूक्ष्मत्वात् प्रत्यक्षप्रमाणेनाशक्यदर्शनम्। बीजगत वट वृक्ष वत्। किन्तु शास्त्रीयतत्कार्यरूपहेतुनानुमीयते धूमाद्वह्नि रिव।

**पक्षान्तरं भाष्ये**—'वस्त्रान्तर्हितवच्चतत्, इति। यथा वस्त्रान्तर्हितानि द्रव्याणि न दृश्यन्ते, तद्वत् खट्वावृक्षयोः सदपिलिङ्गं नोपलभ्ते। खट्वावृक्षयोः पुनर्येप्येते रथकारा वाशी (वसिला) वृक्षादन (कुठार) हस्तामूलात्प्रभृति अग्राद्

वृक्षोस्तक्ष्णुण्वन्ति तेऽपि तयोर्लिङ्ग नोपलभ्यन्ते । केनैतद व्यवसीयते खट्वावृक्षयोः सल्लिङ्ग नोपलभ्यत इति ।

षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति । (1) अतिसन्निकर्षात्, (2) अतिविप्रकर्षात्,(3) मूर्तान्तरव्यवधानात्, (4) तमसावृतत्वात् (5) इन्द्रियेदौर्बल्यात् (6) अतिप्रमादादिति । अतिसन्निकर्षाद्यथा—स्वचक्षुर्गतस्या जनादेः । अतिविप्रकर्षाद्यथा-उड्डीनस्य शकुनेः । मूर्तान्तरव्यवधानाद्यथा-कुड्यादि व्यवहितस्य सुवर्णादेः । अन्ध कारावृतत्वाद्यथा - अन्धकाराक्रान्तस्य धटादे : । इद्रिय दौर्बल्याद्यथा । तिमिराद्युपघाते सति चक्षुरादेः । अतिप्रमादाद्यथा । प्रमादो नवधानता विषयान्तरसक्तचिन्तोहि सन्निकृष्टमप्यर्थं नोपलभते ।

ननु भाष्यकृताऽतः पूर्वम् "आदित्यगति वत्सन्न" इत्यनेन "सौदम्यात् खट्वावृक्षयोर्लिङ्ग नोपलभ्यते "इत्युक्तम् । तेनानुपलब्धौ सूक्ष्मत्वमपि कारणमभ्युपेतम् । तस्य चात्र परिगणनं न कृतमिति न्यूनतेति चेन्न, सूक्ष्मत्वस्येन्द्रियदौर्बल्येन संगृहीतत्वात् । अतएव प्रबलेन्द्रिया दिव्यदृशोमहर्षयः सूक्ष्ममप्यर्थमुपलमन्ते । ननु समानाभिहारोऽप्यनुपलब्धौ हेतुस्तद्यथाभाषराशौ प्रक्षिप्तोमाषः पृथङ्क्नं पलभ्यते । एवमभिभवोऽपितद्यथा सौरैभिर्भाभिरभिभूतानि नक्षत्राणि दिवानेपलभ्यन्से । प्रकृतेएतयोरष्यनुक्त्या न्यूनतादोषस्तदवस्थ एवेति चेन्न, इन्द्रियदौर्बल्ते एवैनयोरप्यन्तर्भावात् ।

पुनर्भाष्यकृता शङ्कित्—'केनेतद्व्यवसीयते खट्वा वृक्षयोः सलिङ्ग नोपलभ्यत इति ? तयोस्तु तत्कृतं दृष्ट्वा : 'स्त्रीकृतं टाबादिकं शब्दं दृष्ट्वा स्त्रीत्यध्यवसीयते । पुंस्कृतं शब्दं दृष्ट्वापुमानिति, इति भाष्यम् । अयं भावः—खट्वारूपोऽर्थः स्त्रीत्वविशिष्ट स्तदर्थकं कार्यस्य टाबादेः, स्वधटितशब्दवाच्यत्वसम्बन्धेनार्थे दर्शनात्, एवं वृक्षरूपोऽर्थः पुंस्त्वविशिष्टः, 'वृक्षान्' इत्यत्र पुंस्त्वार्थद्योतक नकारादेशरूपकार्यस्य स्वघटितप्रत्ययप्रकृतिवाच्यत्व संसर्गेणार्थे दर्शनात् । दर्शनं चात्र ज्ञानविशेषो न तु चाक्षुषम् । साध्यतावसदेकबंन्धश्च यदि लिङ्ग गुणस्तदा समवायः । यद्युपाधिरूप तदा स्वरूपसम्बन्धः । हेतुतावच्छेदकसंसर्गश्च

---

1. तथाचाह—ईश्वरकृष्ण :—

"अतिदूरात् सामीप्यादिन्द्रियघातान्मनों नवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ।।i' 7

"सौक्ष्म्यात्तदनुरपलब्धिर्नाभावाद् कार्य तस्तदुपलब्धिः ।
महदादि तच्च कार्यं प्रकृति स्वरूपं विरूपं च ।।" 8

—सांख्यकारिका, 7/8

विषयतारूपः । एवमुक्तानुमित्या खट्वावृक्षयोर्लिङ्गं प्रतीतिविषयतामवगाहते। अत्रानुमितौ दृष्टान्तरूपेण भाष्यकृताभिहितम्—'यथा आकाशेन ज्योतिषः। तद्यथा आकाशं दृष्ट्वा ज्योतिरत्रेत्यवगम्यते' इति। अत्राकाशते प्रकाशते इत्याकाशः प्रकाशः। तेन यथा मेघान्तरितंज्योतिरनुमीयते तथा लिङ्गमनुमीयत इत्याकूतम्।

अत्र भाष्यम्—'ज्योतिर्निमित्तंह्याकाशम्। अन्योन्याश्रयत्वे तद् भवति। स्वीकृतः शब्दः इति । अत्र ज्योतिष्प्रकाशयोरन्योन्याश्रयत्वञ्च प्रत्येक्षेणकार्य्यकारणभावावगमात् ।

भवतु कार्य्येण कारणानुमानम्। खट्वादिषु तु लिङ्गस्य कदाचिदप्यग्रहणान्न तेन कार्य्यकारणभावः कल्पयितुं शक्यः। अत्र लिङ्गावगमात् टाबादिशब्दप्रयोगः, टाबादिशब्द-प्रयोगाच्च लिङ्गावगतिरित्यन्योन्याश्रयः। युदक्तं पूर्वम् 'आदित्यगतिवत् तदपि नोपलभ्यते' इतितद् दूषयितुमाह भाष्यकृत—'प्रत्यक्षेण विरुध्यते। प्रत्यक्षेण सन्नपिसविरुध्यते । ये आह खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यत इति । सच स्वेन्द्रियविरोध-कृतो भवति। नचस्वेन्द्रियविरोधिना भवितव्यम् इति। लिङ्गस्वरूपेण विविच्यतो यः खट्वादिविषयस्तन्मात्र विषयकेण लिङ्गाभाव- निश्चयकारिणा चाक्षुष प्रत्यक्षेण खट्वादिषु लिङ्ग सद्भावो विरुध्यत इति भावः। नहिशक्यतेवक्तुं भिक्षुगृहं गजवद् देशत्वाद्गजशालावत्प्रत्यक्षेणचक्षुषेन्द्रियदौर्बल्यान्नोपलभ्यत इति।

लौकिकलिङ्गवत्तायाजडेषु स्वीकारे दोषान्तरमपि तत्रैवोक्तम्—'तटे च सर्वलिङ्गकार्य्याणि दृष्ट्वा तटस्तटींतटमिति कस्तदध्यवसातुमर्हति—इयं स्त्री, अयं पुमान्, इदं नपुंसकमिति' इति। एकस्मिन् द्रव्ये सर्वलिङ्गासम्भवः। स्त्रीपुंसत्वासम्भवः "तद्भावे नपुंसकम्" इत्युक्तेः । तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्यम् च कश्चित् स्वकृतान्त आस्थेयः। कोऽसौकृतान्तः संस्त्यान प्रसवौ लिङ्गमास्थेयौ इति स्वकृतान्तः । किमिदं संस्त्यानप्रसवादिति ? संस्त्याने (संघाते) स्त्यायतेर्डट् स्त्री। सूतेः सप् प्रसवे पुमानितीत्युक्तं भाष्यकृता। अत्र 'सूतेःसप्' इति भाष्यस्य षूङ्प्राणिगर्भ विमोचने इत्यत औणादिकः सन्प्रत्ययो ह्रस्वश्च बाहुलकात् धातोः सस्य पकारादेशश्चेत्यर्थः। तेन पुमान् सिध्यति उणादौ 'पातेर्डुमसुन्' पुमान् इत्युक्तम्, तदेतद् भाष्य विरुद्धम्।

ननु लोकेऽपिस्त्यायतेरेव स्त्री सूतेः सप् प्रसवेपुमान्' इति। अधिकरण साधनालोके स्त्री, स्त्यायति गर्भोऽस्यमिति। इह पुनरुभयं भावसाधनम्। संस्त्यानं स्त्रीप्रवृत्तिश्च पुमान्' इतिभाष्यम्। अत्र सस्त्यानं तिरोभावः प्रवृत्तिश्चाबिर्भावः। 'कस्य पुनः संस्त्यानं स्त्री, प्रवृत्तिर्वा पुमान् ? गुणानाम, केषाम् ? शब्दस्पर्शारूपरसगन्धानाम्' इत्युक्तं पतञ्जलिनाभगवता । अयं भावः—संस्त्यानं तिरोभवः। प्रवृत्तिराविर्भावः। साम्यावस्था गुणानां स्थितिः। एतश्चावस्थाः शब्दगोचरा एव

गुणाः सत्वरजस्तमांसि । तत्परिणाम रूपाः शब्दादयः पञ्च गुणास्तदात्मका एव । तत्संघात् रूपश्च घटादि, नतु तद्व्यक्तिरिक्तावपि द्रव्यस्तीति सांख्यसिद्धान्तः । सत्वादीनामनारब्धकार्याणां सूक्ष्मावस्थाविशिष्टानामतप्रक्षत्वाच्छब्दव्यवहारागोच रत्वाद् भाष्ये तत्परिणामरूपा लोकप्रसिद्धाः शब्दादय उक्ताः । 'सर्वाश्चपुनर्भूर्तय-एवमात्मिकाः संस्त्यानप्रसव-गुणाः शब्दस्पर्शरूपरसगन्धवत्यः । यत्राल्पीयांसो गुणास्तत्राप्यवरतस्त्रयः शब्दो रूपं स्पर्श इति' इति भाष्यम् ।

नन्वाकाशं शब्दगुणकमेववायुरपि स्पर्शमात्रैकगुणस्तर्हि यत्राल्पीयांसो गुणास्तत्राप्यवरस्त्रयो गुणाः' इत्यनुपपन्नमिति चेन्न, सम्पिण्डितस्वाभावनां चक्षुर्गोचराणामेव मूर्तिशब्देनात्रविवक्षितत्वात्ः वाय्याकाशयोश्चातथात्वात् । अतः परम् रसगन्धो न सर्वत्र, प्रवृत्तिः स्वत्वपि नित्याः । नह्यंह कश्चिदपि स्वस्मिन्नवतिष्ठते वा । यावदनेन वद्धिरव्यपायेन न वा युज्यते । 'तच्चोभय सर्वत्र' इति भाष्यम् । "तच्चोभयं सर्वत्र' इत्यस्य सत्वादीनांगुणामाविर्भावतिरोभावरूपः परिणामः प्रवृत्तिपद वाच्यः सर्वत्र पदार्थमात्रे इत्यर्थः । पुरुषो यद्यप्यपरिणामी तथापि भोक्तृत्वात् प्रकृति-धर्मापन्नत्वेन भानात् यात्किञ्चिद्धर्मिष्ठितात्यन्ता भावाप्रतियोगित्वरूपकेवलान्वयित्वस्य पुंस्त्वादीनां स्वीकारेणपुरुषस्य निर्धमकतया केवलान्वयित्वाक्षतेश्च । शब्दादि संघातरूपाश्च सर्वामूर्तमः प्रतिक्षण परिणाम स्वभावाः । एवं शब्दादयः आकाशादयो घटादयश्च ।

ननु चादयो सत्वे' (1-4-57) इति सूत्रेणाद्रव्यार्थाश्चादय इत्युच्यते । अत्र सत्वपदेन लिङ्गसंख्या नान्वितं द्रव्यमुच्यते । लिङ्गसंख्यानन्वितार्थकाश्च चादयो निपाता इति लिङ्गस्योक्तकेवलान्वयित्वं नोपपद्यत इति चेन्न, निपातानां लिङ्ग-संख्यानन्तिार्थवाचकत्वेऽपि तदर्थे लिङ्गसंख्याभावस्य वक्तुमशक्यत्वात् । अतएव—

सदृशंत्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु सर्वेषु यन्न व्येति तदव्ययम् ॥ इति ।

'तद्धितश्चासर्व विभक्तिः' (1-1-38) इति सूत्रे भाष्योक्तिः संगच्छते । लिङ्गत्रयविशिष्टेष्वर्थेष्वव्ययरूपं न भिद्यत इति तदर्थः तदुक्तु मभियुक्ते न—

"आविर्भावतिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मामूर्तिषु सर्वासु लिङ्त्वे नानुदर्शिताः ॥"

"सर्वमूर्त्यात्मभूतानां शब्दादीनां गणे-गणे ।
त्रयः सत्वास्तधर्मास्ते सर्वत्र समव स्थिताः ॥"

"वत्रथितोदकवच्चैषामनवस्थिताः वृत्तिताः ।
अनवास्थितभावनां भाष्य एवोपवर्णिताः ॥"

"रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणम् ।
काचित् प्रलीयते काचित् कथचिदभिवर्धते ॥"[2]

"प्रवृत्तिमन्तः सर्वेहि तिसृभिश्च प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः ॥[3]

"अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते ।
प्रतिबिम्बकधर्मेण मन्तद्वाचो निबन्धनम् ॥"[1]

"पश्चात् प्रवृत्तिधर्मार्थश्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तिर्विप्लवगाशया ॥"[1]

"सामान्यमपि गोत्वादि व्यक्तेरव्यतिरेकतः ।
प्रवृत्तिधर्मः तद्द्वारा शशशृङ्गादिवेक्षितुः ॥"[2]

"तस्मादुक्त पदार्थस्य सम्भवाल्लिङ्ग योगिता ।
प्रवृत्तेरपि विद्यन्ते तिस्रो ह्येताः प्रवृत्तयः ॥
पुंनपुसकता स्त्रीत्वं तेन स्यादन्य लिङ्गता इति ।

तदेवं सर्वपदार्थव्यापिन्य उपचयापचयान्तरावास्था स्त्रीणि लिङ्गानि । एवं च नक्षत्रे तारकास्तिष्यः कुमार्य्यर्थो वस्तु इत्येकस्याप्यर्थस्य नानालिङ्गयोग उपपद्यते । आविर्भावादित्रयस्याप्येकस्मिन्नर्थे सर्वथा सम्भवात् शशविषाणादावप्युत्तरपदार्थसद्भावात्तद्द्वारको लिङ्गयोगः बोद्धशशविषाणमादाय वा लिङ्गवत्वम् । एवमेव वन्ध्यासुतादावि बोध्यम् ।

नचैवं गुणानामुपचयापचयस्थितिस्वरूपाण्येव यदि लिङ्गानि तदा तेषां सर्वत्र सत्वात् सर्वेषां शब्दानां सर्वलिङ्गता प्रसङ्ग इति वाच्यम्, यदर्थवाचकः शब्दस्तदर्थेयावन्तिलिङ्गानि तावल्लिङ्गभाक्' शब्द इति नियमाभावेन यल्लिङ्ग स्वस्वशक्ति स्वभावादाह' शब्दस्तेन लिङ्गेन तदर्थे सता भवितव्यम्" इत्येव नियमात् । तथा च सर्वत्र सर्वलिङ्गसत्वेऽपिशब्दशक्ति स्वभावात् कश्चिदेक मेव लिङ्गं कश्चिल्लिङ्गत्रयं प्रतिपादयतीति न सर्वेषां सवलिङ्गता प्रसङ्गः । अतएव कुमार्य्यादावियंव्यक्तिः, अयंपदार्थः इदंवस्तु इति प्रयोगदर्शनेन लिङ्गत्रयसत्तायाः सत्वेऽपि कुमारीशब्दः स्त्रीत्वमेवाभिधन्तेनान्यत् । तदुक्तं भाष्यकृता—'यद्युभयंसर्वत्र कुतो व्यवस्था ? विवक्षातः । संस्त्यान (अपचय) विवक्षायां स्त्री । प्रसव (उपचय) विवक्षायां पुमान उभया स्थिति विवक्षायां नपुंसकमितिय था लक्षार्थो तथा युवा कृष्ण इत्यत्र तक्षादि शब्दानामेकार्थपर्य्यवसानमपि व्यवस्थित एवार्थोऽभिधीयतैः तथा लिङ्गेष्वपिद्रष्टव्यम् । तदुक्त हरिणा—

सन्निधाने पदार्थानां किञ्चिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा "इति ।

ननूपचीयते कुमारीत्यत्रोपचयस्येवाविभावेन "कुमारी' इति स्त्रीत्वमनूपपन्नमिति चेन्न, कुमारी शब्दः स्वमहिम्नाऽपचयमेवाह, शब्दान्तरयोगान्तुधर्मान्तरस्यापचयस्य प्रतीतेः । एवं क्षीयते वृक्षःक्षीयते ज्ञानमित्यादावपि बोध्यम् ।

ननुलिङ्गत्रयस्य व्यापित्वेऽपि प्रत्यक्ष प्रमाणगोचरतया तत्तच्छब्दे तत्तल्लिङ्ग प्रतिपादनशक्तिरप्रत्यक्षेति तत्तल्लिङ्गबोधनमध्य सम्भयतीति चेन्न, शिष्ट लोककृतलिङ्गानुशासनत एवतत्तच्छब्दनिष्ठ लिङ्गनिरूपित शक्ततैरप्यवगन्तव्यत्वात् । तदुक्तं भाष्यकृता—'तस्योक्तौवचने लोकतो नामैतद्भवति स्त्री पुमान् नपुंसकमिति' 'एकार्थेलिङ्गान्यत्वाद्' इति, लिङ्गमशिष्यं ल्लोकाशृयत्वाल्लिङ्गस्य" इति । दृष्टं 'लिङ्गान्यत्वमवयवाच्य' इति च चकस्मिन्नेवार्थे संस्त्यानादि सद्भावात् पुष्यः तारकानक्षत्रमिति । अवयवान्यत्वात् कुटी कुटीरः ।

रैफस्यावयवस्योपजनने लिङ्गभेदो दृष्टः । स्त्रीत्वं स्त्रीता, पुंस्त्वंपुंस्ता इत्यादि शिष्टप्रयोगदर्शनात् संस्त्यानादेरपि प्रवृत्तिलक्षणलिङ्गयोगः । किञ्च" गुणवचनानांहि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । तद्यथा—शुक्लं वस्त्रम्, शुक्लाशाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाःकम्बला इति यदसौ द्रव्याश्रितो भवति गुणस्तस्य यल्लिङ्गवचनञ्चतद्गुणस्थापि भवति । एवमिहापि यददो द्रव्य श्रितं भवति स्त्रीत्व गुणस्तस्य यल्लिङ्ग वचनं च तत्स्त्रीत्वस्यापि भविष्यति इति भाष्येण स्त्रीत्वादीनां गुणत्वसिद्धया आश्रयतोलिङ्गवचनं न्यायादनपेतमेव ॥

नागेशभट्टा अपि प्रवृत्तिविषये स्वारास्यभाष्यकृद्भिप्रेतमेवाद्रियन्ते । "स्तनकेशवती स्त्रीस्याल्लोमशः पुरुषः स्मृतः" इत्यादि लौकिक लिङ्गसम्भवे तद्विशिष्टएव लौकिक शास्त्रीयं च वाच्यम् प्रत्यक्षप्रमाणस्य बलवत्वेन तत्यागे मानाभावात् । अतएव 'पशुनायजेत' इत्यनेन लौकिकलिङ्ग समानाधिकरणशास्त्रीयस्यैव शब्दसंस्कारकत्वेन न केवलशास्त्रीयपुंस्त्वविशिष्ट्यास्त्रिय । यागः ।[1]

वृत्तिकारस्तु हार्लिकपर्यन्तानां 'लौकिकानां' सत्वादिगुणानामुपचयस्थितिरूपलिङ्गस्यप्रक्षिपत्तेरभावाल्लौकिकानुगुणं 'पक्ष' दर्शयन्ति—तथाहि—'स्त्रयाम्' (4.1.2) इत्युच्यते केयं स्त्री नाम ? सामान्य विशेषाः स्त्रीत्वादयो गोत्पादय इव बहुप्रकारा व्यक्तयः क्वचिदाश्रयविशेषाभावादुपदेशगम्या एवं भवन्ति, यथा ब्राह्मण-

1. ल० श० शे०, स्त्रीप्रत्यय प्र० ।

स्त्रादय इत्याहुः। अयं भावः सामान्य विशेषाः (जातिविशेषाः) स्त्रीत्वादयः। तदुक्तमभियुक्तेन—

"तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥"

"हस्तन्यां वडवायाञ्च स्त्रीत्व बुद्धेः समन्वयः।
अतस्तां जातिमिच्छन्ति द्रव्यादि समवायिनीम् इति ॥

अन्येषां त्रयाणामपि सामान्यविशेषाणां सर्वार्थेषु। सद्भावोऽभ्युपगन्तव्यः, नतु गोत्वादिवत् कतिपयेष्वेवार्थेषु। अन्यथा एकस्मिन्नेवार्थे व्यक्ति-वस्त्वादि—शब्दानां भिन्न लिङ्गानां सर्वानुभूतानां प्रतीत्यनुपपत्तिरिति चेन्न, व्यज्यन्ते जाति-विशेषाः स्त्रीत्वादय आभिसितव्यक्त्यआश्रयाः, पुंस्त्वादि जाति व्यञ्जकमाश्रयाणां नानाविधत्वात् कश्चिदाश्रयः कस्याचित्सामान्य विशेषस्य व्यञ्जको न सर्वस्येत्य-भ्युपगमात्। तत्र चेतनेषु स्तनादिमती व्यक्तिः स्त्रीत्वस्याभिव्यञ्जिका, लोम-शत्वादिमतोपुंस्त्वस्य, उभमव्यञ्जना नपुंसकत्वस्य। अचेतनेषु कथम्? नहि तत्र किञ्चिल्लिङ्गं व्यज्यते। तथा चेतनेऽप्येकस्मिन् अर्था-व्यक्ति-वस्त्वादिशब्दानां भिन्न लिङ्गानामनुपपत्तिः, पुलिङ्गस्य दारशब्दस्य स्त्रियायनुपपत्तिरिति चेन्न, क्वचिदा-श्रयविशेषाभावादुपदेशव्यङ्ग्या एव ता जातयो ब्राह्मणत्वादिवत्, ब्राह्मणक्षत्रियादि-व्यक्तोनामत्यन्तसादृश्यादुपदेशादेव ब्राह्मणत्वादीनां यथाभिव्यक्तिः। नहि खलु पुरोऽवस्थितयोरपि ब्राह्मणक्षत्रिययोरूपदेशात् प्राक् क्षत्रियोऽयं ब्राह्मणोऽयमिति प्रत्यय उदेति। शशविषाणादावप्युत्तर पदार्थ द्वारकः सामान्य योगः। ननु स्त्रीत्व स्त्रीता, पुंस्त्वं पुंस्ता जातिः। तत्र कथं लिङ्गरूप जातिप्रतोतिरिति चेन्न, वैया-करणनये गोत्वादौ सत्तासामान्यस्येव सामान्येऽपि सामान्यसद्भावस्वीकारात्। नहि अस्माकं वैशेषिकाणामिव 'निःसामान्यानि' इति मतम्।

यद्यपि मोमांसकैः 'पशुनायजेत' इत्यादिवाक्यमुपजोव्य पुंस्त्वं विवक्षितं न वेत्युपक्रम्य 'पशुनायजेत' इति....वाक्यान्तर्गतः पशुशब्दो नाभावेन पुंस्त्वबोधनात् स्त्रियां नास्तोति हेतौर्नछागयादोन् यज्ञाङ्गत्वेन प्रयोजयति। अतो लौकिक पुंस्त्व विशिष्ट पशु करणकयागस्यैवेष्टसाधनत्वं नान्यस्य। नच नित्यपुंलिङ्ग पदार्थ यथा लौकिक लिङ्गानादरेण पुंस्त्व-स्त्रीत्व-नपुंसकत्वान्यतधर्मावच्छिन्नबोधक स्तथा नित्यपुंलिङ्गः पशुशब्दोऽपि लौकिकलिङ्गानादरेण स्त्रीत्वविशिष्टं पशुमपि बोधयेदिति छाग्याअपि यागाङ्गत्वं स्यादिति वाच्यम्, सर्वार्थाभिधायापि नित्यलिङ्गकशब्दस्यैव लौकिकलिङ्गानादरेण शिष्टप्रयोग दर्शनादुक्तदोषा-प्रसङ्गात्।

वस्तु तस्तु 'पश्वा न तायुं गुहा चरन्तम्' (ऋग्वेदे 1. म० 12 अनुवा० 15 सू०) इति वेदे स्त्रियां प्रयोगदर्शनेन पशुशब्दस्य नित्यपुंस्त्वं दुर्निरूप्यम् । (छागो वा मान्त्रवर्णात्' (मो० 6. आ० 8. पा० 31 सू०) इत्यत्रापि लिङ्गविवक्षादर्शनाल्लिङ्गस्य नामार्थत्वं मीमांसकाभिप्रेतमित्यत्र नास्ति विचिकित्सा ।

'व्यक्त्याकृति जातयः पदार्थ' इति सूत्रयता भगवता गौतमेन, न्यायसूत्र भाष्यकृता वात्स्यायनेन, वैशेषिकसूत्रकृता महर्षिणा कणादेन, वैशेषिकसूत्रोपरकार कृता श्री शङ्करमिश्रेण च सर्वभाषाप्रसिद्धपुंस्त्वादिलिङ्गविषयः सर्वथोपोक्षितः । पदार्थमात्र विचारपराणामेषां तदुपेक्षायां कारण मन्वेषणविषयमान्मयति । गौतम सूत्रे जातिपदस्य धर्ममात्र परत्वमपि न पुंस्त्वादि विषयक तत्वातत्वविवेक पद्धतित्रुटिं परिमार्ष्टि ।

किञ्च तन्मते पुंस्त्यादीनां कुत्रान्तर्भाव इत्यपि दुर्वचनम् । यद्यपि नव्यनैयायिकशिरोमणिना गदाधरभट्टाचार्येण लिङ्गानिरूपण प्रकरणे "टाबादयः क्वचित् स्त्रीत्वं प्रकृत्यर्थविशेषणतया बोधयन्ति । अजा ब्रह्माणी गौरीत्यादौ योनिमत्वम् । नव स्त्रीपरपदात् साधुत्वार्थष्टाबादिर्न तु स्त्रीत्वं तदर्थः क्वचित् स्त्रीत्वबोधश्च स्त्रीप्रत्ययप्रकृतितात्पर्य-विषयत्वरूपलिङ्गजएवेति वाच्यम्, खट्वादौ व्यभिचारेण तादृशहेतोः स्त्रीत्वासाधकत्वात् । प्राणित्वेन विशेषणत्वेऽपि 'इन्द्रो देवता' इत्यादौ व्यभिचारात् ।

वस्तु तस्तु अजवत्यपि देशेऽजा नास्तीत्यादि प्रयोगदर्शनात् स्त्रीत्वस्य नञार्थान्वयिताऽवच्छेदकतया भानमावश्यकम्, अन्यथापुंसाधारणजाति विशेषावच्छिन्नाभावस्य बाधेन तादृशप्रयोगस्य प्रामाण्यानुपपत्तेः । नच प्रातिपदिकार्थ एव स्त्रीत्वं द्योतकाश्च स्त्रीप्रत्यया इति वाच्यम् लिङ्गस्य प्रातिपदिकार्थत्वमावश्यक, नात्र ब्राह्मणोऽपि तु ब्राह्मणीत्यादौ पुंस्त्वबोधकपदान्तराभावेन तद् बोधानुपपत्तेः ब्राह्मणादि पदाच्च जात्यादेर्द्वयस्य च मानं नियतमेव । लिङ्गभानं तात्पर्ययोग्यताधीन क्वाचित्कम्, ब्राह्मणीत्यादौ पुंस्त्वाद्यबोधादिति वाच्यम् उक्तयुक्त्वा पुंस्त्वस्य प्रातिपदिकार्थत्वेऽप्यनन्तानां प्रातिपदिकपदानां स्त्रीत्वार्थकत्वे गौरवाल्लाघवेनाल्पीयसां स्त्रीप्रत्ययानांस्त्रीत्वार्थकत्वकल्पनाया एवौचित्यात् । योनिमत्व रूप स्त्रीत्वस्य खट्वा देवतापदे च स्त्रीप्रत्यया न बोधकाः, किन्तु शावुत्व सम्पादका एव तत्र योनिमत्वरूप स्त्रीत्वस्या योग्यतयाऽनन्वयात् एतन्मते स्त्रीत्वस्य प्रत्ययार्थत्वे स्त्रीप्रत्ययरहिते गोर्वागाहौ शब्दे न भानं लिङ्गस्य, नात जन्मोपस्थितेरभावाद्योनिमत्वरूप लिङ्गस्यो भावाच्च । "यूस्त्र्याख्यो नदी" (1·4·2) इत्यादौ स्त्र्याख्य पदं स्त्रीलिङ्ग शब्दपरम् । तेनाऽव्यादिशब्दानां स्त्रीत्व विशिष्टाबोधकत्वेपि न नदी संज्ञानुपपत्तिः । नचैवं सेनान्ये इत्यादावपि नदी संज्ञा स्यात्, सेनान्यांदि-

शब्दस्य विशेष्यनिघ्नतया स्त्रीत्वादिति वाच्यम्, प्रयोगनुसारेण विशेष्यानधीनायाः स्त्रीलिङ्.गताया ग्रहणात् । तथा च 'स्वमोर्नपुंसकात्' (7·1·22) 'तस्माच्छो नः पुंसि' इत्यादौ कागतिरिति तएव प्रष्टव्याः । लिङ्.गस्य शब्दगत्व स्वीकारे 'पशुनायजेत' इत्यादौ स्त्रियायोगो दुर्वारः स्यात् । किञ्च शब्दगतलिङ्.गस्य स्वरूपं दुर्निरूपं स्यात् । तस्माद् भाष्योक्तं 'गुणानामुपचयापचयिस्थतिरूपं केवलान्वयि पुंस्त्वस्त्रीत्व नपुंसकत्वात्मकं लिङ्.ग सर्वैग्राह्य ।

**पुंलिङ्.गशब्दादेर्विग्रहः—**

अथ पुलिङ्.गोघटशब्दः" इत्यत्र पुलिङ्.ग इति बह्वी हे' को विग्रहः? न तावत् पुमान् लिङ्.गं यस्य स इति, पुंस्त्वादिरूपे लिङ्.गपदार्थे पुंस्त्वविशिष्टार्थाभेदस्यबाधितत्वात् । नापि पुंशब्दस्य धर्मपरत्वमङ्.गोकृत्य पुमान् नाम पुंस्त्वं लिङ्.गं यस्येति विग्रहः कर्तुं शक्यः', षष्ठ्यर्थबहुव्रीहे स्वस्वामिभावाधाराधेयभावादि कतिपय नियत सम्बन्धैनैव सम्बन्धिनोऽन्यपदार्थस्यबोधने सामर्थ्यात्; वाचकत्व सम्बन्धेन सम्बन्धिनमन्त्रपदार्थं बोधयितुमसामर्थ्यात् । अत एव कृष्णकलसशब्दो नील घट इति न प्रयोगः, नीलोघटो यस्येति विग्रहेनीलघट रूप बहुव्रीहेर्नीलघटार्थ क इति बोधाजननात् ।

**अत्रायं प्रपञ्चः**—अनेकमन्येति बहुव्रीहिविषयेऽयं नियमः स्वलौकिकविग्रहभूतं यद्वाक्यं स्वधटकया यं येन यस्मै यस्मात् यस्य यस्मिन्निति द्वितोयादिविभक्त्या स्वटकैप्रथमान्तपदार्थान्वयियदपरपदार्थानुयोगिकंयं सम्बन्धं प्रतिपादयितुमोष्टे तत्प्रतियोगिकतत्सम्बन्धवत्यन्यपदार्थे बहुव्रीहिर्भवतीति । तद्यथा पीताम्बर इति बहुव्रीहेः पीतम्बरं यस्य स इति लौकिक विग्रहवाक्यम्, तच्च स्वघटकयस्येति षष्ठ्या स्वघटक पीतमिति प्रथमान्तपदाथान्वय्यम्बरमिति प्रथमान्तपदार्थानुयोगिकं संयोगसम्बन्धं बोधयितुं शक्नोति । अतोऽम्बर पदार्थप्रतियोगिकसंयोगसम्बन्ध इति हरावन्य पदार्थे बहुव्रीहिर्जीयते पीताम्बर इति ।

एवं चित्रोगौर्यस्येति लौकिकविग्रहवाक्यं स्वघटकयस्येति षष्ठ्या चित्रान्वयि गवानुयोगिकं स्वस्वामिभावरूपं सम्बन्धं बोधयितुमोष्टे । अतो गोप्रतियोगिक तत्सम्बन्धवति चैत्ररूपेऽन्यपदार्थे चित्रगुरिति भवति बहुव्रोहिः ।

एवं यं प्राप्तो ग्रामः स इति विग्रह वाक्यं स्वघटकयायमितिद्वितीयया स्वघटक ग्राम पदार्थान्वयि प्राप्तपदार्थैकदेश प्राप्त्यनुयोगिककर्मता सम्बन्धं बोधयति, वैयाकरणमते पदार्थभूतस्यापि विभक्त्यर्थस्य सम्बन्धविधया मानोपकमात् । अतः प्राप्तिप्रतियोगिककर्मतासम्बन्धेन सम्बन्धिन्यन्यपदार्थे प्राप्तग्राम इति बहुव्रीहिः, एवं घटोविषयो यस्येति विग्रहको घटविषयको बोध इति भवति प्रयोगः, न पुनः नीलघटो बोध इति, नीलोघटो यस्येति विग्रहस्य कर्तुमशक्यत्वात् । तस्मात् पुंलिङ्.गस्य गस्य शब्द

पुंस्त्वं लिङ्गं यस्येति, वा पुंस्त्वं लिङ्गं वाच्यं यस्येति वा न भवितुमर्हति विग्रहः इति चेत् अत्रोच्यते—

पुमादि पदस्थ पुंस्त्वादि धर्मपरत्वं, लिङ्गशब्दस्य लक्षणया लिङ्गरूपार्थ-परत्वमूरी कृत्यपुंस्त्वं लिङ्गमर्थो विग्रहे बहुव्रीहिरूपपादनीयः। इत्थमेव हि अलिङ्गे युष्यदस्मदी इति, स्वरादीति सूत्रे भाष्ये अलिङ्गमसंख्यमिति वा इति चोपपद्तते। अनया तु रीत्या नीलघटोऽर्थोयस्य स इति विग्रहको नीलघटः कृष्णकलस शब्द इत्यादि बहुव्रीहि प्रयोगास्तु अनभिधानान्न भवन्तीति।

**लिङ्गज्ञानोपायः—**

पुंस्त्री नपुंसक व्यक्तीनां लक्षणस्वरूपं लौकिकं लिङ्गमाकृति ग्राह्यमिति प्रत्यक्षेणैवावगन्तुं शक्यम्, इयं स्त्री, अयं पुमान्, एष जनो नपुंसकमित्याद्युपदेशेन च। नतुं घञ्जपः पुंसि इत्यादि व्याकरणानुशासनेन, नापि कोषेण, ताभ्यां लौकिक लिङ्गानुपदेशात्।

शास्त्रीयन्तु गुणोपचया पचयादि रूपं लिङ्गं घञाजपःपुंसिदेवताः स्त्रियाम् इत्यादि शास्त्रेणैवावगन्तुं योग्यम्, नप्रत्यक्षेण। सत्वादिगुणाएव हि तावद्दुरधि-गमास्तर्हि तत्परिणतिरूपंलिङ्गं शास्त्रमन्तरेण कथमिवावधारणीयं-स्यात्।

लिङ्गानुशासनञ्च द्विविधम्—घञाजपः पुंसि, स्त्रियांक्तिन्इत्यादिशास्त्ररूपं कोषरूपं च। नच कोषों नानुशासनमितिमन्तव्यम्। अमरसिंहकृतकोषस्व नाम लिङ्गानुशासनसंज्ञाया अन्वर्थत्वान्यथानुपपत्या कोषाणामपि लिङ्गानुशासनत्वात्।

**लिङ्गस्य प्रसिद्धत्वाप्रसिद्धत्वज्ञानोपायः—**

कोषव्याकरणयोस्तत्तल्लिङ्गबोधकत्वेन प्रतिपादिताःशब्दाः प्रसिद्धेष्वेव लिङ्गेषु प्रयोक्तव्याः। प्रसिद्धिश्च पुराणेतिहास प्राचीननिबन्धकाव्यनाटका-ख्यायिकादिषु प्रचुरप्रयुज्यमानत्वात्। नहि व्याकरणे कोषे वा प्रोक्तं लिङ्गं सर्वमेव प्रसिद्धम् तद्यथा अर्धर्चादि 'अर्धर्याःपुंसी चेति सूत्रेणार्धर्चादीनां पुंस्त्वं नपुंसकत्वं चानुशिष्टम् अर्धर्चादिगणे च शरीरघृतादयोऽपि पठिताः सन्ति। परन्तु तेषां नपुंसके एव प्रयोगा दृश्यन्ते, न पुंसि। अतस्तेषां पुंस्त्वमप्रसिद्धमिति नते तत्र प्रयोक्तव्याः। अतएवामरसिंहेन तेषां नपुंसकत्वमेव बोधितम्।

**तत्र अमरकोष शैली—**

एषा ह्यमर कोषशैली—(1) रूपभेदेन, (2) साहचर्येण, (3) विशेषीकृत्या, (4) द्वयोरिति कथनेन, (5) यत्किञ्चिल्लिङ्ग निषेधमुखेन, वा लिङ्गं बोध्यते तत्प्रसिद्धम्।

यन्तु रूपभेदेनाबोधितं सत् वाशब्द सहितेन पुंसीत्यादिना बोध्यते तत् अप्रसिद्धम्। यस्य च यल्लिङ्गं कोषान्तराद्युक्तमपि स्वयं न बोध्यते तस्य शब्दस्य तदपि लिङ्गमप्रसिद्धमिति।

तत्र (1) रूपभेदन यथा—मेघपुष्पं घनरसः। (2) साहचर्येण—नोवृज्जनपदौ। अत्र जनपदशब्दस्य रूपविशेषेण पुंस्त्वनिर्णयात् तत्साहचर्येण नीवृत् पुमानिति निर्णयः। (3) विशेषोक्त्या—पुंसि क्लीवेच काकोलकालकूटहलाहलाः, स्त्रियां प्रायृट्। (4) द्वयोरिति कथनेन—द्वयोः पाटलिः। मिथुनेतु द्वयोरिति इतिपरिभाषणात्द्वयोरित्यनेन स्त्रीपुंसयोर्ग्रहणम्। (5) निषेधमुखेन—अर्गलंनना, घर्मो स्त्री। अत्र पुंस्त्वनिषेधेन अवशिष्टयोः स्त्रीत्वनपुंसकत्वयोर्ग्रहणम्। स्त्रीत्वनिषेधेन चावशिष्ट पुंस्त्व नपुंसकत्वयोर्निर्णयः, निषिध्लिङ्गं शेषार्थमिति परिभाषितत्वात्।

**लौकिक शास्त्रीयञ्चलिङ्गमर्थःनिष्ठमेव—**

अथ लौकिकं लिङ्गमर्थनिष्ठमिति निर्विवादमेव, परन्तु शास्त्रीयलिङ्गं शब्दनिष्ठमर्थनिष्टं चेति विवादास्पदम्। तत्र सन्देहबीजन्तु 'अर्धं' नपुंसकम्' 'अस्त्रीपङ्कं पुमान् पाप्मा इत्यादिदर्शनेन तस्य शब्दगत्वं लभ्यते पुमादिशब्दानां पुंस्त्वादि विशिष्टार्थपरत्वात्। तस्य च शब्दनिष्ठत्वेऽपि यथा कथञ्चित् शास्त्रीयकार्याणि निर्बादयितुं शक्यान्मेव।

अथ च 'देवताःस्त्रियाम्' (अ. को, 1·1·9) 'अद्धर्चाः पुंसि' चेत्यादि दर्शनेन तु लिङ्गस्यार्थगतत्वं लभ्यते एवं स्त्रीकारेऽपि शास्त्रीयकार्यनिर्वाहे न काचिद्बाधेति।

तत्र निर्णीयते लिङ्गमर्थ–निष्ठमेव लौकिक लिङ्गस्यार्थ-निष्ठतया शास्त्रीयलिङ्गस्यापि तथात्वौचित्यात् भगवतापाणिनि मुनिना प्रातिपादिकार्थलिङ्ग दिशास्त्रेण लिङ्गे प्रथमाविधानाच्च, प्रातिपादिकार्थमात्रे विवक्षिते तदपेक्षयाधिके लिङ्गमात्रे वा विवक्षिते प्रथमेति तदर्थात्। न्यायनये शब्दस्य शाब्दबोधे मानाभावेन तद्गतत्वेनाभिमतस्य लिङ्गस्य प्रथमया बोधयितुमशक्यत्वाच्च। अतएव 'देवताः स्त्रियां' नपुंसकेप्रातिपदिकस्येस्येत्यादिकसंगच्छते। 'अर्धंनपुंसकम्' 'अञ्जलिः पुमान्' इत्यादौ नपुंसकादिशब्दास्तु नपुंसकत्व पुंस्त्वादि बोधक पराः इति न तदसांगत्यम्। नच यथाश्रुतार्थपरत्वसंभवे लक्ष्यार्थपरत्वं नोचितमिति बाच्यम्, अत्र यथाश्रुतार्थपरत्वस्यत्वन्मते संभवेऽपि 'देवतानिपुंसिवे' त्यादौ शक्यार्थ लक्ष्यार्थयोरुभयोरप्यसंभवात्।

तथाचाह भाष्यकारः—एकार्थशब्दान्यत्वाद्दृष्टं लिङ्गान्यत्व'मिति । असमर्थः एकस्मिन्नर्थे जलादिरूपे शब्दान्यत्वात् घनसर आपो जलमिति शब्दभेदात् । विभिन्न लिङ्गार्थकशब्द प्रयोगाल्लिङ्गानां भेदो ज्ञायते इति । एतच्च भाष्यं लिङ्गभेद साधनपरम् । एकार्थे इत्युक्त्या च लिङ्गानामर्थ-निष्ठत्वं सिद्धवत्प्रतिपादितम् ।

**वैयाकरणभूषण प्रतिपादित शास्त्रीय लिङ्गस्य शब्द निष्ठत्वखण्डनम्**

एतेन यदुक्तं वैयाकरणभूषणे सत्वरजस्तमोगुणानां साम्यं नपुंसकत्वम्, आधिक्यंपुंस्त्वम्, अपचयःस्त्रीत्वं तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यं च तमेव विरुद्धमंमादयात्टादि शब्दाभिद्यन्ते । केषांचिदनेक लिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् । एवञ्च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तु पदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थः इयं व्यक्तिरिदंवस्त्विति व्यवहारस्तट स्तटी तटमिति चोपपद्यते । तच्च लिङ्गमर्थ परिच्छेदकत्वेनान्वेतीति पश्वादि शब्दोक्तं पशुस्त्रियां नास्तीति पशुनेत्यादि बिधिर्न छागादीनङ्गत्वेनप्र योजयतीति,—

तन्नयुक्तम् । शब्दगतधर्मेणार्थपरिच्छेदस्य दुरुपपादत्वात् तब्दे च शास्त्रीयस्यैवलिङ्गस्य सम्भवेन तस्य च केवलान्वयितयार्थ व्यावर्तकत्वा सम्भवेन तस्य च केवलान्वयितयार्थव्यावर्तकत्वा सम्भवाच्च 'उभयंसर्वत्रेति भाष्येण पुंस्त्वादेरविरोध लाभेन तमेवविरुद्ध धर्ममादायेति कथनस्य ' चिन्तयत्वाच्च ।

# (ख) प्रत्यय स्वरूपं, तद्भेदाश्च

यद्यपि स्त्री प्रत्ययाध्ययनात् प्राक् प्रत्ययनिरूपणमावश्यकं तथापि तन्निरूपणं कर्तुं न शक्यते, यतः प्रत्यते, एव गगनकुसुमायितः, अखण्डोहि वाक्यस्फोटः 'स्फुटति अभि व्यक्ती भवत्यर्थो यस्मात् ('अपादानेघञ्') इति व्युत्पत्या वाचकः स्वीक्रियते शाब्दिकैः। वाक्यस्य चाखण्डत्वे तद्वयवः पदं, पदावयवौ प्रकृति' प्रत्ययौ च सुतरामप्रसिद्धाः। नच वाक्यस्याखण्डत्वे प्रमाणाभावः शङ्कनीयः। यतः प्रमाणमूर्धन्योऽनुभ एव तस्याखण्डत्वेमानम्।

तथाहि योऽयं गौरस्तीति वाक्यात् 'सास्नालाङ्गूल ककुदखुर विषाणीकर्तृक-वर्तमानकालिकसत्तारूपार्थप्रत्ययो जायते, न स श्रूयमाणंशकारौकार-रेफाडकार-तकारेकाररूपैः सप्तभिर्ध्वनिभिः, प्रत्युत गकारो-सकार-रेफाडकार-सकार-तकारेकार रूपैः ध्वनिभिः क्रमशः स्फुट-स्फुटर-स्फुटतम्। क्रमेण प्रत्येकमभिव्यक्तैर्गकागादिवर्ण-शून्यादखण्डाद नित्यात्[1] ब्रह्मरूपात् गौरस्तीति वाक्यादेव। यतो[2] गकारादि वर्णात्मिका ध्वनयो नून सन्त्यनित्याः।

---

1. 'अनादि निधनं ब्रह्म शब्दतत्वं यदक्षरं।
विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः॥" (वाक्य. पृ. 1/1)

2. (क) उत्पन्न प्रध्वंसिनश्च वर्णाः प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्। तथाहि अध्ययनध्वनिश्रवणादेवविशेषतोऽवधार्यते देवदत्तोऽयमधीते यज्ञदत्तोऽयमधीति इति। (ब्र. सू. शा. भा. अ. 1, पा. 3, अधि. 8, सू. 28 सत्यानन्दी दीपिका सहिते द्वितीया वृत्तिः सं. 2028

(ख) गौरिति गकारे यावद् वागवर्तते न तावदौकारे इति'

—(म.भा., 1.4.109)

(ग) येनैव प्रयत्नेनैकोऽत्रर्ण उच्चार्यते, विच्छिन्ने वर्ण उपसंहृत्य तमन्यमुपादाय द्वितीयः प्रयुज्यते तथा तृतीयस्तथा चतुर्थः —(तत्रैव)

(घ) उच्चरित प्रध्वंसित्वञ्च उच्चारणाधिकरणाकालोत्तर कालवृत्तिध्वंस-प्रतियोगित्वरूपम्। (उद्यो., 1.4.9)

उच्चरितप्रध्वंसिनां तेषां वर्णाऽऽत्मकध्वनीनां समुदायो नैव कदाचिदपि साक्षात्कर्तुं शक्यः इति तत्र वृत्त्याश्रयता नोपपद्यते । वृत्तेरनाश्रयत्वे तु कुतः स्याद् गकारादिवर्णात्मक ध्वनिसमुदाये नार्थप्रत्ययः ।

प्रत्येकं ध्वनिः स्यादर्थप्रत्यायक इति तु वक्तुं न शक्यते । यतो गकारात्मक ध्वनि ध्वनिमात्रेणैवार्थप्रत्ययोपपत्तौ तदितर—षण्णां वर्णाऽऽत्मक ध्वनीनां वैयर्थ्यं प्रसज्येत ।

गकारादि सप्तध्वनिभिः प्रत्येकमभिव्यक्तः वर्णाऽऽत्मकध्वनिभिन्नं स्फोटात्मकं वाक्यमेव वाचक'मिति शाब्दिकराद्धान्ते तु न भवति गकारव्यतिरिक्त ध्वनीनां वैयर्थ्यं, यतः स्फुटतमवाक्याभिव्यक्तिः गौरस्तीत्यत्रैकारात्मकचरमध्वनि नैव जायते । एतेन 'एकस्यस्फोटस्य नानैको वर्णात्मकध्वनि व्यञ्जकः । एकेनैवहि तदभिव्यक्तिः सुलभेत्यपि निरस्तम् । यथा जलगतमाधुर्यरसस्य आमलकरसो हरीतकी रसश्च व्यञ्जकौ भवतः यथा वा रत्नपरीक्षकाः सकृदवलोकनेन रत्नस्य तारतम्यं न जानन्ति, जानान्ति च मुहुर्मुहुस्तदवलोकनेन । इत्थं गकारात्मक ध्वनिमात्रेण स्फुटतमतया न गौरस्तीति वाक्यम् अभिव्यज्यते, व्यज्यते च सप्तभिस्तैर्वर्णात्मक ध्वनिभिस्तस्माद् वर्णात्मकध्वनिभिरभिव्यञ्जकत्व पक्षे न भवतीतर वर्णाऽऽत्मकध्वनीनां वैयर्थ्यम् । तस्मात् निश्चप्रचमिदं यद् गौरस्तीत्यादि वाक्यमखण्डमेवेति ।

तदुक्तं भर्तृहरिणा —

"पदेन वर्णा विद्यन्ते वर्णेष्वयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥"[1] इति

अपि च यदि वाक्यं पदावयवकं, पदं वर्णावयकं स्यात्तदा 'गौरस्तीति एकं वाक्यं 'गौ'रित्येकं पदमिति प्रतीतिर्नोपपद्येत, एकत्वनानात्वयोर्विरोधात् । अखण्डस्य वाक्यस्यैव वाचकत्वे तु नास्ति कश्चन विवादः । यतो लोके गौरस्तीत्यादि वाक्य श्रवणसमनन्तरं यथाऽर्थबोधोनुभूयते न तथा 'गौरिति अस्ती'ति वा पदमात्रस्य श्रवणान्तरमपि । तदुक्तं न्याय भाष्ये महर्षि वात्स्यायदेन—

1. वा. प., 1/13

"पद समूहो वाक्यमर्थपरिसमाप्तौ"[1] (समर्थम्) इति ।

भट्टोजिदीक्षितेनापि प्रोक्तं[2]—

"वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मतिस्थति रिति"

इत्थं शाब्दिक चरमसिद्धान्तं पर्यालोचयतां वाक्येपदे च प्रकृतिप्रत्ययादेरभावएवचेतसिपदंधत्ते, इति प्रत्ययविचारः सत्यं गगनकुसुमायित एव प्रतिभाति, चेत्सत्यम् । वाक्यज्ञानं लघूपायेन न सम्भवतीति क्रियते काल्पनिकः पदविभागः पदज्ञानमपि प्रतिपदपाठेन न जातुचित्सम्भवति तदुक्तं महाभाष्ये—

"अनुभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपद पाठः"[3] इति

अतः पदेऽपि प्रकृतिप्रत्यय विभागः कल्पिताभ्यामन्वयव्यतिरेकाभ्यांतत्-दर्थविभागाश्चपरिकल्पितः आचार्येण । तदुक्तं भट्टोजिदीक्षितेन—

पञ्चकोशादिवत्तस्मात्कल्पनेषासमाश्रिता ।
उपेयप्रतिपत्यर्था उपाया अव्यवस्थिताः ॥"[4] इति ।

अतएव पाणिनीयव्याकरणस्य वाक्यपदीय—महाभाष्य-प्रदीपवैयाकरण-भूषणसार लघुमञ्जुषा—परमलघुमञ्जुषा—प्रभृति — पदार्थप्रतिपादक ग्रन्थेषु प्रकृतिप्रत्ययादिभेदेन अष्टौ स्फोटाः[5] विवेचिताः सन्ति । इत्थं प्रत्ययस्य प्रसिद्धतया तन्निरूपणं नासङ्गमिति तन्निरूपयते । पाणिनीयशास्त्रे प्रत्ययशब्दः प्रतियन्त्यनेनार्थान् (प्रति—इण् पचाद्यच) इति व्युत्पत्या तृतीयाध्याय प्रथमपादस्य-पञ्चमसूत्रविहित सन्प्रत्ययमारभ्य पञ्चमाध्याय—चतुर्थ पादस्य चतुः पञ्चाशदधिक-

1. न्या. भा. अ. 2, आ. 1' सू. 55, चौ. प्रका., 1942
2. वै. भू. सा. वाक्यस्फोट प्रथम कारिका ।
3. म. भा, 1·1·6 पस्पशाह्निकम् ।
4. वै. भु. सा. स्फोट निर्णयः का. 8

5. (वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्ड पदस्फोटः, अखण्ड वाक्य-स्फोटः, वर्णजाति स्फोटः, पदजाति स्फोटः, वाक्यजाति स्फोटः)

शततम सूत्रविसितंकप्रत्ययं यावदर्थबोधकेषु प्रत्ययेषु पङ्कजवद्योगरूढः यतः 'प्रत्ययः' (3·1·1) इत्यधिकारेणैव सनादिकबन्तानां संज्ञिनां प्रत्ययसंज्ञाविहिता स्वयं दाक्षीपुत्रेण ।

'प्रत्ययः' इत्याधिकारेण प्रत्ययसंज्ञाविधानेप्रतियोगमुप स्थानादस्याधिकारस्य 'जुप्तिज्किद्भ्यः सन्' (3·1·5) इत्यादौ सन् इव गुबादिप्रकृतीना 'स्तबकर्णयोः रमिजपोः' (3·2·25) इत्यादौ इन् इव पश्वाद्युपाधीनामपि प्रत्ययसंज्ञाया आपत्तिः स्यात् । सत्यां हि प्रत्यय संज्ञायां 'परश्च' (3·1·2) इत्यधिकारसूत्रबलेन कदाचिद् गुबादयः परे भवेयुः कदाचित् सनादयः अन्यस्माद्वा गुबादयः स्युः । नैतावदेव तेषां प्रकृत्युपपदोपाधीनां प्रत्ययस्यैव 'आद्युदात्तश्च' (3·1·3) इत्याद्युदात्तत्वमपि प्रसज्येतेति तु न शङ्क्यम् । यतः प्रत्ययः इत्याधिकारेण प्रकृत्यादीनां प्रत्ययसंज्ञायाः प्राप्तिरेव नास्ति । यत्र हि प्रायः संज्ञा संज्ञिनोरुभयोरेव प्रथमान्तत्वेन निर्देश स्तत्रैव संज्ञासम्बन्धो विजायते । यथा 'वृद्धिरादैच्' (1·1·1) इत्यादौ पञ्चम्यन्ता एव सन्ति न प्रथमान्ताः ।

अतस्तेषु संज्ञा सम्बन्धो न स्यादिति निरूपितं महाभाष्ये ।[1] अपि च 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः'[2] इति न्यायात् प्रधानानां सनादिकबन्तानामेव प्रत्ययसंज्ञास्यात् न पुनः अप्रधानानां प्रकृत्युपपदोपाधीनामपि । लोके हि प्रधाने कार्यं सम्प्रत्ययो दृष्टः । यथा बाहुषु गच्छत्सु कश्चित् पृच्छति कोऽयं याति ? स आह राजेति, तत्र यः पृच्छति यश्चाचष्टे तयोरुभयोरपि प्रधाने राजनि सम्प्रत्ययो भवति । तस्मादिहापि प्रधाने सन्नादौ कार्यसम्प्रत्ययात् तस्यैव संज्ञा भविष्यति । प्रकृत्यादीनान्तु धात्वादि पाठे स्वरूपाणि विज्ञातानि सन्तीति नास्त्येषां प्राधान्यम् ।

सनादीनान्तु स्वरूप 'न क्वचन विज्ञातमिति तत्रापूर्व-विधित्वरूपं प्राधान्यमस्ती'त्यपि वक्तुं शक्यते ।

अथ 'हनस्त च' (3·1·108) इत्यादौ तकारादि विकाराणां 'अपुजतुनोः

1. म. भ. (3·1·1)

2. परि. शे. परि., 106

षुक्' (4·3·138) इत्यादौ षुगाद्यागमानाञ्च 'प्रत्ययः' इति अधिकारेण प्रत्यय संज्ञाया आपत्तिः स्यादित्यपि न साम्प्रतम्। यतः 'प्रत्ययः' इति महती संज्ञा स्वामन्यर्थां ब्रूते। तदर्थस्तु अर्थप्रतिपादकत्वरूपः। न चार्थ प्रतिपादकता विकारागमयोः क्वचन परिदृश्यते। तस्मान्न तयोः प्रत्ययत्वापत्तिः।

यद्यपि 'प्रत्ययः' इत्यन्वर्थ संज्ञा स्वीकारे 'अवेकः' (5·4·28) 'यावादिभ्यः कन्' (5·4·29) इत्यादि विहितानां 'क' 'कन्'—प्रभृतीनां कश्चन स्वार्थो नास्तीति प्रत्ययसंज्ञा न प्राप्नोति। लौकिकः शास्त्रीयश्चेति द्विविधो ह्यर्थः श्रूयते। तत्राद्यः पदेनैव प्रतीयते द्वितीयस्तु अन्वयव्यतिरेकाभ्यामेव। 'क' 'कन्' प्रभृतीनां पदत्वाभावात् वाच्या अर्थानसन्तीति द्वितीयोऽप्यर्थः अन्वयव्यतिरेकाभावन्नास्त्येव। तथापि—"अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति[1], इति स्वार्थिकानामपि 'क' 'कन्' प्रभृतीनां प्रकृत्यर्थ प्रतिपादकत्वं स्वीकृत्य प्रत्ययत्वं निर्विवादं सिद्धयति। एतेन निर्गलितमिदं यत् स्व-स्वप्रकृत्यन्यतरार्थ प्रत्यायकाः सनादयः कबन्ताः 'प्रत्ययाः' इति। स्वप्रकृत्यर्थपदेन चात्र धातुपाठकोशादौ प्रकृतिमुच्चार्य बोधितः स्वार्थो गृह्यते। तेन 'नभ' प्रभृतीनामादेशानां प्रत्ययत्वं न प्रसज्यते। यतस्ते स्थान्यर्थेनैवार्थवन्तः सन्ति, नतु तेषां कश्चन स्वार्थो विद्यते। अतएव कौशादौ 'न भा' दीनामर्था नोक्ताः।

विकारागमादेशानामादेशार्थे काचनाऽऽकाङ्क्षा नास्ति, यतोहि विकार पदेन एकदेशस्थानिकाः 'हनस्त च' (3·1·108) इत्यादि विहितास्तकाराद्यश्रया आदेशाः, आदेशपदेन सर्वस्थानिक 'इदमइश्' (5·3 3) इत्यादिविहिता इशादयः आदेशाः आगमपदेन च मित्रवदागमः "इत्यभियुक्तिक्तेः 'आमोहिनाम अपूर्वः शब्दोपजनः' इति भाष्य प्रामाण्यान्य अवयव वृद्धिरूपाः 'आर्धधातुकस्यैड्वलादेः" इत्यादि विहिता इडादयो गृह्यन्ते। एषां च देशः स्थानःषष्ठी बलात् लिङ्गाच्च निश्चितएवेति देशांशे सन्ति निराकाङ्क्षास्ते। अतः 'परश्च' (3·1·2) इति सूत्रं विकारागमादेशविधिषु नोपतिष्ठते। सत्येवम् "एकयोगनिर्दिष्टानां सह वा

---

1. परि. शे. परि., 123
2. परि. शे. परि. 18

प्रवृत्ति सह वा निवृत्तिः"[1] इति परिभाषा वलेन 'परश्च' इत्येतदेकयोगविशिष्टत्वाद् विकारागमादेशेषु प्रत्यय संज्ञाया अपि अप्रवृत्तिः स्यात् तस्मात् 'प्रत्ययः' इति महासंज्ञाया अन्वर्थसंज्ञात्वं न स्वीकरणीयम्. इति यदुच्यते तन्न युक्तम्। यतो निराकाङ्क्षस्थले 'परश्च' (3·1·2) इत्येतदेकयोगशिष्ट प्रत्ययसंज्ञाया अप्रवृत्तिस्वीकारे श्नमकङ्बहुक्ष प्रत्ययसंज्ञाया अप्रवृत्यापत्तिः स्यात्। तेष्वपिहि मित्वात्टेः प्राग् विहितत्वात् पुरस्ताद् ग्रहणाच्च क्रमशो देशांशे काचनाऽऽकङ्क्षा नास्ति।

यद्यपि 'तृणह'[2] इति निर्देशात् श्नपि 'न यासयोः' (·3·45) इति ज्ञापकात् श्नमकचोः प्रत्ययत्वं सेत्स्यति बहुचिप्रत्ययत्वाभावेऽपि काचन क्षतिर्नास्तीति श्नमकज्बहुचां प्रत्ययत्वाभावेऽपि न कश्चन दोष इति वक्तुं शक्यते तथापि 'एकयोग निर्दिष्ट[3] न्यायेन प्रत्यय संज्ञाया अप्रवृत्ति स्वीकारे' आद्युदात्तश्च (3·1·3) इति सूत्रस्थभाष्यासङ्गतिर्दुर्वारा स्यात्। तत्र हि 'लविषीय' इत्यत्र विशेषविहितत्वात् परत्वाच्च पूर्वं सीयुटि ततो लादेशे प्रत्यय संज्ञा सन्नियोगेन इटो विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादत आगमानुदात्तत्वं वक्तव्यमित्युक्तम्। अत्र प्रत्यय सन्नियोगेन इटो विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादित भवत्यसङ्गतम्'। यतो 'लस्य' (3·4·77) इत्यधिकाराद् इड् विधायके 'तिप्तसझिसिप्थस्थमिब्वस्मस्तातांझथासाथां ध्वमिड् वहि महिङ्' (3·4·78) इत्यत्र देशांशे निराकाङ्क्षतया 'परश्च' इत्यस्यानुपस्थित्या प्रत्ययः इत्यस्याप्यप्रवृत्तौ इटः प्रत्ययत्वं दुर्लभम्। तस्माद् विकारागमादेशानां प्रत्ययत्ववारणाय 'प्रत्ययः' इति संज्ञाया अन्वर्थताऽवश्य स्वीकारणीया।

अथवा प्रत्ययः इत्यत्र प्रत्याययति, प्रत्याय्यते, वेतिण्यर्थान्तर्भावेन क्रमशः कर्तृकरणसाधनयोः प्रत्ययशब्दयोगं तन्त्रं च स्वीकृत्य तेषां प्रत्ययत्वं वारणीयम्।

**प्रत्यय भेदाः—**

इत्थं प्रतियन्त्यनेनेति करणं व्युत्पत्या प्रत्यायतीति कर्तृव्युत्पत्या, प्रत्याय्यते

---

1. परि. शे. परि., 1१
2. म. भा., 1·1·20
3. परि. शे. परि. 17

इति कर्म व्युत्पत्त्या च तत्तदर्थ प्रत्यायकाः प्रत्ययाः 'विभक्ति' 'धात्वंश' तद्धित' 'कृत्' 'टाबादि भेदेन पञ्च भागेषु विभज्यन्ते ।

तदुक्तं जगदीशतर्कालङ्कारेण—

''विभक्तिश्चैव धात्वंशस्तद्धितः कृदितिक्रमात् ।
चतुर्थ प्रत्ययः प्रोक्तः टाबादिभिः पञ्चधाऽथवा ।।'' इति ।

1. विभक्तिपदेन चेह तन्त्रेण सुपः तिङश्च प्रत्ययाः गृह्यन्ते । 'विभक्तिश्च' (1·4·104) इत्यनेन हि तेषां विभक्ति संज्ञा विधीयते ।

2. धात्वंश शब्देन ते प्रत्ययः गृह्यन्ते ये 'विभक्ति—कृत्—तद्धित टाबादिव्यतिरिक्ताः सन्तीधात्वंशभूताः सन्ति । यथा 'सन्' । अयं हि न विभक्तिः सुप्तिङ्त्वाभावात्, नच कृत् तिङ्भिन्नत्वसत्वेऽपि सन्निहितधात्वधिकारविहितत्वाभावात् । नाऽपि तद्धितस्तदधिकार-बहिर्भूतत्वात् नापि टाबादिप्रत्ययो धात्वंशभूतत्वात् । नहि टाबादयो धात्वंश भूताः । प्रत्ययधिकार विहितत्वाच्चास्य प्रत्ययत्वं न निह्नोतुं शक्यते अतः सनादिप्रत्यया धात्वशत्वेन विभज्यन्ते । तेच सन् क्यज भेदेनद्वादश सन्ति । तदाह—

**भानुदीक्षितः—**

सन्क्यच् काम्यच् क्यङ् क्यषोऽथाचार क्वद् णिच्याङोतथा, यगाय इयङ् णिङ् चेति द्वादशामी सनादयः ।। इति ।

तद्धित पदेन ते प्रत्ययाः गृह्यन्ते ये 'तद्धिताः' (4·1·76) इत्यधिकारेण अष्टाध्याय्यां विधीयन्ते । तेच अण् ठक्, अञ् प्रमुखाः सन्ति ।

कृत्पदेन तिङ् भिन्ना 'धातोः' (3·1·91) इत्याधिकार विहिताःप्रत्ययाः गृह्यन्ते । तदुक्तं 'कृदतिङ्' (3·1·93) इति ।

सनादयस्तु धातो विहिता अपि न सन्निहित धात्वधिकारेविहिता इति तिङ्भिन्ना अपि न कृत्पदेन गृह्यन्ते ।

टाबादि पदेन 'स्त्रियाम्' (4·1·3) इत्याधिकारे विहिताः प्रत्ययाः गृह्यन्ते । यतस्तेन विभक्तयः, न धात्वंशाः नापि कृतः, नापि तद्धिताः, अथ च 'प्रत्ययः' इत्यधिकार विहितत्वेन सन्ति प्रत्ययाः । अतस्तेषु चतुर्षु एषामन्तर्भावा भावात् तेभ्यः पृथगमी 'टाबादयः' इति स्वीक्रियन्ते । इमे सर्वे 'स्त्रियाम्' इत्याधिकार विहिताः प्रत्ययाः स्त्री प्रत्ययाः 'इत्युच्यन्ते ।

तेच यद्यपि त्रय एव सन्ति । आकाररूपाः, ईकाररूपाः, ऊकारूपश्च, तथापि समर्थानांप्रथमाद्वा " (4·1·82) इत्यतः प्रागुक्तौतिरूपः फरूपो य रूपश्च स्त्रीप्रत्ययपदेमया गृहीता इति क्रमशोऽत्रग्रन्थे षटप्रकाराः स्त्रीप्रत्यया अध्येतः । भवन्ति । तत्र आकाररूपाः 'टाप्, डाप्, चाप् इत्येते त्रयः,

ईकार रूपाः 'ङीप, ङीष्, ङीन्' इत्येते त्रयः ऊकाररूपश्च 'ऊङ्' इत्येक एव, 'तिरूपस्तु तिरेव, अकाररूपःष्फः फकाररूपस्तु 'ष्यङ्' इत्येते सन्ति ।

---

प्रथमोऽध्यायः

## (ग) स्त्रीप्रत्यया: स्त्रीत्वस्य द्योतका:

शाब्दिक शिरोमणिना भट्टोजिदीक्षितेन "अजाद्यतष्टाप्" (4·1·4) इति सूत्रस्य 'अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योते टाप् स्यात्' इत्यर्थस्य करणेन स्पष्टं निर्दिष्टम्, स्त्रीत्वम् अजादीनामकारान्तस्य च प्रातिपदिकस्य च प्रातिपदिकस्य वाच्यं भवति टाप् तु तद् द्योतकमेव भवतीति। कथमन्यथा तत्र द्योत्ये टाप् कथनं तस्य संगच्छेत।

व्याकरण शास्त्रे स्त्रीप्रत्यया: द्योतका: भवन्ति। द्योतकत्वं तावत् स्वसमभिव्याहृतयशब्दनिष्ठशक्त्युद्‌बोधकत्वरूपम् प्रतिफलति। अत: वाक् उपानहादि शब्देभ्य: 'इयं तव वाक्' 'इमे तव उपानहौ' इत्यादि स्थले स्त्रीत्वस्य जायते बोध:। अन्यथा वागादि शब्दस्थले स्त्रीत्वबोधकस्य स्त्रीप्रत्ययस्य अदर्शनेन तत्र स्त्रीत्वबोधो न स्यात्। अत: स्वार्थ, द्रव्य, लिङ्ग, संख्या, कारकाणां प्रातिपदिकार्थत्वमेव। अत: स्त्रीप्रत्ययोपि स्त्रीत्वस्य अर्थस्य द्योतक एव भवितुमर्हति। यथा गृहे घटादय: पदार्था: पूर्ववत् एव भवन्ति किन्तु सति दीपे ते द्योतन्ते, तथैव प्रातिपदिकस्य स्वार्थ, द्रव्य, लिङ्ग, संख्यादयर्था: पूर्वत एव सन्ति। स्त्रीप्रत्ययास्तु तं स्त्रीत्वरूपं प्रातिपदिकार्थं द्योतयन्ति अतस्ते स्त्री प्रत्यया: भवन्ति। तदुक्तम् परमलघुमञ्जूषायाम् शाब्दिक—प्रवरेण भट्ट नागेशेन—

लिङ्गमपि नामार्थ:। प्रत्ययानां द्योतकत्वात्। अन्यथा वागुपानहादि शब्देभ्य: 'इयं तव वागि'ति स्त्रीत्वबोधानापत्ते:[1] इत्यादि।

अतएव 'अजा' इत्यत्र स्त्रीत्व-विशिष्टा 'अजा' इति जायते बोध:।

---

1. वै. सि., प. ल. म. नामार्थ विचार प्र., पृ. 388

अन्यथा प्रकृति प्रत्ययौसहार्थं ब्रूतः तयोः प्रत्ययार्थस्य प्राधान्यम् इति व्युत्पत्तेः 'अजा' शब्दात् अज वृत्तिः स्त्रीत्वम् इति बोधापत्तेः। यदि च प्रत्ययार्थस्य विशेष्यतेव इति नियमो नैव स्वीकारणीयः क्रियाप्रधानमाख्यातमित्युक्त्या देवदत्तः पचती 'त्यादौ देवदत्ता भिन्नैकाश्रयिका पचिक्रियेति बोधे प्रत्ययार्थस्याऽपि विशेषण त्वात् इति प्रत्ययार्थत्वेपि स्त्रीत्वस्य विशेषण वं सम्भवती युच्यते तदा 'वाक्' 'उपानत्' निश दिक्' इत्यादि स्थलेषु विनापि टाबादि प्रत्ययम् स्त्रीत्वस्य बोध दर्शनात् स्त्रीत्वं प्रत्यय द्योत्यमेव न तु वाचाम्। स्त्रीत्वस्य प्रकृत्यर्थतया टाबादेः तद् वाचकत्वाभावेन द्योतकत्वस्यैव तत्र वक्तव्यमन्यथा व्यावक्रोशी इत्यादौ कर्म-व्यतिहारे ङीप् न सिद्ध्येत्।

अतएव शाब्दिकप्रवरेण कौण्डभट्टेन वैयाकरण भूषण-सारे[1]—

"एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः॥ इति

कारिकायाः त्रिकमिति शब्दस्य व्याख्यानावासरे जातिः व्यक्तिः लिङ्गानी त्यर्थः इति समुदीरितम्। अथ च सत्व, रज स्तमो गुणानां साम्यावस्था नपुंसक-त्वम्" उपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम् तत्दच्छब्द-निष्ठं तत्दच्छब्द वाच्यं चेति प्रतिपादितम्।

अयमाशयः व्याकरणशास्त्रे स्वार्थ, द्रव्य लिङ्ग, संख्या कारकेषु नामार्थत्व विचारः संगच्छते। अथ च स्त्रियाम् यत् प्रातिपदिकं वर्तते तस्मा बादयो भवन्ति स्वार्थे इति भाष्योक्तिश्च संगच्छते।

एवं च 'अजाद्यतष्टाप्' (4.1·4) इति सूत्रस्य अयमर्थः पर्य्यवस्यति अजः = अजशब्दः आदिः एषां ते अजादयः ते च अच्चेति समाहारद्वन्द्वात्षष्ठी, ङ्याप् प्रातिपदिकात" इति सूत्रात् प्रातिपदिकादित्यनुवृत्तम् षष्ठ्या विपरिणतम्। अजादिभिः अतो च विशेष्यते, तदन्तविधिः। तत्र अद्विषये 'समास प्रत्यय विधौतद[2]प्रतिषेधः' इति तदन्तविधि निषेधो न भवति 'उगिद्वर्णग्रहणं-

1. नामार्थ प्र. का. 25
2. वा. व. सि. कौ. सं. प्र., पृ. 10

वर्जम्'[1] इत्युक्तेः । ङ्याब्ग्रहणं तु नानुवर्तते स्त्रियामित्यधिकारे तयो विधेयत्वात् । न च अजादिभिः प्रातिपदिकस्य विशेषणत्वेपि तदन्तविधिर्नास्ति 'समासप्रत्ययं विधौ तद्प्रतिषेधः इति सन्निवेषात् ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति[2] निषेधाच्चेति वाच्यम् - 'शूद्राचामहत्पूर्वा[3] जातिः' इत्यत्र अमहत्पूर्वाग्रहणेनात्र तदन्तविधि ज्ञापनात् । ततश्च अजादीनामकरान्तस्य च वाच्यंयत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यादिति सूत्रार्थः । 'स्त्रियामिति' भावप्रधानो निर्देशः । अजाद्यत इत्यस्य पञ्चम्यन्तत्वे अहमतपूर्वग्रहणेन स्त्रीप्रत्यये तदन्तविधि ज्ञापनात् 'वनोरच' (4·1·7) इति वदत्रापि तदन्त विधौ, स्त्रीयां वर्तमानात् अजशब्दान्तात् प्रातिपदिकात् इत्यर्थे पञ्चाजीत्यत्रापि टाप् प्रसज्येत ।

अतः अजादीति लुप्त षष्ठीकं पृथक् पदमित्याश्रित्य 'अजादेः स्त्रीत्वे' इत्येव योजनेन अजादिपदरयार्थं प्रधानार्थकत्वेनअजादिपदार्थंगत स्त्रीत्वे वर्तमानात् (अर्थात् स्त्रीत्व बोधाकात्) प्रातिपदिकात् टाबित्यर्थः आश्रितः । अजादीनां वाच्यं यत् स्त्रीत्वमिति तु फलितार्थकथनम् । तथा च पञ्चाजीत्यत्र-समुदाय वाच्य स्त्रीत्वस्य अज शब्दवाच्यार्थगतत्वाभावान्न टाप् । ननु तदन्त विधि निरासाय षष्ठयन्तत्वमाश्रीयताम्, अर्थप्रधानार्थकत्वं अजादीतिपदस्यकुत आश्रीयते, तावतापि तस्य स्त्रीत्वेन्वयात् 'अजादिमात्र वाच्य स्त्रीत्वे' इत्यर्थलाभात् पञ्चाजीत्यत्र स्त्रीत्वस्याजपदमात्र वाच्यत्वाभावेन टाब्वारणा सम्भवात् इति चेन्न । तथा सति अजः अः यस्याः इत्यर्थे निष्पन्नादेजा शब्दाद्टापि स्वाद्युत्पतौ हलङ्यादिलोपापत्तेः पूर्वान्तिवद भावेन एकादेश विशिष्ट अजशब्दत्वस्यारोपेण तन्मात्र वाक्यत्वस्य स्त्रोत्वे इत्यर्थलाभात् । प्रकृते च अजत्व विशिष्टार्थगतस्त्रीत्वा भावान्न दोषः । तदर्थगत स्त्रीत्वे' इत्यर्थेपि वाच्यत्वानिवेशे स्त्रीत्वोपलक्षितार्थ वाचकात् धनादि शब्दादपि अजैव धनमित्यादौ टावापत्तिः अतः स्त्रीत्व वाचकात् इति वक्तव्यम् । स्त्रीत्वे तद्वा च्यत्वविशेषणं तु फलितमेवेति पूर्वमुक्तम् । अर्थप्रधाननिर्देशे साक्षात् वाच्यत्वान्वयस्य तत्रालाभात् । एवं च अजादि पदावच्छिन्नाजत्वाद्यवच्छिन्नधर्मितानिरूपित स्त्रीत्वनिष्ठ प्रकारताक् बोध तात्पर्येणोच्चरितात् प्रातिपदिकात् टाबित्यर्थः पर्यवस्यति । अजादिपदा वच्छिन्नेति विशेषणेन बर्कराहि

1. वा. वै. सि. कौ सं. प्र., पृ. 10
2. परि. शे. परि., 31
3. वा. 4 1 4

शब्देभ्यो न टाप्। अजाद्यर्थगत स्त्रीत्वे इति यथा श्रुतार्थेतु ततष्टाबुदुर्वारः। अतएव अजसदृशस्य स्त्रीत्यर्थे अजेति टाप् सिध्यति। यथा श्रुतार्थेतु अजत्वा-विशिष्टार्थगत स्त्रीत्वाभावान्न स्यात्। तेन पञ्चाजीत्यत्र समाहारनिष्ठ धर्मितायाः अजत्वावच्छिन्नत्वेपि न टाप्।

इत्थं च टाबादिकं विनापि वागादि शब्देभ्यः स्त्रीत्वस्य अव्युत्पत्ति पक्षे रामज्ञानादि शब्देभ्यः पुन्नपुंसकत्वयोर्बोधस्य सार्वजनिनानुभवसिद्धत्वात् लिङ्गत्वं प्रातिपदिकार्थत्वमेव तदुक्तम् अभियुक्तैः—

"स्वार्थो द्रव्यञ्च लिङ्गंञ्च संख्याकर्मादिरेवच।
अमीपञ्चैवनामार्थास्त्रयः केषां चिदग्रिमाः॥ इति।

केषांचिदग्रिमाः इति कारिकायाः अग्रिमा इत्यस्य लिङ्गान्ता इत्यर्थः। अतोलिङ्गस्य नामार्थत्वे न कोपिविवादः इति मन्तव्यम्।

एवमेव—

"न सोस्तिप्रत्ययोलोके यः शब्दनुगमादृते।
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते।। इति।

वाक्यपदीय-कारिकया शब्दस्यापि शाब्दबोध विषयतयास्वार्थ, द्रव्य, लिङ्गादिवत् शब्दस्यापि नामार्थत्वं शाब्दिकसरण्यासिध्यति। किन्तु तद्विचारो नावश्यकतया परित्यज्यते इति।

अथावशिष्टं किञ्चित् सिंहावलोकनन्यायेन समीक्ष्यते। स्त्रीत्वम् स्त्री-प्रत्ययवाच्यम् द्योत्यं वेत्ति ? नाद्यः स्त्रीत्वस्यार्थस्य स्त्रीप्रत्ययनिष्ठ वाचकतानिरूपित वाच्यता वत्वेसति तस्य विशेष्यतापत्तिः स्यात् प्रकृत प्रत्ययौ सहार्थंब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यमिति व्युत्पत्तेः तथा च अजाशब्दादज वृति स्त्रीत्वमित्येव बोधपात्तिः स्यात्। स्त्रीत्वविशिष्टाजत्येवतु तत्र बोध इष्टः।

ननु प्रत्ययार्थस्य विशेष्यत्वैवेति न नियमः क्रियाप्रधानमाख्यातमित्युक्ततया देवदत्तः पचतीत्यादौ देवदत्ताभिन्न श्रयिका पचिक्रियेति बोधे प्रत्ययार्थस्यापि विशेषणत्व दर्शनात् प्रत्ययार्थत्वेपि स्त्रीत्वस्य विशेषणता सम्भवतीति चेत्, स्यादेवं किन्तु

1. वाक्यप. का. 123

स्त्रीत्वरूपार्थस्य स्त्रीप्रत्ययेन सहान्वयव्यतिरेकयोः सतोरेव स्त्रीप्रत्ययवाच्यता सेत्स्यति । तदेवं तु न पश्यामः, वागादिषु टावादिक विनैव स्त्रीत्वरूपार्थस्य बोधात । एवं च लाघवात् स्त्रीत्वं प्रकृत्यर्थ भूतमेव । प्रत्यय मात्रस्य तद वाचकत्वे वागादौ तदभावात्तद् भानानापत्तिः प्रकृति प्रत्यय समुदायस्य तद्वाच्यकत्वेऽपि स एव दोषः शक्यतावच्छेदक गौरवं च स्यात् ।

स्त्रीप्रत्ययानां, द्योकत्वादेव 'व्यावक्रोशी' इत्यादौ 'कर्मव्यतिहारेण-च्स्त्रियाम्' । इति 'णचि', 'णचः' स्त्रियाम्' 'रत्यञ्ञिङीप सिद्धः' । वाचकत्वेहि वाचकसमुच्चस्योक्तार्थानमितिन्यायेनानुचितत्वात् ङीप्नस्यात् । यतो व्युतिलुनीते इत्यादौ द्विर्बद्धं सुबद्धं भवतीति न्यायेन द्योतक समुच्चयस्य दृष्टत्वा । देवेहहि ङीप् । तत्रक्रियाव्यतिहारस्य प्रकृतेः धातो वच्यितया व्यति पदात्मने पदयो द्योतकत्वमेवेत्याशयः । इत्थं 'व्यावक्रोशी' इत्यत्र णजञौ स्त्रीत्ववाचकौ ङीप्चस्त्रीत्वद्योतकः इति त्वयाऽमिकत्रसमुच्चयोनाश्चर्यंकरः 'व्यतिलुनीते, इत्यत्र हि व्यतिपदाऽऽत्मनेपदयोः कर्मव्यतिहारद्योतकयोः, कर्मव्यतिहारवाचलूधातोश्चैकत्रप्रयोगो दृष्ट्चरः । न पुनः क्वचन वाचकसमुच्चयो दृश्यते, उक्तार्थानामप्रयोगादत्तः स्वीत्वद्योकत्वमे व स्त्रीप्रत्ययानां नवाचकत्वमित्ति निश्चप्रचम् । तदुक्तं लघुशब्देन्दुशेखरे—

"प्रत्ययार्थत्वेहि तस्य विशेष्यतापत्तिः । द्योतस्य तु विशेषणत्वमेवेति स्पष्टमाकरे । वागादिषु बिनापि टाबादिकं तस्य बोधाच्च । अतएव व्यावक्रोशी' स्यादौ 'कर्मव्यतिहारे णच् स्त्रिया' 'मिति' 'णचि' 'णचः' स्त्रियामित्ति च ङीप् सिद्धिः । 'व्युतिलुनीते' इत्यादौ द्विर्बद्ध सुबद्धं भवतीति न्यायेन द्योतक समुच्चयस्य दृष्टत्वात् ।

द्वितीयऽध्यायः

# (क) आकाररूपाः स्त्री प्रत्ययाः

तत्र—1. चाप् प्रत्ययः

आकाररूपाः स्त्री प्रत्ययाः चाप्-टाप्-डाप्-चेति त्रयः सन्ति । तत्र-यथाक्षरानुक्रमं प्राक् चाप् प्रत्ययो निरूप्यते । चाप् प्रत्यय विधायकेषु द्वे सूत्रे द्वे वार्तिके च सन्ति ।

चाप्-प्रत्यय-विधायके सूत्रे—

यथा—

1. 'आवट्याच्च' (4·1·75) ।
2. 'यङश्चाप्' (4·1·74) ।

चाप् प्रत्यय विधायके वार्तिके

यथा—

1. 'सूर्याद्देवतायां चाव् वाच्यः' (वा. 4·1·48) ।
2. 'षाद्न्य श्चाव्वाच्यः' (वा. 4·1·74) ।

चाप्विधायकयोः सूत्रयोरिदं प्रथमं सूत्रम्—'आवट्याच्च' (4·1·75) इति ।

'आवट्य प्रातिपदिकात् स्त्रियां चाप् स्यादिति सूत्रार्थः । उदाहरणं च 'आवट्या' इति । अवटः = ऐन्द्रजालिक जीविकावानिति तस्यापत्यं स्त्री इत्यर्थे 'अवट' शब्दात् 'गर्गादिभ्यो यञ्' (4·1·105) इत्यनेन यञ् प्रत्ययः आद्यचो

वृद्धिः अन्त्याका स्य लोपः आवट्य शब्दात् 'यङश्चाप्' (4·1·74) इति प्राप्तं ङीपं बाधित्वा, चापि 'यस्येति चेति' (6·4·148) इत्यकारलोपे स्वादिकार्ये च 'आवट्या'रति सिद्धयति।

चाप्विधायकयोर्द्वितीयं सूत्रम्—'यङश्चाप्' (4·1·74) इति। अत्र प्रातिपदिकादित्यनुवर्तते। 'प्रत्ययग्रहणे यस्मात्[1] सविहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया तदादि तदन्तोभयविधिः तथा च यङादि तदन्तात् प्रातिपदिकात् स्त्रियां चाप् स्यात् इति सूत्रार्थः।

चापि पकारो 'हलङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्' (9·1·67) इत्यत्र आव् ग्रहणेन ग्रहणार्थः, नतु 'अनुदात्तौ सुप्पितौ' (3·1·4) इति स्वरार्थः। टावादौ तस्य स्वरस्य सम्भवोपि चापि असम्भवात्। चापि हि चकारः इत्संज्ञकः तेन चित्वात् 'अनुदात्तौसुप्पितौ' (3·1·4) इति सूत्रं बाधित्वा 'चितः' (6·1·63) इति अन्तोदात्तत्वस्य प्रवृत्तेः। एवं च चापि चकारः 'चितः' (6·1·63) इत्न्तोदात्तार्थः।

अत्र सूत्रे यङ् पदेन ष्यङ ष्यङौ उभौ गृह्येते। ष्यङरूपस्य उभयत्रापि सत्वेन एकतर ग्रहणे प्रमाणाभावात्। तत्र ष्यङन्तोदाहणम् —

'आम्बष्ठ्या' इति। अत्र वैश्यायां ब्राह्मणाज्जातः सुतो म्बष्ठः। सतु चिकित्सावृत्तिः। 'अम्बष्ठो[2]वैश्यद्विजन्मनोः' इत्यमरः अम्बष्ठस्यापत्यं स्त्रीत्यर्थे वृद्धेत्कोसलात्' (4·1·171) इति यङि वृद्धौ 'आम्बष्ठ्य शब्दाच्चापि रूपम्।

ष्यङन्तस्योदाहरणम् 'कारीषगन्ध्या' इति। अत्र-करीषम् = शुष्कगोमयम्। तदुक्तम् शुष्कं करीषो'स्त्री'[3] इत्यमरः। अत्र करीषपदं करीषगन्ध सदृशपरम्। तथा च करीषस्य गन्ध इव गन्धो यस्या इत्येव विग्रहः। अन्यथा समानाधिकरण बहुव्रीह्यनापत्तिः। 'उपमानाच्च' (5·4·137) इति गन्ध शब्दस्यकारोन्तादेशः। करीष गन्धि शब्दात् तस्या गोत्रापत्तमित्यर्थेणि तस्य 'अणिञोः' (4·1·78)

---

1. परि. शे. परि. 24
2. अम. का. 2 व. 10 श्लो. 2
3. अम. (2 10·2)

इत्यणः स्त्रियां ष्यङादेशे षकारङकारयोरित्वे यङन्तात् चापि स्वादिकार्ये च कृते कारीषगन्ध्या' इतिसिद्धयति । यद्यपि स्त्रियामेव ष्यङ्विहित इत्युक्तार्थनामप्रयोग इति न्यायात् स्त्रियां चाप् न प्राप्नोति, तथापि ष्यङो ङित्करणस्य यङ्ग्रहणेन ग्रहणार्थतया चापो विधानाभावे वैयर्थ्यापत्त्या तत्सामर्थ्यादुक्त न्यायाप्रवृतिः ।

तत्र—चाप् विधायकयोः वार्तिकयोः प्रथमं वार्तिकम्[1]—

**'सूर्याद् देवतायां चाब्वाच्यः'** इति (वा. 4·1·48) देवताभूतायां स्त्रियां पुंयोगे वर्तमानात् सूर्य शब्दात् चाप् वक्तव्यः इति च वार्तिकार्थः । 'सूर्या' इत्युदाहरणम् । सूर्यस्य स्त्री देवता इत्यर्थे सूर्य शब्दात् अनेन वार्तिकेन चापि चकार पकारयोः रित्संज्ञायां लोपे च कृते सवर्णदीर्घे स्वादिकार्ये च कृते रूपमिदम् ।

अत्र वार्तिके यदि देवताग्रहणं न क्रियते तदा 'सूरी' कुन्ती इत्यत्रापि चाबापत्तिः स्यात् । सूरी इति रूपन्तु अग्रे 'सूर्यतिष्यागस्त्य मत्स्यानायं उपधायाः (6·4·149) इति वार्तिक व्याख्यानावसरे व्युत्पादयिष्यते ।

अत्र—'सूर्याद्देवतायां चाब वाच्यः इत्यस्य वार्तिकस्य सूर्यस्य स्त्री देवता इत्यर्थे सूर्या इति रूपं यथा स्यात् 'पुयोगादाख्यायाम्' (4·1·48) इति ङीपि सूरी इति मा भूदित्येव प्रयोजनम् । तत्र 'सूर्या' द्देवतायां नेदि वाच्यम्' इत्येव वार्तिकं कर्तुमुचितम् । अनेन वार्तिकेन पुंयोगादिति ङीपि निषिद्धे अद तत्वादापि 'सूर्या' देवता इति रूपं सिद्धयति । एवं च अनेन वार्तिकेन चाप् विधानं विफलमिति न वक्तव्यम् । यतः 'सूर्या' इत्यत्र यदि टाप् क्रियते तदा 'अनुदात्तौसुप्पितौ' (3·1·4) इत्यनेन आकारस्य अन्तोदान्तत्वं प्राप्नोति, यदि च चाप् क्रियते तदा 'चितः' (6·1·63) इति सूत्रेण आकारस्योदात्तत्वं सिद्धयति । तस्मात् सूर्याशब्दः अन्तोदत्तो यथा स्यात् अन्तानुदान्ते मा भूतइत्येतदर्थम्, अनेन वार्तिकेन चाब्विधीयते नतु पुंयोगादिति ङीपि निषेधः इत्यवधेयम् ।

चाप् विधायकं द्वितीयं वार्तिकं[2]—'पाद्यञ्श्चाप्वाच्यः' (4·1·74) इति । षकारात्परो यो यञ्तदन्तात् चाप् इत्यर्थः । उदाहरणे तु 'शार्कराक्ष्या' पौतिमाष्या

---

1. 'पुयोगादारव्यायाम्' (4·1·48) रतिसूत्रस्थम् ।
2. 'यङश्चाप्' (4·1·74) इति सूत्रस्थमित्यर्थः ।

इति। अत्र शर्कराक्षस्य अपत्यं स्त्री इति विग्रहे पूतिमाषस्यापत्यं स्त्री इति च विग्रहे गर्गादिभ्योयञ्' (4·1·105) इत्युभयत्रयञि 'यस्येति च' (6·4·148) इत्यनेन अकारस्य लोपे 'तद्धितेष्वचामादेः' (7·2·17) इत्यनेन आद्यचोर्वृद्धौ षकारात्परो यो यञ्, तदन्ताभ्यां शार्कराक्ष्य—पौतिमाष्य—प्रातिपदिकाभ्यां चापि द्वे रूपे सिद्ध्यतः।

2 टाप् प्रत्ययः

अथयथाक्षरक्रमं प्राप्तं टाप् प्रत्ययोनिरूप्यते। तत्र टाप् प्रत्यय विधायके सूत्रे द्वे, चत्वारि वार्तिकानि, तन्निषेधकञ्चेकं सूत्रमस्ति।

तत्र—टाप् प्रत्यय विधायके सूत्रे

यथा—

1. 'अजाद्यतष्टाप्' (4·1·4)

2. 'टावृचि' (4·1·9)

टाप् प्रत्यय विधायकानि वार्तिकानि

यथा—

1. 'मूलान्नञः' (वा. 4·1·4)

2. सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्' (वा. 4·1·4)

3. 'सम्भस्त्राजिनशणपिण्डेभ्यः फलात्' (4·1·4)

4. 'शूद्राचामहत्पूर्वा जातिः' (वा. 4·1·4)

टाप् प्रत्यय निषेधकं सूत्रम्

यथा—

1. 'न षट्स्वस्रादिभ्यः' (4·1·10)

टाप्—विधायकंप्रथमं सूत्रम्—'अजाद्यतष्टाप्' (4·1·1) इति। अत्र 'स्त्रियाम्' (4·1·3) 'ङ्याप्प्रातिपदिकात्' (4·1·1) इत्यतः 'प्रातिपदिकात्' इति

चाधि क्रियते। 'ङ्याप्' इति तु न सम्बध्यते ङ्यापोविधाने तदुभयत्वा सम्भवात्। अजशब्दआदिर्यस्य सोऽजादिः,न त्वजादिर्यस्येति, अजादिगणे स्वरादि शब्दानामेडकादीनां पाठवैयर्थ्यापत्तेः। अत्र 'अजादि' इति लुप्तषष्टीकं पृथक् पदम्।

अतएव 'प्रातिपदिकात्' इति सामानाधिकरण्येनासम्बन्धात् 'अजाद्यन्तात्प्रातिपदिकादितिनार्थः'। किन्तु अजादीत्यस्य स्त्रिया मित्यनेन सम्बन्धः। तदाह—'अजादीना' वाच्यं यत्स्त्रीत्व[1] मिति। नचैवम् अजादि शब्दवाच्ये स्त्रीत्वे प्रातिपदिकात् टाबित्यर्थ स्वीकारे 'तुरगी' इत्यत्र टाप् प्राप्नोति, अजादिषु अश्वशब्दस्य पाठेनाश्वशब्दवाच्य स्त्रीत्वस्य तुरगशब्दार्थे सत्वादिति वाच्यम्, यस्मात्प्रातिपदिकात् टाप् चिकिर्षितस्तद्वाच्यार्थगतं यत् तद् वाच्यं स्त्रीत्वं तत्र द्योत्ये तस्मादेव प्रातिपादिकात् टाबित्यर्थात्।

अयम्भावः—शब्दादुपस्थितिश्चार्थस्य शब्दप्रकारिकार्थ विशेष्यिका जायते। तथा च तद् वाच्यार्थस्य यद्दश विशेषणता विशिष्टस्य तच्छब्द जन्मोपस्थितिविषयता त द्दशविशेषणावच्छिन्न तद् विषयता विशिष्टं यत् स्त्रीत्वं तत्र द्योत्ये टाबित्यर्थे विवक्ष्यते। अश्वशब्दजन्मोपस्थिति विषयताविशिष्टं यत् स्त्रीत्वं तदश्व शब्द सामानाधि करण्येन भासते, नतु तुरग शब्द सामानाधिकरण्येन।

एव चोपस्थितो यच्छब्दसामानाधिकरण्येन भसमानं यत्रचछब्दवाच्यं स्त्रीत्वं तस्मिन्द्योत्ये तत्तच्छब्दात् टाबित्यर्थेनादोषात्। अतएव 'पञ्चाजी' इत्यत्र न टाप्। अत्र पञ्चाज शब्द सामानाधिकरण्येन भासमानं स्त्रीत्वं न त्वजशब्द सामानाधि करण्येन।

यदि तु 'अजाद्यतः' इतिविशिष्टं पञ्चम्यन्तंस्यात् तदा अजाद्यन्ताद-न्ताच्च—प्रातिपदिकादित्यर्थः स्यात्। तथा च अजाद्यन्त पञ्चाज शब्द सामानाधि करण्येन भासमानं स्त्रीत्वमस्तीति पञ्चाजशब्दात् टाबापत्तिः स्यात्।

नचात्र 'समासप्रत्ययविधौ प्रतिषेधः' (वा. 1·1·72) इति तदन्त विधेः प्रतिषेधात् तदन्तविधिर्नस्यादिति वाच्यम्, शूद्राचामहत्पूर्वाजातिः' इत्यत्रामहत्पूर्व

---

1. भ. दी. वै. सि. कौ. स्त्रीप्र. प्र. पृ. 131

ग्रहणेन, 'अनुपसर्जनात्' (4·1·14) इत्याधिकारेण च भाष्य कृतैव स्त्रीप्रत्यये तदन्तविधेर्ज्ञापनात् । 'अतः' इत्यंशे 'उग्विद्वर्णग्रहणवर्जम्' (वा. 1·1·72) इति वार्तिकेन प्रतिषेधे संकोचाच्च ।

नचैवमपि 'अजःअः यस्याः सा अजा इति अज शब्दस्य अशब्देन समासे अत्र पूर्वान्तवद्भावेन एकादेशविशिष्टे अ जशब्दत्वस्यारोपेण तद् वाक्यत्वस्यस्त्रीत्वे सत्वात् अजशब्द सामानाधिकरण्येन भासमानं यदजशब्द वाच्यं स्त्रीत्वं तस्मिनद्योत्ये अजाशब्दात् टापि 'अजाः' इत्यत्रापः परस्य सोर्लोपापत्तिरिति वाच्यम्, अजादिपदावच्छिन्ना अजत्वा अवछिन्ना या धर्मिता तादृश धर्मितानिरूपित स्त्रीत्वनिष्ठ प्रकारताक बोधतात्पर्येणोच्चरितादजादिरूपात्प्रातिपदिकात् टाबित्यर्थेनादोषात् । प्रकृते च नाजत्वावच्छिन्ना धर्मिता किन्तु अन्य पदार्थत्वावच्छिन्नेति नापत्तिसम्भवः । अजत्वावच्छिन्नत्वञ्च साक्षात् बोध्यम् । तेन 'पञ्चाजी' इत्यत्र समाहारनिष्ठ धर्मितायाः परम्परया अजत्वावच्छिन्नत्वेऽपि न क्षतिः ।

अजादिशब्देनचात्र "अजा, एडका, कोकिला, चटका, अश्वा, मूषिका, बाला, होडा, वत्सा, मन्दा, विलाता पूर्वापिहाणा (पूर्वापाणा) अपरापहाणा, 'सम्भस्त्राजिनशणपिण्डेभ्यः फलात्' 'सदच् काण्ड प्रान्त शतैकेभ्यः पुष्पात्' शूद्राचामहत्पूर्वा जातिः' क्रुञ्चा, उष्णिहा, देवविशा, ज्येष्ठा, कनिष्ठा मध्यमा पुंयोगेऽपि 'मूलान्नञः' दंष्ट्रा अमूला इत्यजादिगणः[1] गृह्यते, अत, इत्यनेन च अकारान्तंकृतस्नं कृतस्नंप्रातिपदिकं गृह्यते । अतोऽत्र अजादेरित्यस्य

---

1. अजादिराकृतिगणः अतएव 'नमुने' (8·2·3) इति सूत्रे 'टायामादेशः इति भाष्य प्रयोगः क्तवायाः इति च संगच्छते । 'प्रथमाध्याय चतुर्थ पादे चमसदविशेषात् (वै. सि. कौ. सू. । अ. 4 पा. अ.) इति सूत्रे शांकर वाचस्पत्यो रजायां 'छागा' इति टाबन्तः प्रयोगो दृश्यते तः छागशब्दो प्युजादिषुकेचित् "इति लघुशब्देन्दुशेखरे भट्टनागेशेन केचिदित्य नेन 'छागी' इति ङीषेण प्रयोगासिद्धि मनांसिनिधायारुचिः सूचिता ।

वस्तुतस्तूभयप्रयोग दर्शनादजादिषु 'छागाद्वा' इति पठित्वा प्रयोग द्वयं साधनीयमिति मन्ये ।

अजा[1] इत्युदाहरणानि 'अतः' इत्यस्य च खट्वा[2] इत्युदाहरणानि सन्ति ।

टाब् विधायकः सूत्रेऽस्मिन् 'अत, इति इत्यत्र तपर करणं तत्कालार्थम् । तेन शुभन्जा, किलालपा, ब्राह्मणी इत्यत्र सुलोपा भावः सिध्यति । तपर करणाभावेतु शुभन्जा किलालपा इत्याभ्याम् 'अन्येभ्योऽपि दृश्यन्ते' (3·2·178) इति विजन्ताभ्यां टापो दुर्वारतया सवर्णदीर्घैकादेशे कृते 'हलङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहल्' (6·1·69) इति सुलोपापत्तिः दुर्वारास्यात् ।

नचात्र अजादिषु अज, अश्व, वाल, वत्स इत्यदन्तानां पाठोव्यर्थ स्तेभ्यः 'अतः इत्येव टाप प्रत्ययः सुलभः इति वाच्यम्, यतो दीक्षितेन' अजाद्युक्तिङीषोङीपश्च बाधनायेत्युक्तम् ।[3]

काशिका कारेणापि 'अजादि ग्रहणंतु क्वचिज्जाति[4] लक्षणे ङीपि प्राप्ते, क्वचिन्तु पुंयोग लक्षणे,[5] क्वचिन्तु पुष्पलोन्तर[6] पदलक्षणे क्वचित्तु वयोलक्षणेङीपि[7] क्वचिट्टिल्लक्षणे ।[8] हलन्तानांत्वप्राप्त एवं कस्मिश्चिच्च द्वाब्विधीयते' इत्युक्तम् ।

---

1. नञ्पूर्वकाज्जनेः 'अन्येष्वपिदृश्यते' (3·2·1·1) इति रूढोयं छाग शब्दः ।
2. खट्यते आकाङ्क्ष्यते या सा इत्यर्थे 'खटवआकाक्षायाम्' इत्यतः 'अशु प्रुषिकट कणि खटि विशिभ्यः क्वन्' (उणा. 1. पा. 151 सू.) इति क्वनि खट्व शब्दः साधुः ततष्टाबित्यर्थः ।
3. वै. सि. कौ. स्त्री. प्र. प्र. पृ. (131)
4. 'जातेरस्त्री विषयादयोपधात्' (4·1·63) इत्यनेनेत्यर्थः ।
5. 'पुंयोगादाख्यायाम्' (4·1·48) इत्यनेनेत्यर्थः ।
6. 'पाककर्णपर्णपुष्प फलमूलबालोन्तरपदाच्च' (4·1·64) इत्यनेनेत्यर्थः ।
7. 'वयसिप्रथमे' (4·1·20) इत्यनेनेत्यर्थः ।
8. 'टिड्ढाणञ्द्वयसज्दघनञ्मात्रच तयप्ठक्ठञ्कञ्क्वरपः' (1·4·51) इत्यनेर्थत्वः ।

तत्रममाशयः—

अजा,[1] एडका,[2] अश्वा,[3] चटका,[4] मूषिका इत्यत्र अदन्त प्रयुक्त प्राप्तस्य टापः 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इतिङीष्बाधकः तथा बाला[5],

1. क्रुञ्चा, देवविशा, उष्णिहा इत्यादावितिशेषः।

2. 'मेषी' इति तदर्थः।

3. अश्नुते व्याप्नोत्यध्वानमित्यर्थे, अशु प्रुषि लटि कणि खटि विशिभ्यःक्वन्' (उणा 01/151) इति क्वन्।

4. 'चट् स्फुट भेदने' इत्यतः 'क्युन शिल्पीसंज्ञयोः' (उणा. 2/200) इति-क्युन्। "चटकः कलाविङ्कः स्यात् तस्य स्त्री चटकातयोः 'चटकः पक्षिजाति विशेषः।

5. क्रैयादिकात् 'मुषस्तेये' इत्यतः 'मुषेर्दीर्घश्च (उणा. 2/200) इति किकन् दीर्घश्च इकार मध्यो मूषिक शब्द "चुचुन्दरीगन्ध मूषीदीर्घ देहीतु मूषिका" इत्यमरः दीर्घोपधात् 'क्युन शिल्पसंज्ञयोः इति संज्ञायाम् क्युन् तत्र स्त्रियां 'प्रत्ययस्थात्कात्पूर्व-स्यात् इदाइदाप्यसुपः' (7·3·44) इतीत्वम्।

यस्तु संज्ञायां मूषकशब्दस्य जातित्वाभावान्ङीषो प्रादया अदन्तत्वात् टाप्स्यादेवेति गणेपाठश्चिन्त्य इति स एव चिन्त्यः। संज्ञायाम् इत्युक्तावपि जातित्वानपायात् व्याघ्री इति वत् प्राप्तस्य जातिलक्षणङीषोवाधनाय गणेपाठस्यावश्यकत्वात्। क्युनादि शब्देन रूढिरेव गृह्यते नत्वेक व्यक्तिबोधकं संकेतसम्बन्धेन तच्छब्द वत्वरूप संज्ञात्वम्। अतएव 'व्याध्री' इत्यत्र जातिलक्षण ङीष् सिध्यति। अवयवार्थमनपेक्ष्य तत्तज्जात्यवच्छिन्न बोधकत्वात् संज्ञाशब्द व्यवहारः।

वस्तु तस्तु 'त्रयी शब्दानां प्रवृत्तिः, न सन्ति यदृच्छाशब्दा इति भाष्यमते सर्वेषां शब्दानां जातिवाचकत्वमेव।

वत्सा[1], होडा[2], मन्दा[3], विलाता[4] इत्यत्र अदन्तत्व प्रयुक्तस्य टाप: 'वयसिप्रथमे' (4·1·2) इति ङीष् बाधक: इत्यनयो बधिकयो ङीष् ङीपो: 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायेन बाधनार्थमत्र[5] अजाद्युक्तिरिति।

वस्तुतस्तु अदन्तत्वादेवाजादिभ्य: टाप्सिद्धेजादिग्रहणमेव व्यर्थम्। व्यर्थसद्बाध बाधनार्थम् चरितार्थम्। तत्र अजशब्दश्छाग वाचकत्वेना जत्वस्यावयवसंस्थानव्यङ-गायत्वेन आकृतिग्रहणाजाति: ' इति लक्षणक्ष्यत्वम्। 'अजाछागी शुभच्छाग वस्तच्छगलका अजे' शुभादि पञ्चकोऽजे (अम. 2/ /9 वर्ग) इति। नच हलन्तेभ्य: 'क्रुञ्चा', उष्णिहा, देवविशा-इत्यादि सिद्धयर्थमजादिग्रहगम्, तेषामपि अदन्तत्वस्य 'ङ्-याप्प्रातिपदिकात्' (4·1·1) इति सूत्रे भाष्ये उक्तत्वात्।

तथाहि 'आब्ग्रहणमपि न कर्त्तव्यम्। आबपि अकारान्ताद्विधीयते। तत्रैकादेश:। एकादेशे कृतेऽन्तादिवद् भावात्प्रातिपदिकसंज्ञया भविष्यति। यस्तर्हमनकारान्तात् क्रुञ्चा, उष्णिहा देवविशेति। अत्राप्यकारान्ताद् वृत्तिलक्ष्यते। 'क्रुञ्चानालभेत, उष्णिहककुभौ देवशिञ्च मनुविशञ्चेति। इति।

---

1. बल् प्राणने इत्यत: 'ज्वलितिकसन्तेभ्योण:' (उणा. 1/14) इति ण प्रत्यय: ज्वलिति इत्यत्र इति शब्दोऽि आयर्थक: बाल् शब्दात् स्त्रीयां टाप्। "मूर्खेऽर्थऽकेऽपि बाल: स्यात्" इत्यमर: (3/1/4 श्लो.) आषोडाश शाब्दाकन्या च' इति शब्दस्तोमनिधि:। बाल शब्दोहि वयो वाचक:।

2. 'वत्सौतरणक वर्षोद्वौ इत्यमर:' (2 का. 225 श्लो.) 'वत्स: पुत्रादिवर्षयो:' इति मेदिनी।

3. होडशब्दो हि वयो वाचक: सच किदृक्वयो वाचक: इति कोशादितो न ज्ञायते।

4. मन्द शब्दोऽपि वयोवाचक: किदृक्वयोवाचक: इति कोशादितो न ज्ञायते।

5. विलात शब्दोऽपि वयोवाचक: सच किदृक्वयोवाचक: इति कोशाहितो न ज्ञायते।

6. (परि. शे. परि. 59)

नच 'टायामादेशः' क्त्वायामनिट' इति भाष्यप्रयोगसिद्धये 'अजादिग्रहणम्' तत्र टाप्त्वारोपेणैव याजादि कार्य्याणामुपपादनीयत्वात् । अन्यथा ङ्याप्सूत्रस्थ भाष्य विरोधः । तथाहि—इह तर्हि 'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) बहुराजे, बहुराजा इति ।

अयम्भावः—अत्र टिलोपे नेकादेशाभावादन्तवद्भावेन प्रातिपदिकत्वं न स्यादिति सुपोऽनापत्तिः । यदि तु टा शब्दात् क्तवाशब्दात् टाप् स्यात्तदा 'आतो धातोः' (6·4·140) इति सूत्रे धातु ग्रहणम् आबन्तभिन्नपरम् । अतएव 'आतोऽमाप' इति वक्तव्यम् इति वार्तिकेन न विरोधः । टा आप् क्त्वा आप् इत्यत्र' आतोधातोः' इत्यालोपे एकादेशाभावेनान्तवद्भावाप्रवृत्तौ टाबर्थमेव आब्ग्रहणमिति डाप्पर्य्यन्तानुधावनं भाष्यकृतोविरुध्येत ।

तथा च 'टायाम्' 'क्त्वायाम्' इति सिद्धये अजादिग्रहणस्य नावश्यकता, तत्र भाष्यप्रयोगस्य आप्त्वारोपेणैवोपपत्तेः ।

वस्तु तस्तु 'नमुने' इत्यत्र 'ने' इतस्य सिद्धये 'आतोधातोः' (6·4·140) इत्यत्र 'आतः' पदम् स्त्रीबोधक शब्दघटकाकारभिन्नोयआकारस्तत्परम् । ना, टा क्त्वा इत्यादीनां स्त्रीबोधकत्वेन तद् घटकाकारस्यैव सत्वेन लोपाप्राप्त्या एकादेशेऽन्तवद्भावेनैव प्रातिपदिकत्वमिति डाप्पर्य्यन्तानु धावनं भाष्य कृतो न विरुद्धम् । इत्थमजादिग्रहण बाधक बाधकनाथमेव नान्यार्थम् इति । 'कुञ्चाद्यतः' इति न्यास कल्पना मुधैव ।

अत्रेदवेध्यम्—दीक्षितेन वैयाकरणसिद्धान्तकौमुधांम् 'अजाद्यतष्टाप्' (4·1·4) इत्यस्य 'अजादीनामकारान्तस्य च बाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यादित्यर्थं ब्रुवता 'अजादि' इति 'सुपांसुलुक' (7·1·39) इति लुप्त षष्ठीकम् 'अतः' इत्यऽपि षष्ठ्यन्त मित्याकुतम् । तेन 'स्त्रियाम्' (4·1·3) इत्यधिकारलभ्य स्त्रीत्वम् अजादेः, अदन्तस्य च विशेषणमिति सिद्धयति । अतः पञ्चाजी[1] इत्यत्र

---

1. पंचानामजानां समाहारइत्यर्थे 'तद्धितार्थोत्तर पदसमा हारे च' (2·1·51) इति समा । 'द्विगुश्च' (2·1·23) इति द्विगु संज्ञायाम् 'अकारान्तोत्तर पद द्विगुः स्त्रियाःमिष्टः' (वा. 2·4·17) इति वार्तिकेन स्त्रीत्वे 'द्विगोः' (4·1·21) इति ङीपि 'पंचाजीद्धयति ।

अजशब्दवाच्य स्त्रीत्वाभावान्ङीपं बाधित्वा टाब् भवति । 'पञ्चाजे' ति समुदाया-र्थगतंचित्र स्त्रीत्वम् ।

नचात्र प्रत्ययविधौतदन्तविधिनिषेधात् पंचाज शब्दात् टापोप्राप्त्या ङीबेव स्यादिति दोषाभावः, अमहत्पूर्वाग्रहणेनानुपसर्जने स्त्रीप्रत्यये तदन्त-विधेर्ज्ञापनात् ।

नच प्रत्येकस्य समुदायानतिरिक्तया अजादि पद वाच्यार्थगत स्त्रीत्वा क्षतिरति दोषतादवस्थ्यम्, अजादि चयद वाच्यं तदितर पदवाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाबित्यर्थे नादोषात्, प्रकृते अजादीतर पञ्चाजपद वाच्यत्वस्यापि स्त्रीत्वे सत्वेन न टाप् । यद्वा शब्दोऽपि शाब्दबोधे भासते । अयं भावः षट्कं प्रातिपदिकार्थः ।

उक्तञ्च —

"नसोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।। इति ।
(वाक्य प. का. 123)

"ग्राह्यत्वं ग्राहकत्वंच द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ।।" इति ।
(वाक्य प. का. 55)

"विषयत्व मनादृत्य शब्देनार्थः प्रकाश्यते ।" इति ।
(वाक्य प. का. 56)

इति नियमेन अजादिपदावच्छिन्ना अजत्वादिधर्मेण साक्षादवच्छिन्ना इयम्च था धर्मिता तादृश धर्मितानिरूपित स्त्रीत्वनिष्ठ प्रकारताक बोध तात्पर्येणोच्च-रिताद जादिरूपात् प्रातिपदिकात् टाबित्यर्थेन 'पंचाजी' इत्यत्र न टाप्प्रसङ्गः । तदाह दीक्षितः

"अजादिभिः स्त्रीत्वस्य विशेषणान्नेह—अत्रहि समाहार निष्ठं स्त्रीत्वम्" इति (वै. सि. कौ. स्त्री. प्र. प्र. पृ. 660)

टाप् प्रत्ययविधायकं द्वितीयं सूत्रं—'टाबृचि' (4·1·9) इति। अत्र 'पादोऽन्यतरस्याम्' (4·1·8) इत्यतः पाद् इति ङ्याप् प्रातिपदिकादित्यतः प्रातिपदिकादिति 'स्त्रियाम्' (4·1·3) इति चानुवर्तते। तत्र पाद् इति प्रातिपदिकादित्यत्राभेदेन विशेषणम्, अतः 'येनविधिस्तदन्तस्य' (1·1·72) इति सूत्रेण पाद् शब्दे तदन्तविधिः। एवं च ऋचिवाच्यायां पाच्छब्दान्तात् प्रातिपदिकात् स्त्रियां टाप् स्यात् इति सूत्रार्थः।

अस्य सूत्रस्योदाहरणं 'द्विपदाऋक्' एकपदा। अत्र द्वयोरप्युदाहरणयोः द्वौ पादौ यस्याः एकः पादौ यस्याः इति लौकिक विग्रहे द्वि औ. पाद, औ एक सु, 'पाद' सु इत्यलौकिक विग्रहे 'अनेकमन्यपदार्थे' (2·2·24) इत्यनेन बहुव्रीहि समासे प्रातिपदिकत्वात् सुब्लुकि 'संख्यासुपूर्वस्य (5·4·140) इति सूत्रेण पाद् शब्दान्तस्याकारस्य लोपे 'टाबृचि' (4·1·9) इत्यनेन टापि 'पादःपत' (6·4·130) इत्यनेन पाच्छब्दस्य पदादेशे द्विपदा एकपदा इति रूपं सिध्यति।

द्विपदाऋक एकपदा इत्यत्र 'पादोऽन्यतरस्याम्' (4·1·8) इति सूत्रेण पाक्षिको ङीप् प्राप्तः तं ङीपमपवादत्वेन बाधित्वा 'टाबृचि' (4·1·9) इत्यनेन टाब् भवति, तेन ऋचि वाच्यायां द्विपदा एकपदा इत्यादि एक विधमेव रूपम्। तदेतत् प्राचीनमतम्।

नागेश भट्टेन लघुशब्देन्दुशेखरे एतद्विपरीतं स्वमतं व्यवस्थापितम्। अत्रोक्तम्—'शेषाद्विभाषा' (5·3·154) बति सूत्र भाष्ये 'शेषाद्विभाषा' इति कपो भावे प्रतिपदविहित समासान्तानां सावकाशत्वमुक्तम्। तद्रीत्या 'पादोऽन्यतरस्याम्' (4·1·8) इति ङीपो भावे 'टाबृचि' (4·1·9) इत्यस्य सावकाशत्वेन प्राचाम् अपवादत्व कथनं संगतं न भवति, सावकाशत्वे अपवादत्वस्य अभावात्। एवं च पाद शब्द समानार्थस्य पद शब्दस्य सत्वे च प्रमाणमपि प्रदर्शितम्।

तत्र भाष्येश्रूयते च छन्दसि तस्याः सप्ताक्षरमेकं पदम्, एकः पाद इत्यर्थः इति। द्विपदी, द्विपदा, एकपदी, एकपदा इति रूपद्वयस्यात् नत्वमेकमेव।

वस्तु तस्तु 'टाबृचि' (4·1·9) इत्यत्र 'पादोऽन्यतरस्याम्' (4·1·8) इति सूत्रात् 'अन्यतरस्याम्' इत्यपनु वर्तते अतः 'पादोऽन्यतरस्याम्' इत्यस्य वैकल्पिकत्वेन ङीपो भावे टाप्, तस्यापि वैकल्पिकत्वेन टाबभावे स्त्रीप्रत्यय रहितं तृतीयं रूपं

भवतीति सिद्धान्तः । तेन ऋचिवाच्यायाम् एकपदी, एकपदा, एकपात्, द्विपदी, द्विपदा, द्विपात् इति रूपपत्रयं सम्पद्यते । अन्यथा 'टावृचि' (4·1·9) इत्यत्र 'पादोऽन्यतरस्याम्' (4·1·8) इति सूत्रात् 'अन्यतरस्यामं' इत्यस्य अनुवृत्तौ 'ङ्याप्प्रातिपदिकात्' इति सूत्रस्थं भाष्यं विरूध्येत । तत्र हि ऋचिवाच्यायामपि पाद शब्द समानार्थ पद शब्दमङ्गीकृत्य एकपदा, द्विपदा इत्यादि रूप सिद्धौ 'टावृचि' (4·1·9) इति सूत्रं प्रत्याख्यातम्, ऋचिवाच्यायामपि ।

एवं च 'टावृचि' (4·1·9) इत्यस्य प्रत्याख्याने पाद शब्देन समासे 'पादोऽन्यतरस्याम्' (4·1·8) इत्यनेन वैकल्पिके ङीपि द्विपदी द्विपात् एकपदी एकपात् इति रूपद्वयम् । पद शब्देन समासे च द्विपदा एकपदा इति तृतीयं रूपमिति 'टावृचि' इत्यस्य प्रत्याख्याने रूपत्रयम् । 'टावृचि' (4·1·8) इति सूत्रस्य सत्वेतु 'पादोऽन्यतरस्याम्' (4·1·8) इति ङीपि द्विपदी, एकपदी, तदभावे च 'टावृचि' (4·1·9) इत्यनेन टापि द्विपदा एकपदा प्रति रूपद्वयमेव भवति । नतु द्विपात् एकपात् एकपात् इति तृतीयं रूपम् । तदेवम् आरम्भपक्षे रूपद्वयं प्रत्याख्यानपक्षे रूपत्रयमिति आरम्भ प्रत्याख्यानयोः फलभेदापत्तिः फलैक्ये हि प्रत्याख्यान सम्भवति नतु फलभेदे, तस्मात् आरम्भ प्रत्याख्यानयोः फलैक्याय 'टावृचि' इत्यत्र अन्यतरस्याम् इत्यवश्यमनुवर्तनीयम् । तेनारम्भ पक्षेऽपि रूपत्रयमिति फलैक्यं संपद्यते ।

अत्र प्राचीनानुयायिनः 'सत्यपिसम्भवेबाचनंभवति' इतिरीत्या 'पादोऽन्यचरस्याम्' (4·1·8) इत्यस्य वैकल्पिकत्वेन ङीपोऽभावे 'टावृचि' (4·1·9) इत्यस्य सावकाशत्वेऽपि अपवादत्वं सम्भवति । अतः एकपदा, द्विपदा इत्यादौ कथितमेव ऋचिवाच्यामपि रूपम् । प्रत्याख्यानपक्षेण फलैक्यमस्तु । यतः प्रत्याख्यानपक्षे ऋचिवाच्यायां पादन्तस्य अनभिधान कल्पनयापि परिहर्तुं शक्यते । रूपं च ऋचित्वाच्यायामपि 'टावृचि' (4·1·9) इति सूत्रारम्भ तत्प्रत्याख्याने च द्विपदा एकपदा इत्येकविधमेव रूपम् । नतु रूपत्रयम् इति वदन्ति ।

तदेतत् खण्डितं लघुशब्देन्दुशेखरे—"पादन्तस्य ऋच्यनभिधानम् इति तु न भाष्याशयः ङीबन्त प्रयोगस्य सूत्ररीत्येष्टस्यासिद्ध्यापत्तेः" इति ।

शेखरग्रन्थमिमं व्याचक्षणाणेन म. म. नित्यानन्दपन्तमहाशयेन-लिखितम् ।

न च प्रत्याख्यान पर भाष्यमते पाच्छब्दान्तस्य अनभिधानमिति 'एकपदा' इत्येकमेव रूपं, सूत्रकारमते 'टाबृचि' इति सूत्रकरणादेव नानाभिधानमिति अपवादत्वाभावपक्षे एकपदी एकपदा इति रूपद्वयमिति फल भेदः स्पष्टमेवेति अनभिधान न कल्पनीयं किन्तु तत्पक्षे रूपत्रयस्येष्टत्वमिति ङीषन्तप्रयोगस्येष्टत्व कथनं नासंगमितिवाच्यम्. सूत्रकारमतेपि टाबुदक्ष्येश्यत्वेनापरिकल्पितस्य ऋच्वाचक पाच्छब्दान्तस्यानभिधानकल्पने अपवादत्वाभवापादितफलभेदाभावेन एतादृशकपोलकल्पनाया अनुचितत्वात् । ततश्च ङीबन्त प्रयोगस्येष्टत्व कथनमयुक्तमेवेति चेत् ।

अत्र केचित् 'षेषाद्विभाषा' (5·4·54) इति सूत्रस्थ भाष्यविरोधाभावायापवादत्वाभावस्य पूर्वमेव सुसाधितत्वेनेष्टप्रयोगासिद्धिरिति वदन्ति तेतु समुपेक्ष्याएव । 'नषट्स्वस्रादिभ्यः' (4·1·10) इत्यनेन टाब् ङीपो रूभयोनिषेधार्थम् 'ऋन्नेभ्यः' (4·1·15) इत्यतो ङीबनुवर्य रावश्यकी । तस्यां मण्डुकप्लुतौ मानाभावेन 'टाबृचि' (4·1·9) इत्यत्रापि तदनुवृत्तिर्निर्बाधा ।

अन्ये तु ङीप् पदे मण्डकानुवृत्ति प्रयोजकता रितत्वस्यैव कल्पनेन 'टाबृचि' इत्यत्र ङीबनुवृत्यभावेन सूत्रमते एकपदी इत्यस्यानिष्टत्वेन अनभिधाने फलभेदः इत्याहुः ।

टाप् विधायक प्रथमं वार्तिकम्[1]—'मूलान्नञः' । इति । 'नञ् परोयो मूलशब्दस्तस्मों जातिलक्षणोङीष् ने'ति वार्तिकार्थः । अजादिगणेपाठेतु[2] 'नञः परान्मूलात् टाबित्यर्थोवार्तिकस्य । 'अमूला'[3]—इति चास्योदाहरणम् । 'शतमूली'[4]—इत्यत्र तु ङीषेव ।

---

1. 'पाककर्ण पर्णपुष्पफलमूलबालोत्तर पदाच्च' (4·1·64)
2. 'फले विशेषाभ्भवात् दीक्षितने वै. सि. कौ. अजादिगणे पठितमिदम्' ।
3. 'अमूलशब्दात् टाप्' 'नास्तिमूलं यस्ये'तितदर्थः । औषधिविशेषः ।
4. शतमूलशब्दात् 'पापकर्ण' (4·164) ङीषिरूपम् ।

टाप् विधायकं द्वितीयं वार्तिकम्—'सदच्[1]काण्डप्रान्त-शतैकेभ्यः पुष्पात्' (वा. अथवा ग. सू. 4·1·4) इति। 'सत्, अच्, काण्ड, प्रान्त, शत, एक-अइ इत्येतेभ्यः परोयः पुष्पशब्दः तस्मादपि 'पाककर्णपर्णपुष्पफलमूलबालोत्तर पदाच्च' ङीषनभवति किन्तु टाबेवेति वार्तिकार्थः। सत्पुष्पा,[3] प्राक्पुष्पा[4] प्रत्यक्पुष्पा,[5] काण्डपुष्पा[6], प्रान्तपुष्पा[7], शतपुष्पा,[8] एकपुष्पा[9], — इत्युदाहरणानि सन्ति-चास्य।

टाप् विधायकं तृतीयं वार्तिकम्— 'संभस्त्राजिनशणपिण्डेभ्यः[10] फलात्' (ग. सू. 4·1·64) इत्यस्य 'समं भस्त्रा', अजिन, शण. पिण्ड, शब्देभ्यः परो यः फल शब्दस्तस्मादपि 'पाककर्णपर्णपुष्पफलमूलबालोन्तरपदाच्च' (4·1·6) इति ङीष् न भवति टाबेवेत्यर्थः, सम्फला[11], भस्त्रफला[12], आर्जनफला[13], शणफला[14]. इति चोदाहरणानि सन्ति।

---

1. अत्र 'अच्' इतिलुप्तनकारोगृह्यते।
2. अष्टा. 4·1·64
3. शत पुष्प शब्दात् टाप् 'सन्ति = साधूनि· विद्यामानानि पुष्पाणियस्यां इति तदर्थः।
4. प्राक् पुष्पशब्दात् टाप्। प्राञ्चि—पूर्वकालिकानि पुष्पाणि यस्याः इति तदर्थः।
5. प्रत्यक् पुष्प शब्दात् टाप्। प्रत्यञ्चि = पश्चिमानि पुष्पाणि यस्या इति तदर्थः।
6. काण्ड पुष्पशब्दात् टाप्। काण्डे पुष्पाणियस्या इति तदर्थः।
7. प्रान्त पुष्पशब्दात् टाप्। प्रान्तेपुष्पाणियस्था इति तदर्थः।
8. शतपुष्पशब्दात् टाप्। शतं पुष्पाणियस्या इति तदर्थः।
9. एक पुष्पशब्दात् टाप्। एकं पुष्पं यस्या इति तदर्थः।
10. वस्तुतो नेदं गणसूत्रं किन्तु भाष्य वार्तिकम् द्र. म. भा. 4·1·64
11. सम्फलशब्दात् टाप्। 'समृद्धानिफलानि यस्या' इति तदर्थः।
12. भस्त्रफल शब्दात् टाप्। भस्त्रेव फलानि यस्या तदर्थः। ङ्यापोः 'संज्ञाच्छन्दसोर्बहुलम्' (6·3·63) इत्यनेन भस्त्राशब्दघटकारस्यस्वत्वम्। 'भस्त्रा चर्म प्रवेशिका' (अम. 2·1·34)
13. अजिन फलशब्दात् टाप्। 'अजिनमिवफलं यस्या' इति तदर्थः। औषधि विशेषस्य इयं संज्ञा।
14. शणफल शब्दात् टाप्। औषधि विशेषस्य इय संज्ञा।

टाप् विधायकं चतुर्थं वार्तिकम्[1]—'शूद्राचामहत्पूर्वाजातिः' (वा. 4·1·4) इति। अत्र—वाक्यत्रयम्। 'शूद्राच' इत्येकम्। 'अमहत्पूर्वा' इति द्वितीयम्। 'जातिः' इति तृतीयम्। 'जाति'रित्यास्याऽभयत्रसम्बन्धः। शूद्र शब्दः स्त्रीत्वेद्योत्ये टापं लभते शूद्रजातिविशिष्टा चेद्वाच्या' इति प्रथमं योगार्थः। महत्पूर्वः शूद्रशब्दः टापं न लभते समुदाय (शूद्रशब्दान्तशक्त्या) शक्त्या जातिश्चे द्वाच्या इति द्वितीय योगार्थः। तेन शूद्रत्वजातिविशिष्टास्त्री शूद्रा जातिरित्युक्तः प्रयोजनमतु शूद्रत्व जातिविशिष्टस्य स्त्री शूद्रा अशूद्रा वा तत्र शूद्रीत्येवभवतीति। यतः पुंयोगादाख्यायाम् (4·1·42) इति ङीषेव भवति न टाबपि। तथा चामरः (20 मा. 12 श्लो.)—

,शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च।

आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥ इति।

यदा महाशूद्र शब्दः समुदाय शक्त्याऽऽभीरजातिवाचकः, अवयवशक्त्या शूद्रत्वजातिवाचकश्च तदाऽवयवशक्त्या शूद्रत्वावच्छिन्नधर्मितानिरूपितस्त्रीत्व निष्ठ प्रकारताप्रयोजक शूद्र शब्दान्तप्रातिपदिकात् प्राप्तस्य टापः समुदाय शक्त्या आभीरत्वावच्छिन्न धर्मितानिरूपित स्त्रीत्व निष्ठ प्रकारताप्रयोजनकत्वस्यापि सत्वेन समुदायशक्त्या जातिश्चेन्महत्वपूर्वक शूद्रशब्दान्तातप्रातिपदिकात् टाप् न इति निषेधात् हि टाप् न भवति, किन्तु 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इति सूत्रेण ङीषेवेति 'महाशूद्री' इत्येव। यत्र तु समुदायशक्त्या जाति न विवक्ष्यते तत्र 'महाशूद्रा' महत्वविशिष्टा शूद्रा इत्यर्थे भवति। समुदाय-शक्त्यवयव शक्त्युभयविवक्षायां निषेधः, अवयव शक्तिमात्रविवक्षायां न निषेध इति यावत्।

एवञ्च महत्पूर्वक शूद्रशब्दे जातिविशिष्टत्वरूपं निषेधप्रयोजक-जातिवाचकत्वं ग्राह्यम्। वैशिष्ट्यञ्च स्वनिष्ठप्रकारताकोपस्थितिजनकत्व स्वाच्छिन्न विषयतानिरूपित विषयितानिरूपकोपस्थित्यजनकत्वोभयसम्बन्धेन। स्वम् = आभीरत्व जातिः।

---

5. वस्तुतो नेदं गणसूत्रं किन्तु भाष्यवार्तिकम्, द्र. म. भ. 4·1·64

निषेध्य सम्पर्कजातिवाचकत्वञ्च जातिविशिष्टत्वम् वैशिष्ट्यञ्च स्वनिष्ठप्रकारताकोपस्थितिजनकत्व—स्वावच्छिन्न विषयतानिरूपित विषयता निरूपकोपस्थिति जनकत्वोभयसम्बन्धेन । स्वम् शूद्रत्वजातिः । नच वृत्तौ समुदायशक्तिरेव नावयवशक्तिरिति वाच्यम्, निषेधविधि वैयर्थ्येन प्रकृतेऽवयव शक्तेरपि कल्पनात् ।

नच 'अमहत्पूर्वा' इत्यत्र जातिरित्यस्या सम्बन्धेऽपि महती चासौ शूद्रा चेत्यर्थके समासात्प्रागेव 'शूद्रा च' इत्यनेन टाप् स्यादित्यदोष इति वाच्यम् । —यतो ब्राह्मणः क्षत्रियो वा किन्तु शूद्र इति जातिमात्रविवक्षा लिङ्गविवक्षयाच, समासात् प्राक् स्त्रीप्रत्ययप्राप्त्या कुक्कुट शब्दस्याण्ड शब्देन समासे 'कुक्कुटाण्डम्' इत्यस्यसिद्ध्या 'कुक्कुट्यादीनामण्डादिषु' इति पुवंद्भावविधायकं वार्तिकं प्रत्याख्यातम् तथात्रापि समासे ततो यदि स्त्रीत्वविवक्षा तदा टाप् भवति ।

जातिरित्यासम्बन्धेतु समुदायशक्त्या जातेरनुपस्थित्या निषेधा प्राप्तिः । जातिमात्रविवक्षायां 'सामान्येनपुंसकम्' इति नपुंसकत्वन्तु न, यत्र विशेषलिङ्गविवक्षा लिङ्गत्वेन लिङ्गविवक्षा च तत्रैव तत्प्रवृत्तेः । प्रकृते तु न लिङ्गत्वेन लिङ्गविवक्षति नात्र तत्प्रवृत्तिः ।

यद्वा 'उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं-बाधते' इति न्यायेन समासात्प्रागपि टाप् न स्यात् । वस्तुतस्तु नात्रोक्त न्यायाशयः । प्रकृते चापवादनिमित्त भूतो महत्पूर्वक शूद्र शब्दो न तु केवल शूद्र शब्द इति समासात् प्राक् केवलशूद्रशब्दात् टाप् दुर्वार इत्युक्तरीत्यैव जातिसम्बन्धस्य फलं बोध्यम् ।

ननु आभीरत्व जातिबोधक महाशूद्रे आभीरगत स्त्रीत्वस्यैव सत्वेन शूद्र-शब्दरूपाजादि वाच्यार्थनिष्ठ स्त्रीत्वाभावात् टापो प्राप्तिरिति चेन्न, आभीरस्यापि शूद्रत्वेन शूद्र पदवाच्यनिष्ठ स्त्रीत्वाक्षतेः । तथाहिक्षत्रियात् शूद्रायामुत्पन्ना उग्रा । तदुक्तं शंखस्मृतौ—"वैश्याशूद्रयोस्तु[1] राजन्यान्माहिष्योग्रौसुतौ स्मृतौ" इति । ब्राह्मणादुग्रायामुत्पन्ना आभीरी । अत्र उग्रा शूद्रातत्रोत्पन्नापि शूद्रैव । अनुलोमसङ-

1. (परि. शे. परि. 66)

करैराणां मातृवृत्ति जात्यारोपात् । अनुलोमशङ्करो नाम उच्चवर्णाद् नीचवर्णा-सूत्पन्नः । अत्र ब्राह्मण उच्चवर्ण उग्रा च नीचवर्ण शूद्रासूत्पन्नेति मातृवृत्ति शूद्रत्वा-रोपा दुग्रा शूद्रा । तत्रोत्पन्ना आभीरी शूद्रा ।

अन्ये तु यत्र शुद्रशब्दे पर्य्याप्त्या जातिवाचकत्वं स्त्रीत्वञ्च तत्रैव टाप् । आभीरवाचक महाशूद्रशब्दे तु न पर्य्याप्तया शूद्रशब्दगत जातिवाचकत्वम् किन्तु समुदाय एवेति टापोप्राप्तया अमहत्पूर्वा 'इति त्याज्यमेव । अतएव तत्र महाशूद्र इत्येव व्यवहारो नतु शूद्र इति शूद्रादुत्तमत्वात्तस्येत्याहुः । एवञ्च 'त्यदादीनि च' (1·1·74) इति सूत्रे 'आभीराजात्यन्तराणि, इति भाष्यमपि स्वरसतः संगच्छते ।

वस्तु तस्तु महच्छब्दस्य शूद्रशब्देन समासेऽपि भाष्यप्रामाण्यात् शूद्र-शब्दस्यार्थवत्त्वं (जातिवाचकत्वम्) स्वीकार्य्यम्, अन्यथा शूद्रशब्दोऽजादिषु पठ्यते । तत्र कः प्रसङ्गो महत्पूर्वात् स्यात् । नैव प्राप्नोतीतिनार्थः प्रतिषेधेन । तदन्त-विधिना प्राप्नोति इति भाष्यं जातिवाचक शूद्रशब्दान्तात् टाप् प्राप्नोतीत्यर्थकमेव स्यात् । अन्यथा शूद्रशब्दस्यानर्थकतया टापोऽप्राप्त्या तदर्थाधावनं भाष्यकृतो व्यर्थमेव स्यात् ।

तस्मात् प्रकृते आभीरोऽपि शूद्र एव । नच 'त्यदादीनिच' (1·1·74) इति सूत्रे 'आभीराजात्यन्तराणि' इति भाष्य विरोधः, आभीरपदप्रतिपाद्या आभीरा जात्यन्तराणि ('शूद्रभिन्नाः') इत्यर्थकत्वेनाविरोधात् । महाशूद्र पदप्रतिपाद्यस्तु शूद्र एवेति न दोष इत्युपाध्यायाः ।

शेखरकृता तु 'यत्तु शूद्राभीरमित्यादौ सामान्य विशेषवाचित्वाद् द्वन्द्वाभावमाशङ्क्य' 'आभीराजात्यन्तराणि' इति 'त्यदादीनि च' (1·1·74) इति सूत्रे भाष्ये उक्तम्, तत्तु आरोपाभिप्रायेणेति न तद्विरोधः इत्युक्तम् ।

अत्रेदमवधेयम्—अजादिगणे शूद्रा इत्येव पाठ्यम् । जातिरिति व्यर्थम् । नचैवम् पुंयोगलक्षण ङीषोऽपि टापाबाधापत्तिः, पुंयोगे पुरुषगतधर्मस्य स्त्रिया-मारोपेणैव पुंवाचकशब्दस्य स्त्रीबोधकतया गौणार्थत्वेन गौणमुख्यन्यायेन 'शूद्राचव' इत्यस्य गौणे प्रवृत्तेः । 'अमहत्पूर्वा' इत्यपि व्यर्थम् । महाशूद्र इति

समुदाय एव जात्यन्तरे वर्त्तते । तद्वारकशूद्रस्य वृत्त्येकदेशत्वे नानर्थकतया शूद्रशब्द-वाच्यार्थगतस्त्रीत्वा भावेन टापो प्राप्तेः ।

याः तु महती शूद्रा तत्र टाबेवेष्यते इति मनोरमाकारः । गौणमुख्यन्यायः पदकार्ये एव न प्रातिपदिककार्य्ये, तादृगलाक्षणिकस्याप्रसिद्धस्य संज्ञादेरेव वा गौणं न्याय विषयत्वेन न्यायेन पुंयोगे टाप आपादयितुमशक्यतया 'जातिः' इति वाच्यमेव, भाष्यस्वारस्येन महाशूद्रशब्दघटक शूद्रशब्दस्याप्यर्थवत्त्वेन प्राप्तस्य टापो-वारणाय 'अमहत्पूर्वा' इत्यप्यावश्यकमिति नागेशः ।

'क्रुञ्च' इत्यादित्रयोऽपि हलन्ता इत्येके । भाष्ये तु 'क्रुञ्चानालभेत उष्णि-हककुभौ, देवविशम्' इति प्रयोग दर्शनाददन्ता एव त्रयः । पचाद्यचा इगुपधलक्षणक प्रत्ययेन चादन्तत्वोपपत्तिः । 'पुंयोगेपीत्ति' — यदा 'ज्येष्ठत्वादि विशिष्ट प्रथमजातेः । इत्यर्थे विवक्षितस्तदादन्त त्वादेव टाप्, ज्येष्ठादेर्वयोवाचकत्वा भावेन ङीपो प्राप्तेजीति वाचकत्वाभावाच्च ङीषो विषयात् । 'पुंयोगे' इति पाठे तु पुंयोगे एव टाप्स्यात् पृथक जातायां न स्यात् । इष्यते तूभयत्र टाबिति 'पुंयोगेऽपि' इत्युक्तम् । यदा ज्येष्ठादेः स्त्रीत्यर्थस्तदा 'पुंयोगात्' इति ङीषं बाधित्वा टाबेव, गणे 'पुंयोगेऽपि' इति अपिघटित पाठ सामर्थ्यात् पुंयोगे आरोपित ज्येष्ठत्व पुरस्कारेण बोधेऽपि न गौणमुख्यन्याय विषयस्तत्र सह्यात्रसिद्धत्वारेव गौणादेन ग्रहणात् तस्य पदकार्यविषयत्वाच्च । जातावरीति-कोकिलकत्वे जातिविशिष्टे-त्यर्थे जातिलक्षण ङीषं कोकिलस्य स्त्रीत्यर्थे 'पुंयोगलक्षणङीषं च बाधित्वा टाबित्यर्थः । "वनप्रियः परभृतः कोकिलः पिक इत्यपि" (अम. 2/5/19) कोकले-आदन्तेऽपञ्चमस्वरमित्यर्थे 'सलिकलमनिषहि' (उणा. 1. अ. 54. सू) इतीलचि कोकिलः इति ।

### 3 डाप्प्रत्ययः

यथाक्षरक्रमप्राप्तम् डाप् प्रत्ययो निरूप्यते । डाप् प्रत्यय विधायक-मेकमेव ।

तथा च 'मन्नन्तात् अन्नन्ताच्च बहुव्रीहेर्डाब्वास्यात्' इति स्पष्टोऽर्थः सम्पद्यते । अत्र डकारस्य 'चुटू' (1·3·7) इति सूत्रेण इत्संज्ञा 'तस्यलोपः' (1·3·9) इति सूत्रेण लोपश्च भवति । अन्त्यस्य बकारस्य तु 'हलन्त्यम्' (1·3·3)

इति सूत्रेण इत्संज्ञा 'तस्य लोपः' तथा च आकारमात्रं प्रत्यय स्वरूपं शिष्यति। सूत्रम् 'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) इति। अत्र 'उभाभ्यामित्यस्य' सूत्र द्वयोपाताभ्याम् इत्यर्थः। सूत्र द्वये च 'मनः' (4·1·11) इति प्रथमम् 'अनोबहुव्रीहेः' (4·1·12) इति द्वितीयं सूत्रं गृह्यते। 'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) इति सूत्रात् पूर्वं ते द्वे सूत्रे पठिते। अतः प्रथमोपस्थितत्वात् ते एव द्वे सूत्रे 'उभाभ्यामित्यत्र उभशब्देन गृह्येते।

तत्र अन्नन्तस्योदाहरणद्वयम्। तत्र प्रथमं 'सीमा', सीमे, सीमानौ, इति एकमुदाहरणं सिद्धान्तकौमुद्यां प्रदर्शितम्। तत्र, सीमेति प्रथमैकवचनस्य, सीमे, सीमानौ इति प्रथमा द्विवचनस्य रूपम्। यद्यपि अन्येषु सूत्रेषु चान्यान्युदाहरणानि प्रदर्शितानि तानि प्रथमैकवचनस्यैव रूपाणि द्विवचनान्तमुदाहरणं नान्यत्र प्रदर्शितम्। अत्र तु एकवचनान्तमुदाहृत्य तत्रापरितुष्यतेव भट्टोजिदीक्षितेन द्विवचनान्तमपि रूपमुदाहृतम्। तत्रेदं कारणं सीमन् शब्दात् डापि डकार पकारयोरित्संज्ञायां लोपे च सति सीमन् आ इतिस्थिते 'यचिभम्' (1·4·18) इति सूत्रेण सीमन् शब्दस्य भसंज्ञायां 'नस्तद्धिते' (6·4·144) इति सूत्रेण 'टेः' (6·4·143) 'अन' इत्यस्य लोपे 'सीम्+आ=सीमा शब्दात् प्रथमैकवचने सो तस्य हल्ङ्यादिलोपे 'सीमा' इति रूपं समायते। तच्चेदं रूपं डाबभाव पक्षेऽपि भवत्येव। 'ऋन्नेभ्योङीप्' (4·1·5) इत्यनेन प्राप्तस्यङीपः 'मनः' (4·1·11) इति सूत्रेण निषेधे सौ 'सीमन् स्' इतिस्थिते, 'सर्वनामस्थानेचासम्बुद्धौ' (6·4·8) इति सूत्रेण उपधा दीर्घे 'सीमान् स' इति स्थिते सकारस्य हल्ङ्यादिलोपे 'सीमान् इत्यत्र नकारस्य 'नलोपः प्रातिपदिकान्तस्य' (8· ·7) इत्यनेन लोपे 'सीमा' इति एवं च डाप्पक्षे डाबभावपक्षेच सीमा इति एक विधिमेव रूपम्।

तथा च डाबविधानस्य प्रयोजनमेकवचनेकिमपि नास्ति। यदि डाब्विधानं न क्रियते तदापि तद्रूपं भवत्येव। अतः अपरितुष्यता भट्टोजिदीक्षितेन द्विवचनान्तरूपमुदाहरण रूपेण प्रदर्शितम्।

तत्रहि डापि 'सीमे' इति रूपम्। डाबभावपक्षे च 'सीमानौ' इति रूपम्। अतः डाप्प्रत्ययस्य विधानं सफलं भवति। 'सीमे' इति रूपं सीमन् शब्दात् मन्नन्तात् डापि 'सीमन् आ' इति स्थिते टिलोपे सीमाशब्दात् प्रथमा द्विवचने औ विभक्तौ 'सीमा औ' इति स्थिते 'औङआपः' (7·1·18) इत्यनेन 'औ' इत्यस्य स्थाने शि'

इत्यादेशे शकारस्य 'लशक्वतद्धिते' (1·3·8) इत्यनेन इत्संज्ञायां 'सीमा ई' इति स्थिते 'आदगुणः' (6·1·87) इत्यनेन गुणेकादेशे एकारे 'सीमे' इति रूपं सिध्यति। डाबभावपक्षेतु सीमन्, शब्दात् औ विभक्तौ 'सर्वनामस्थानेचासम्बुद्धौ' (6·4·8) इत्यनेन उपधा दीर्घे 'सीमानौ' इति रूपं भवति। तत्र यदि डाब्विधानं न क्रियते तदा 'सीमानौ' इति एकमेव रूपं स्यात् नतु 'सीमे' इति। तस्मात् डाब्विधानं सफलम्।

अत्र यद्यपि डाबुदाहरणं 'सीमे' इति नतु 'सीमानौ' इति। तथ च 'सीमानौ' इत्यस्य अ-ोल्लेखो नावश्यकः। तथापि 'अन्यतरस्याम्' अत्यस्य प्रयोजनं प्रदर्शयितुं द्विविधमपि रूपं प्रदर्शितम्। अथ मन्नन्तस्य विषये द्वितीयमुदाहरणं सिद्धान्त कौमुद्यामुक्तम् 'दामा' 'दामे' 'दामानौ' इति तत्र 'हिरण्ययदाम'दक्षिणा इति दर्शनात् दाम शब्दस्य नपुंसकत्वेन स्त्रीप्रत्ययप्रकरणे कथं तदुदाहृतमित्याशङ्क्य सिद्धान्तकौमुद्यां 'नपुंसिदामइत्यमरः' इत्युक्तम्। तस्यामरवाक्यस्य दामन् शब्दः पुंलिङ्गे न प्रयुज्यते अपितु स्त्रीलिङ्गे नपुंसकयोर्लिङ्ग्योरेवेत्यर्थः। यतोहि अमरकोषे एवोक्तम् — निषिद्धलिङ्गशेषार्थम् इति अर्थात् अमरकोशे यस्य शब्दस्य किमपि एकं द्विकं वा लिङ्गंनिषिध्यते तदा तस्य निषेधस्य तात्पर्यमिदं भवति यत् निषिद्धलिङ्गातिरिक्तं लिङ्गं तस्य शब्दस्य भवतीति। प्रकृते च 'नपुंसिदामा' इत्यनेन वाक्येन दाम शब्दस्य पुंलिङ्गत्वं निषिध्यते। तेन दाम शब्दस्य स्त्रीङ्गि नपुंसकलिङ्गं च पर्यवस्यति।

अतएव स्त्रीप्रत्ययप्रकरणे दामन् शब्दोप्युदाह्रियते 'दामा' इति दामन्शब्दात् डापि टिलोपे दामा शब्दात् सौ सोर्हल्ङ्यादि लोपे सिध्यति। तच्चेदं रूपं डाब भावपक्षेऽपि ऋन्नेभ्योङीप्' (4 1·5) इति सूत्रेण प्राप्तस्य ङीपो 'मनः' (4·1·11) इत्यनेन निषेधे सौ उपधादीर्घो सोर्हल्ङ्यादि लोपे नलोपे च समानमेवरूपं भवति, परन्तु प्रथमाद्विवचने डाब्पक्षे 'दामा' औ इतिस्थिते औङःश्यादेशे गुणे 'दामे' इति डाबभावपक्षे च 'दामानौ' इति रूपद्वयं सिध्यति। तदेतत् सीमे सीमानौ इति, 'दामे' दामानौ' इति च रूपद्वयं सूत्रेस्मिन् 'अन्यतरस्याम्' ग्रहणे सत्येव भवति। अन्यथा नित्येडापि 'सीमे' 'दामे' इत्येव स्यात्। नतु 'सीमानौ' 'दामानौ' इति। एतदर्थमेव सूत्रेस्मिन अन्यतरस्यां ग्रहणम।

'सीमा' 'सीमे' 'सीमानौ' इत्युदाहरणमात्रस्य पर्याप्तत्वेन 'दामा' 'दामे' 'दामानौ' इत्युदाहरणान्तर प्रदर्शनेन किमभिप्रेतमिति चिन्तनीयमेव।

डाबुभाभ्यामित्यस्य अन्नन्तविषये एकमुदाहरणं प्रदर्शितं सिद्धान्त कौमुद्याम् -बहुयज्वा, बहुयज्वे 'बहुयज्वानौ' इति। बहुयज्वा इत्यत्र बहवो यज्वानोयस्याः इति विग्रहे बहुव्रीहौ कृते बहुयज्वन् शब्दात् डाबुभाभ्यामिति डापि टिलोपे 'बहुयज्वा इति' डाबभावे बहुयज्वन् शब्दात् सौ उपधादीर्घे सोर्हल्ङ्यादि लोपे न लोपे च बहुयज्वा इत्येव रूपम्।

अद्यप्यत्र तद्रूपं डाबभावपक्षेऽपि सिद्धत्येव द्विवचने बहुयज्वे इति रूपस्य सिध्यर्थं डाप् विधानं तत्रापि डापोनित्यत्वे बहुयज्वे इति एकमेवरूपं स्यात् नतु बहुयज्वानो इति द्वितीयंरूपम्।

अस्य बहुयज्वन् शब्दस्य शसि बहुयज्वनः इति रूपं भवति। 'अल्लोपोनः' (6·4·134) इत्यनेन अनोऽकारस्य लोपस्तु न भवति। न संयोद्वमन्तात् (6·4·137) इति निषेधात तेन बहुयज्वन् शब्दस्य उपधालोपित्वं नास्ति इति 'अनउपधालोपिनोऽन्यतरस्याम्' (4·1·28) इत्यनेन ङीपि ङीवन्तं तृतीयं रूपं न भवति।

'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) इति सूत्रे अन्यतरस्यां ग्रहणस्य वैयर्थमाशङ्कितम् प्रौढमनोरमायाम्। तत्र हि ननु निषेध डापोर्वचन सामर्थ्यात् पर्यायः सिद्धः इत्युक्तं। मनोरमाग्रन्थमिमं व्याचक्षाणेन भैरवमिश्रेण सूत्र त्रयकरण सामर्थ्यादित्यर्थः। यदि डापोर्नित्यत्वं तदा 'मनोरौवा' 'अनोबहुव्रीहेः' (4·1·12) इत्येववदेदिति भावः इत्युक्तं।

वैद्यनाथपायगुण्डे महाशयेन च पृथक् सूत्रत्रय करणं सामर्थ्यादित्यर्थः। अन्यथा 'मनोडाप्' 'अनोबहुव्रीहेः' (4·1·12) इत्येववदेत्, इति भावः इत्युक्तम्।

उभयोष्टिकयोः समानमेव व्याख्यानं समुपलभ्यते।

एवं च मनोरमाग्रन्थस्यायमाशयः सीमन् शब्दात् दामन् शब्दात् बहुयज्व शब्दाच्च 'स्त्रियाम्' 'ऋन्नेभ्योङीप्' (4·1·5) इति ङीप् प्राप्नोति। तं बाधित्वा 'मनोडाप्' इत्येनेन सीमन् शब्दात् दामन शब्दाच्च डाब् भविष्यति। बहुयज्वन्

शब्दाच्च 'ऋन्नेभ्योङीप्' (4·1·5) इति प्राप्तम् ङीप बाधित्वा 'अनोबहुव्रीहेः' (4·1·12) इति नित्यं डाप् भविष्यति।

तथा च डाबन्तमेकं रूपमाभ्यां 'मनोरौवा' (4/1/38) 'अनोबहुव्रीहेः' (4·1·12) 'इति द्वाभ्यां सूत्राभ्यामेव सिद्धम्। एवं च 'डाबुभाभ्यामन्यतरस्यामिति सूत्रस्थस्य 'अन्यतरस्यामित्यस्य' वैयर्थ्य स्पष्टमेव इति।

तत्रेदं समाधानमुक्तं प्रौढमनोरमायामेव बहुधीवरी इत्येतद्‌रूपसिद्धि र्थं 'डाबुभाभ्यामिति सूत्रे अन्यतरस्यां ग्रहणम्। तथाहि डाबुभाभ्यामिति सूत्रे अन्यतरस्यामिति योगोविभज्यते। तत्र मनः इति निवृत्तम्। 'अनोबहुव्रीहेः' (4·1·12) इति मात्रमनुवर्तते। तथा च अन्यतरस्यामिति योगस्य अन्नन्तात् बहुव्रीहेः' डाब् वा स्यात् ईप्यर्थः।

अनेन अन्यतरस्यामिति योगेन बहुराज शब्दात् विकल्पेन डाप् भविष्यति। अतः अनोबहुव्रीहेः' इत्यनेन अत्र नित्योडाप् न भविष्यति। विकल्पस्यास्य नित्यम् 'अनोबहुव्रीहेरिति डापंप्रति अपवादत्वात्। एवं च 'अनउपधालोपिनो न्यतरस्याम्' (4·1·28) इत्यनेन वैकल्पिक ङीप् विधानं नियमार्थम्। डाबुभाभ्यामन्यतरस्याम् (4·1·13) इति सूत्रेण योडाप् विकल्पः स उपधालोपिन एवेति। अतश्च अनुपधालोपिनः सुपर्वम् शब्दात् डाप् ङीपो पर्यायेण न भवतः। नियमशास्त्रस्य 'अनुपधालोपिनः' इत्यस्य च निषेध मुखेन प्रवृत्तिः। अतः 'बहुराज्ञी' इत्यादौ 'ऋन्नेभ्यः' इत्यनेनेव ङीप् 'अनउपधालोपिनः' इत्यनेन तस्य विधि मुखेन प्रवृत्तेर-भावात्। तदुक्तं नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरित्याभिमाने नेदम्, इति। अत्र शब्दरत्ने अभिमान पदेन सूचिता अरूचिः भावप्रकाशेः स्पष्टीकृता।

एवं च बहुधीवन् शब्दात् बहुराजन् शब्दवत् 'ऋन्नेभ्यः' इत्येव ङीप्। अतएव बहुधीवरी इत्यत्र 'ऋन्नेभ्यः' ङीपासह'वनोरच' (4·1·7) इति रेफादेशः सिद्ध्यति। अन्यथा 'अनउपधा' इत्यनेन प्रकरणान्तरस्थेन ङीपि कृतेपि 'वनोरचोति रेफादेशो न स्यात्। 'वनोरच' (4·1·7) इत्यत्रहि चकारेण 'ऋन्नेभ्योङीप् (4·1·5) इति ङीवेवाविधीयते। तदुक्तं प्रौढमनोरमायाम्बहुराज्ञी इत्यादौ तु ऋन्नेभ्य इत्येव ङीप्। तेन बहुधीवरीति सिद्ध्यति। 'ऋन्नेभ्य' इति हि ङीप-मनुद्य तत्सन्नियोगेन विधीयमानो रेफः प्रकरान्तर स्थेन ङीपि कृतेन सिद्ध्येत्' इति।

अत्र 'बहुधीवरीति प्रयोगे ऋन्नेभ्यः इति ङीपा सह रेफादश रूपंयत् अन्यतरस्यामिति योगविभागस्य प्रयोजनं प्रदर्शितं तत्रेदंवक्तव्यम्। यत् 'वनोरच' (4·1·7) इति सूत्रेणैव ङीप्रयोः उभयोः विधानमस्तु। तावदेव 'बहुधीवरी' इति रूपं सिद्धयति इति अन्यतरस्यामिति व्यर्थमेव।

तत्रेदमुच्यते समाधानं ङीप्रयोः उभयोः 'वनोरच' (4·1·7) इत्यनेन विधाने गौरवं स्यादिति। एकस्य रेफस्य विधानापक्षेया ङीप्रयोर्द्वयोर्विधाने गौरवं स्पष्टमेव। यद्यपि 'विधेयभेदाद वाक्यभेदः' इति मीमांसकानां सिद्धान्तः इति ङीप्रयोः द्वयोर्विधाने वाक्यद्वयं स्यात् इत्यपि गौरव प्रदर्शयितुं शक्यते। तथापि मनोरमाकारेण टीकाकारैर्वा नेदं गौरवमुदभावितम्। तस्यायमाशयः यत् यदि 'विधेय' भेदात् वाक्यभेदः स्यात् तदा 'इकोयणचि' इत्यादावपि यणमग्नन्त्यात वाक्याऽऽनन्त्यप्रसंगः तस्मात् विधेय भेदात् वाक्यभेदः, इत्यस्य विधेयता भेदात् वाक्यभेदः, इति तात्पर्यम्। विधेयताभेदश्च विधेयतावच्छेदक भेदात यद्यति ङीपत्वे रत्वे च विधेयतावच्छेदकत्वम् एकमेव विधेयतावच्छेदके त्वस्यऐक्यात, एकैके विधेयताक वाक्यमेकमिति वाक्य भेद प्रसंगो नोदभावितः, अपितु द्वयोर्विधानं कर्त्तव्यं स्यात इत्येव गौरवमुद्भावितम्।

ननु बहुधीवरीतिरेफघटितस्यानुरोधेन 'वनोरचे'त्यस्य उभयविधायकत्व मगत्या सौढव्यम् इपि चेत, तदापि 'अनोबहुव्रीहेः' (4·1·12) इति सूत्रं 'वनोरचेत्यस्य' 'अनन्तरस्यविधिर्वा[1] भवतिप्रतिषेधेवति' न्यायेन निषेधकम् अथवा 'येननाप्राप्तिन्यायेन'[2] 'ऋन्नेभ्यः' इत्यस्य निषेधकम् अथवा बाध्य सामान्य चिन्तया उभयोर्निषेधकम् इति पक्षत्रयमत्र सम्भवति।

अथात्र—आकार रूपाः स्त्रीप्रत्ययास्त्रयः टाप्, डाप्, चाप् चेति सन्ति। अत्र टाप्, डाप्, चाप्, इत्येतेषु टकार, डकार, चकार, पकाराणाम् इत्संज्ञायां केवलस्य आकारस्यैव श्रवणात् एकः आकार रूप एव स्त्रीप्रत्ययो विधीयतां किमर्थमेते टकार—डकार—चकार—पकारानुबन्धानुबद्धा विहिता इति शङ्का जायते।

1. परि. शे. परि., 62
2. परि. शे. परि. 59

तत्रेदं समाधानं यदि डापि डकारो न स्यात तदा स्त्रीलिङ्.गैकवचने बहुयज्वा इति न सिध्येत । तथाहि बहवो यज्वानो यस्यां नगर्यां सा बहुयज्वा नगरी । अत्र बहुजस् यज्वन् जस् इत्यावस्थायाम् 'अनेकमन्यपदार्थे' (2·2·24) इति बहुव्रीहिसमासे समासत्वात् प्रातिपदिक सञ्ज्ञायां 'सुपोधातुप्रातिपदिकयोः' (2·4·71) इति सुपोलुकि बहुयज्व शब्दात् स्त्रीत्वविवक्षायां 'ऋन्नेभ्योङीप्' (4·1·5) इत्यनेन ङीप् प्राप्नोति तस्य ङीपः 'अनोबहुव्रीहे' (4·1·12) इति निषेधो भवति । अथ च तत्र 'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) इति डाब् भवति, एवं च ङीब्निषेध पक्षे सौ 'सर्वनामस्थानेचासुम्द्धौ' (6·4·8) इति सूत्रेण दीर्घे हलङ्.यादिलोपे[1] 'नलोपः प्रातिपदिकान्तस्य' (8·2·7) इति न लोपे बहुयज्वा इति रूपं, डाप् पक्षेतु बहुयज्वन आ सु इति स्थिते टिलोपे हलङ्.यादिलोपे च बहुयज्वा इति रूपं भवति इति डापितदभावे ङीप् निषेधे च बहुयज्वेत्येकविधमेव रूपं । यदि तु डाप, स्थाने आकार रूपः निरनुबन्ध एव प्रत्ययः स्यात् तदा डित्वा भावाट्टिलोपो न स्यात् तथा बहुयज्वनेति रूपमापद्येतेति डापि डकारानुबन्धः आवश्यकः 'टेः' (6·4·143) इति सूत्रेणहि डितिप्रत्यये परे भस्य टेर्लोपो विधीयते ।

नच 'आकार रूपे प्रत्यये कृतेपि 'नलोपः प्रातिपदिकान्तस्य' इति न लोपे 'अकः सवर्णेदीर्घः' (6·1·101) इति सूत्रेण दीर्घे हलङ्.यादि[3] लोपे बहुयज्वेति रूपं निर्बाधम् अन्तर्वर्ति विभक्त्या यज्व शब्दस्य पदत्वात् 'इति वाच्यम्' 'उत्तर पदत्वेचापदादिविधौ प्रत्ययलक्षणप्रतिषेधः' (वा.593) इति प्रत्ययलक्षण प्रतिषेधात् ।

एवं चापि चकारानुबन्धा भावे 'चितः' (6·1·163) इत्यनेने प्रकृति प्रत्यय समुदायस्यान्त उदात्तोन स्यात्, स यथा स्यादेतदर्थं चापि चकारानुबन्धः आवश्यकः ।

एवं च डाप् चापोः क्रमशः डकार चकारस्योरनुबन्धयोरावश्यकत्वम् । टापि टकारोनुबन्धो यदि न स्यात् तदा टापः स्थाने आपोविधाने 'एकानुबन्धक

---

1. हलङ्.याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् (6·1·69) इत्यनेनेतिशेषः ।
2. 'टेः' (6·4·143) इत्यनेनेतिशेषः ।
3. हलङ्.याब्भ्योदीर्घात्सुतिस्यपृक्तं हल्' (6·1·69) इत्यनेनेतिशेषः ।

ग्रहणे[1] न द्वयनुबन्धकस्यग्रहणामिति' परिभाषया आपः एव 'औङ्.आपः' (7·1·18) इत्यादौ ग्रहणं स्यात् डाप चापोर्ग्रहण न स्यात् तस्मात् टाप्यापि टकारानुबन्धानुबन्धनमावश्यकम् । सति चैवम् आप्मात्रस्य प्रत्ययस्य कुत्राप्यलाभेन टापश्चड़ाप्चापोरपि 'औङ्.आपः' (7·1·18)[2] इत्यादौ आबग्रहणेन ग्रह्या सिध्यति । नच तथापिटापि टकारस्य स्थाने अन्य एव कश्चिदनुबन्धोऽनुबध्यतां किमनेन टकारानुबन्धानुबन्धनेनेति वाच्यम्, यतोऽत्र् अशोकवनिकान्यायात् पाणिनिनाटकारो नुबन्धो नुबद्धः । पकारानुबन्ध'स्तु' सुपपितावनुदात्तौ' इति अनुदात्त त्वार्थःएव । ननुचित स्वरेण 'सुप्क्तावित्यय बाधात् चापि पकारानुबन्धोव्यर्थ इति चेन्न, चापि पकारानुबत्धाभावेहि 'औङ्.आपः' (7·1·18) इत्यादौ तस्य ग्रहण न स्यात् । तदुक्तं—तदनुबन्धक[3]ग्रहणेनातदनु बन्धकस्य ग्रहणमिति । एतदर्थ चापि पकारानुबन्घ आवश्यकः । तदाह ज्ञानेन्द्रभिक्षु टापः पकारः स्वरार्थः, 'औङआपः' 'आङि.चापः' 'याडापः' इत्यादौ समान्यग्रहणार्थश्च । तदविधानार्थष्टकारः । 'आ'वित्युक्तेहि तदनुबन्ध परिभाषया 'औङ्.आपः' इत्यादावयमेव गृह्येत डाप् चापोस्तु ग्रहणं[4] न स्यात्'' इति ।

तथ्यमिदं काशिकाकारेण प्रागेवप्रतिपादितं यतस्तेन ''पकारः स्वर सासान्य ग्रहणार्थः, टकारः सामान्य ग्रहणाविधानार्थः[5] इत्युक्तम् ।

1. परि. शे. परि. 83
2. 'आङि.चापः' (7·3·105) 'याडापः' (7·3·113) इत्यादिपद ग्राहयम् ।
3. परि. शे. परि. 84
4. तत्वबोध. स्त्री. प्र. पृ. 110
5. काशि. 4·1·4

# (क) ईकाररूपस्त्री प्रत्ययेषु ङीन् प्रत्ययः

ईकाररूपेषु स्त्रीप्रत्ययेषु ङीन्, ङीप्, ङीष् चेतित्रयः प्रत्ययाः सन्ति । तत्र-यथा क्षरक्रमं ङीन् प्रत्ययो निरूप्यते । ङीनप्रत्यय विधायके च द्वे सूत्रे समुपलभ्येते, पाणिनेर्गणपाठे सूत्रमेकं तथा अष्टाध्यायाथ्यामेकम् ।

यथा—

1. 'नृनरयोर्वृद्धिश्च' (ग. सू. 4·1·73) ।

2. 'शाङ्गंरवाद्यञोङीन्' (अष्टा 4·1·73) ।

तत्र प्रथमं ङीन् प्रत्यय विधायकं गण—सूत्र—'नृनरयोर्वृद्धिश्च' (ग. सू. 4·1·73) इति । अत्र चेन ङीनः समुच्चयः, तथा च 'नृ' शब्दात् 'नर' शब्दाच्च ङीन् प्रत्ययः स्यात्नतसन्नियोगेन वृद्धिश्चेति गणसूत्रार्थः । नृ शब्दात् 'ऋन्नेभ्योङीप्' (4·1·5) इति प्राप्तं ङीप् नर शब्दात् 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इति प्राप्तं ङीष च बाधितुमिदं गणसूत्रमारब्धम् ।

नयतीत्यर्थे 'णीप्रापणे' (भ्वा. उ. अ. 926) इति 'नी' धातोः 'नयतेर्डिच्च' (उणा. 100 सू.) इति ऋत प्रत्ययेडित्वात् टिलोपे नृ शब्दः 'नृ नये' (क्र्या. प. से. 1 19) इत्यतः नृणाति नयतत्यात्मानमुत्कर्षमित्यर्थे पचाद्यचि 'नर' इति शब्दश्च निष्पद्येते । तत्र नृ शब्दात् ङीनि ऋकारस्य वृद्धौ स्वादिकार्ये कृते रूपमिदं सिध्यति ।

'नारी' इति चास्योदाहरणम् ननु नरशब्दे 'अलोऽन्त्यस्य' (1·1·52) इति परिभाषयान्त्य स्यैव वृद्धिः स्यात् इति चेन, न 'नृ' शब्दे नकारात्परस्येवे वृद्धिरिति तत्साहचर्यात नरशब्देपि नकारात्परस्येवे वृद्धयौचित्यात ।

पृष्ठ संख्या 65 के स्थान पर पृष्ठ संख्या 81 पढ़े ।

यद्वा गणसूत्रे लुप्ताकाररेफान्तानुकरणम्, ना च नरश्च इति द्वन्द्वः तयोर्वृद्धिः नृ शब्दस्य नरोऽकारस्य च वृद्धिररिति फलितोऽर्थः । तथा च रेफान्तानुकरणे एक एवाकारस्तस्य वृद्धिः, यद्वा नरस्य अः, नरः, शकन्ध्वादित्वात्पर रूपेण प्रश्लिष्टस्याकारस्य प्रश्लेषसामर्थ्यादाद्यस्यैव वृद्धिः ।

अन्येतु वार्तिके वृद्धिपद्धत्या 'इकोगुणवृद्धी' (1·1·3) इति परिभाषया 'इकः' इत्यस्योपस्थित्या 'नृ' शब्दस्यैव वृद्धिः । नर ग्रहणं तु 'नरी' इत्यत्र ङीनर्थमेवेत्याहुः । मतमिदंचान्तिमं न युक्तम् । यतः गणे पृथगेवपाठे कर्त्तव्येवार्तिकेन सह पाठस्य वैयर्थापत्तिः स्यात् ।

तत्र द्वितीयं सूत्रं 'शार्ङ्गरवाद्यञोङीन्' (4·1·73) इति । अत्र 'शाङ्गरवादि' इति लुप्तपञ्चमीकम् पृथक् पदम् 'अञः' इति षष्ठ्यन्तम् । 'अत' इत्यनुवर्तते, तत्रैव 'अञः षष्ट्यन्तस्यान्वयः । जातेरस्त्रीविषयादयोपधात्' (4.1.63) इत्यतः जातेरित्यनुवर्तते, तस्य 'अत' इतिविशेषणम्, ततस्तदन्त विधिः अनुपसर्जनादिति अधिकाराल्लभ्यते । तस्य पष्ठ्याविपरिणामेन अञोयोऽत इत्यन्वयः । शाङ्गरवादेस्तु नान्वयोऽभयौकारे फलाभावात् । शाङ्गरवादौ 'एहि', पर्य्येहि, इत्यस्य 'इहचेष्टायाम्' इत्यतः आङ्पूर्वकात् परिआङ्पूर्वकाच्च 'सर्वधातुभ्य इन्' (उणा. 4/118सू.) इतीन् प्रत्ययान्तस्य 'भोगवद्भैरीमतोर्हलन्त स्थ चपाठाच्च । अत एव शाङ्गरवादेरश्चैकधर्मावच्छिन्नेन्वयाभावेन द्वन्द्वस्याप्राप्त्या 'शाङ्गरवादी'ति लुप्तपञ्चमीकं पृथक् पदमुक्तमित्युक्तं प्राक् । तथा च शाङ्गरवादेरञो[1] योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यादिति सूत्रार्थः । फलितः ।

अत्र सूत्रार्थे अञोयोऽकार इत्यस्य फलं तु 'शूरसेनी' इत्यत्र 'जनपद शब्दात्क्षत्रियाद' (4·1·168) इत्यपत्यार्थस्या 'अतश्च' (4·1·177) इति स्त्रियां लुकि अञोऽकाराभावेन जातिलक्षणङीषेव नतु ङीपोङीनिति । अनुपसर्जनोञ् इत्यस्य फलं तु विदस्य गोत्रापत्य स्त्रीत्यर्थे 'अनृष्यानन्तर्य बिदादिभ्योञ्' (3·1·104) । इत्यञि सुन्दरी वैदी यस्यामित्यर्थे, बहुव्रीहौ 'सुन्दरवैदी' इत्यत्र अञः उपसर्जनत्वात्

1. शाङ्गरव, कापटव, गौग्गुलव, ब्राह्मण, वैद, गौतम, कामण्डलेय ब्राह्मणकृतेय (आनिचेय) आनिधेय, आशीकेय, वात्स्यायन, मौजायन, कैकस, काप्य (काव्य) शैव्य, एहिपर्येहि, आश्मरथ्य, औदपान, अराल, चण्डाल वतण्ड । भोगवद्गौ तौः संज्ञया छादिषु (6·3·43) नित्यं ह्स्वार्चम् । नृनरयोवृद्धिश्च ।। इति शाङ्गरवादि ।

जातिलक्षणङीषेव न ङीनीतिजातिलक्षणे कृदिकारलक्षणेश्च ङीषि प्राप्ते भोगवद्गौरीमद्भ्यांतु 'उगितश्च' (4·1·6) इति ङीषि प्राप्ते ङीन् विधानाय सूत्रमिदमारब्धम् । तत्र 'शाङ्र्गरवी'[1] 'भोगवती'[2] 'गौरीमती'[3] इत्यादि 'शाङ्र्गरवादेः' इत्यस्योदाहरणम् । 'अञ्' इत्यस्य च 'वैदी'[4] इत्युदाहरणम् ।

---

1. 'शाङ्र्गरवी'—शृङ्गरोरपत्यं स्त्रीत्यर्थे अणोआदिवृद्धौ रपरत्वे 'ओर्गुणः' (6·4·146) इति गुणे गोत्रंञ्च चरणैः सह, इति जातित्वात् प्राप्तं ङीषं बाधित्वा ङीन्, स्वरे भेदः ।

2. भोगवत् शब्दात् स्त्रियाम् 'उगितश्चेति ङीपि प्राप्ते ङीन्, स्वरभेदः ।
3. गौरीमच्छब्दात् स्त्रियाम्—'उगितश्चे' ति ङीपिप्राप्ते ङीन्, स्वरेभेदः ।
4. वेदी—वेन्तीति 'विदः 'इगुपधज्ञाप्रीकिरः कः' (3·1·135) इति 'के' 'विदं' इति तस्य गोत्रापत्यं स्त्रीत्यर्थे 'अनृष्यानन्तर्ये विदादिभ्योऽञ्' (4·1·104)इति 'अ' आद्यचो वृद्धौ यस्येति चेतिअकारलोपे वेद शब्दात् गोत्रत्वेन जातित्वात् प्राप्तं ङीपं बाधित्वा ङीन्, स्वरे भेदः ।

———

## I - II अध्याय

टिप्पणी—

पृ. लिङ्ग चिह्नेनुमाने च................................मेहनेडपिनपुंसकम्
इतिमेदिनी गान्तवर्ग तृतीय श्लो. 21

पृ. "गुणानां सत्वरजस्तमः........................लिङ्गत्वेन परिगृह्यते"
(म. भा. 1/2/64 प्रदीये उद्धृतः)

पृ. वाक्य. तृतीय काण्ड कारिका: 13, 14, 15, 16, 322, 325, महाभाष्य टीका प्रदीपे उद्धृता: स्त्रियाम् 4/1/3

पृ. सन्निधाने................................लिङ्गेषु नियमस्तथा।
(वाक्य. III कारिका 20)

पृ. I तिस्रोजातय एवैता:....................महिष्यादिजातिभि:।
(वाक्य. का. स्त्रियाम्-अजाअतष्टाप् 4/1/3/4 सूत्रे तत्वबोधिन्यामुद्धृता।)

II हस्तिन्यां वडवायाञ्च.....................समवायिनीम् इति॥
(वाक्य. का, स्त्रियाम् 4/1/3 प्रदीये उद्धृता)

पृ. तथा चाद्भाष्यकार:—एकार्थे शब्दान्यत्वा.........लिङ्गान्यत्वामिति
(म. भा. 4/3/3)

पृ. "मुषेदीर्घश्च" (उणा. 209 तत्वबोधिनी पृ. 531)

पृ. वत्स: पुत्रादिवर्षयो: (इति मेनिनी सान्तवर्म: श्लो.॥ पृ. 170)

पृ. विपभत्वम नादृत्य शब्दैवार्थप्रकाशते इति। (वाक्य 1/55)

अजादिभि· स्त्रीत्वस्य विशेषणान्नेह—(वै. सि. कौमुदी स्त्रीप्रत्यय सू अजाधतष्टाम 4/1/4)

पृ. वैश्याशूद्रयोस्तु.................................(याशवल्क्यस्मृति आचाराध्ये वर्णजातिविवेक प्रकरणे श्लो. 92 पृ. 31)

## तृतीयोऽध्यायः

# ईकाररूपस्त्रीप्रत्ययेषु ङीप् प्रत्ययः

अथ यथाक्षरक्रमप्राप्तं ङीप् प्रत्ययो निरूप्यते। तत्र ङीप् प्रत्यय विधायकानि एकोनविंशतिः सूत्राणि पञ्च वार्तिकानि, ङीप्प्रत्ययनिषेधकानि पञ्च सूत्राणि, द्वेङीप् प्रत्ययनिषके वार्तिके च स्तः।

**ङीप्प्रत्यय विधायकानिसूत्राणि**

यथा :—

1. 'अन उपधा लोपिनोऽन्यतरस्याम्' (4·1·28)
2. 'उगितश्च' (4·1·6)
3. 'ऋन्नेभ्योङीप्' (4·1·5)
4. केवलमामकभागधेयपापापरसमानायकृतसुमङ्गलभेषजाच्च' (4·1·30)
5. 'टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः'(4·1·15)
6. 'दामहायनान्ताच्च' (4·1·27)
7. 'द्विगोः' (4·1·21)
8. 'नित्यं संज्ञाछन्दसोः' (4·1·29)
9. 'पादोऽन्यतरस्याम्' (4·1·8)
10. 'पुरुषात्प्रमाणेऽन्यतरस्याम्' (4·1·24)
11. 'पूतक्रतौरै च' (4·1·36)
12. 'मनोरौवा' (4·1·38)
13. 'यञश्च' (4.1.16)
14. 'रात्रेश्चाजसौ' (4·1·31)
15. 'वनोरच' (4·1·7)
16. 'वयसि प्रथमे' (4.1.20)
17. 'वर्णादनुदात्तात्तोपधात्तोनः (4·1·39)
18. ''वृषाकप्यग्निकुसितकुसिदानमुदात्तः'' (4·1·37)
19. 'संख्याव्ययादेङीप्' (4·1·26)

**ङीप् प्रत्यय विधायकानिवार्तिकानि—**

यथा :—

1. 'नञ्स्नञ्‌ीक्क्‌र व्युंस्तरुणतलुनानामुपसङ्ख्यानम्' (वा. 4·1·15)
2. 'पिशाङ्गादुपसंङ्ख्यानम्' (वा. 4·1·39)
3. 'बहुव्रीहौ वा' (वा. 4·1·7)
4. 'वयस्यचरम इति वाच्यम्' (वा. 4·1·20)
5. 'वयोवाचकस्यैव हायनस्यङीब्णत्वं चेष्यते' (वा. 4·1·27)

**ङीप् प्रत्ययनिषेधकानि सूत्राणि—**

यथा :—

1. 'अनोबहुव्रीहेः' (4·1·12)
3. काण्डान्तात् क्षेत्रे (4·1·23)
4. 'नषट् स्वस्रादिभ्यः' (4·1·10)
5. 'मनः' (4·1·11)

**ङीप् प्रत्यय निषेधके वार्तिके—**

यथा :—

1. 'असितपलितोर्न' (4·1·39)
2. 'वर्णोनहश इति वक्तव्यम्' (वा. 4·1·7)

**ङीप्प्रत्ययविधाकेषु प्रथमसूत्रम्—**

'अन उपधालोपिनोऽन्यतरस्याम्' (4·1·28)। इदं सूत्रं नात्र प्रकरणे पानिणेरष्टाध्याय्यां पठितम्, किन्तु अन्नन्तबहुव्रीहेः प्रसङ्गादत्रोपन्यस्तम्। न च 'अनउधालोपिनोऽन्यतरस्यामिति सूत्रम् 'अनौबहुव्रीहेः' (4·1·12) इत्यतः परं पठनीयम्। अनोग्रहणं मास्तु 'उपधालोपिनोवा,इत्येवस्तु किं प्रकरणान्तरे पाठेनेति चेन्न, भाष्यकृता स्वयमेव 'उपधालोपिना वा' इति अन्यस्य प्रकरणान्तरस्थसूत्रस्य प्रत्याख्यातत्वात्।

अत्र 'बहुव्रीहेरुधसोङीष्' (4·1·25) इत्यतः बहुव्रीहेः 'इति, 'संख्याव्ययादेङीप्' (4·1·26) इत्यतः 'ङीप्' इति, चानुवर्तते 'प्रातिपदिकात्' इत्यधिकृतम्, 'अनः विशेष्यते, विशेषणतया तदन्त विधिः, तथा च[1] अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वाङीप्स्यात्, पक्षे डाब् ङीप् निषेधौ इति सूत्रार्थः।

---

1. ङ्याप्प्रातिपदिकात्' (4·1·1) इत्यनेनेति शेषः।

'अन्यतरस्याम्' इत्युक्तिः' 'बहुराजे—बहुराजानौ' इति इत्यनयोसिद्धये फल मिदम्—एतस्याभावेहि अतउपधालोपिनि 'बहुयज्वा' इत्यादौ चारितार्थस्य 'अनो-बहुव्रीहेः' (4·1·12) इति ङीप् प्रतिषेधस्य 'डाबुभाभ्यान्यतरस्याम्' (4·1·13) इति डापश्च उपधालोपिनि बहुराजशब्दावनवकाशेन 'अन उपधालोपिनः' इत्यनेन ङीपा वाधएव स्यादिति 'बहुराजे' बहुराजानौ' इति न स्यात् विकल्पेन बाधेतु तावपि भवतः।

'बहुराज्ञी[3], बहुराजा[4], इति चास्योदाहरणे। ङीप् प्रत्ययविधायकेषु द्वितीयं सूत्रम्—'उगितश्च' (4·1·6) इति अत्रापि प्रातिपदिकादित्यनुवर्तते, स्त्रियाम्' (4·1·3) इति च अधिकृतम् 'ऋन्नेभ्योङीप्' (4·1·5) इत्यतोङीबित्यनुवर्तते, उगिद्यस्येत्यसौ 'उगित्'=प्रातिपदकं, प्रत्यस्य, प्रातिपदिकम्—'भवतु'| इति, प्रत्ययः शत्रादिः, उगित इति पञ्चम्यन्तम्ः तेन विशेषणात् 'येन-विधिस्तदन्तस्य' ( 1·1·72 ) इति सूत्रेणतदन्त विधिः, 'समासप्रत्ययविधौ' इति निषेधस्तु न' (वा. 1·1·72) उगिद्वर्णग्रहणवर्जम्' (वा. 1·1·72) इत्युक्तेः स्त्रीप्रत्यये तद प्रवृत्तिज्ञापनाच्च। तथा च उगिदन्तात्प्रातपदिकात् स्त्रियां ङीप्ः स्यात् इति सूत्रार्थः सम्पद्यते।

भवती, पचन्ती दीव्यन्ती इत्यादीनि चास्योदाहरणानि सन्ति।

तत्र 'भवत्' इत्युगिदन्तात् प्रातिपादिकात् ङीपि स्वादिकार्ये च कृते भवतीति सिध्यति। यतः सर्वादिगणे 'भवतु' इति पठ्यते। तत्रोकार इत्। व्यपदेशिवद्भावेन 'भवत्' इत्यस्य उगिदन्तत्वम्। भवत् शब्दः आदर विशिष्टयुक्तर्थकः। 'नच' व्यपदेशिवद्भावो प्रातिपदिकेन (परि. शे. परि. 32) इति निषेधात् 'भवत्' इत्यस्य कथम् उगिदन्तत्वमिति, शङ्क्यम्। यतः सूत्रोपान्तो न्तादि शब्द विषये ए व अस्याः प्रवृत्तिः 'भवतु' महत् इत्यव्युत्पन्ने प्रातिपादिके।

तदुक्तं भाष्ये नैतत् प्रत्ययग्रहणम्, प्रत्ययाप्रत्यययो रेतद्ग्रहणम्। कथम् ? वर्णो प्युगित्, प्रत्ययो प्युगित्, इति। पचन्ती, दीव्यन्ती, इति 'तु'[1] पच् 'दिव्भ्यांलटः[2] शत्रादेशो[3] क्रमशः शप्[4] श्यनि[5] च पचत् दीव्यत् शब्दात् उगिदन्तात् ङीपि 'शप्श्यनोर्नित्यम्' (7·1·81) इति नुमि स्वादि कार्ये च कृते सिद्ध्यतः।

---

1. 'डुपचष्पाके' (भ्वा. उ. अ. 3211)
2. 'दिवुक्रीडा' (दिवा. प.से. 1132)
3. लटः शतृशानचाव 'प्रथमासमानाधिकरणे' (3·2·124) इत्यनेनेति शेषः
4. 'कर्तरिशप्' (2·1·68) इत्यनेनेति शेषः।
5. 'दिवादिभ्यश्यन' (3·1·69) इत्यने शेषः।

न च उखायाः स्रंसते, पर्णाद् ध्वंसते इत्यर्थे स्रंसते[6] ध्वंसतेश्च[7] 'क्विपि नलोपे 'उखास्रत्' पर्णवत्, इत्यादौ 'उगितश्च (4·1·6) इति ङीप् प्रत्ययः कुतोनेति शङ्क्यम्। यतः 'उगिदचामिति सूत्रे अजग्रहणेन धातोश्चेदुगित्कार्य' तर्हि नलोपिनो चतेरेवेति नियमः क्रियते। तथाहि धातुपाठे 'अचतेः[8] क्त्वा[9] प्रत्यये गतौ 'उदितौवा' (7·2·56) इति वैकल्पिके इटि 'अचित्वा' 'अक्त्वा' इति सिद्धये अञ्चु गतिपूजनयोः (भ्वा. उ. से) इत्युदित् करणस्यावश्यकता उगित्वेनैवा चतेरेपि नुमि सिद्धेः 'उगिदचाम्' (7·1·70) इति सूत्रे नलोपिनो चतेर्ग्रहणं नियमार्थम्—धातोश्चेदुगित् कार्य तर्हि नलोपिनो चेतिरेवेति। तेन अञ्चतेः उगिल्लक्षणो ङीप् भवत्येव। यथा प्राची प्रतीची। अत्रहि क्रमशः प्रपूर्वकात् प्रतिपूर्वकात् अञ्च् 'ऋत्विग् दधृकस्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (3·2·59) इति क्विनि अनिदितांहल उपधायाः क्ङिति (6·4·24) इति नलोपे ङीपि 'अचः' (6·4· 138) इत्याकारलोपे प्रशब्दाकारस्य प्रतिशब्दाकारस्यचाचोः ('चौ' 6·3·138) इति दीर्घे इमे रूपे सिध्यतः।

अतएव—'कथमिदं विज्ञायते' उगितः प्रातिपदिकादिति। 'अहोस्विदुगिदन्तात् प्रातिपदिकात्' इति। यदि विज्ञायते, उगितः प्रातिपदिकादिति। भवती, महती। अतिभवती, अतिमहतीति न सिध्यति। सिद्धम् 'भवती महतीति, भाष्यं हि भवन्महतो रुगित्प्रातिपदिकत्वं ब्रूते।

यत्तु 'भातेर्डवतुः' (उणा. 1.83) इति 'वर्तमानेपृषद्बृन्महज्जग—(उणा. 2·84) इति डवतुप् प्रत्ययान्तो भवच्छब्दः अतिप्रयत्यान्तोमहच्छब्दः इत्युक्तम्। तन्नयुक्तम् उक्त भाष्यविरोधात्। ग्रहणवताप्रातिपदिकेनतदन्तविर्नाधिरित' इत्यस्य च प्रातिदिकमात्रबोधकंयत्पदंतत्रैव प्रवृतिः, व्यपदेशिवद्भावोऽप्रातिप्रदिकेन इत्यस्य प्रातिपदिकमात्रबोधकंयत्पदं तत्रैव प्रवृत्तिः 'नैतत्प्रातिपदिकग्रहणम्' इति भाष्येण उगित्पदेन 'प्रातिपदिकात्प्रातिपदिकयोरेतद्ग्रहणम्' इति भाष्यणे उगित्पदेन प्रातिपदिक प्रत्ययोर्ग्रहणमितिन्तयोरत्र विषयः।

---

6. 'स्रंसु अवकल्पने' (भ्वा. आ.से., 756)
7. 'ध्वंसु अवकल्पने' (भ्वा. आ.से., 755)
8. 'अञ्चु गति पूजनयोः' (भ्वा. उ. से. 889)
9. 'समानकर्तृकयोः पूर्वकाले' (3·4·21) इत्ययेनेति शेषः।

नच उगित्पदेन प्रत्ययस्य ग्रहणे, (परि. शे. परि. 23) प्रत्यय ग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्यग्रहणम् इत्यनया[1] निर्यवमती[2] इत्यत्र ङीप् न स्यात् 'निर्यवमत्' इत्यस्य प्रत्ययान्त तदादित्वाभावादिति शङ्क्यम्, यतः प्रत्यय ग्रहणपरिभाषाया अपि प्रत्यमात्र ग्रहणे एव प्रवृत्तिर्भवती, नतु प्रत्ययाप्रत्ययग्रहणे।

ङीप्प्रत्ययविधायकेषु तृतीयं सूत्रम्— 'ऋन्नेभ्योङीप्' (4·1·5) इति। अत्र-ऋतश्च नश्चेति द्वन्द्वः, स्त्रियामित्यधिकृतम्, 'ङ्याप्प्रातिपदिकात्' (4·1·1) इत्यतः प्रातिपदिकग्रहणमनुवर्तते, ऋन्नेभ्य इति बहुवचनानुरोधात् प्रातिपदिकादिति बहुवचनान्तत्वेन विपरिणम्यते, प्रातिपदिकग्रहणं ऋन्नकारैर्विशेष्यते, 'ऋन्नेभ्य' इति विशेषणात् तदन्तविधिः[1]। तथा च 'ऋदन्तेभ्यो नान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् स्या' दिति सूत्रार्थः सम्पद्यते।

कर्त्री, दण्डिनी इत्यादीनि चास्योदाहरणानिसन्ति। तत्र 'कृ'[2] धातोः 'ण्वुल्तृचौ' (3·1·14) इति कर्तरि तृचि अनुबन्धलोपे तृच आर्धधातुकतया[3] 'सार्वधातुकार्द्धधातुकयोः, (7·3·84) इति धातोः ऋकारस्य गुणेऋकारे 'उरण्रपरः' (1·1·51) इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीपि अनुबन्ध लोपे ऋकारस्य स्वादिकार्ये कृते 'कर्त्री' इति सिद्ध्यति।

'दण्डः अस्ति अस्याः अस्यां वा' इति विग्रहे दण्डशब्दात् 'अत-इनिठनौ' (5·2·115) इति इनिप्रत्यये इकारस्य उच्चारणार्थत्वात् स्वतोनिवृत्तौ दण्डघटकाकारस्य भत्वात् 'यस्येति च' (6·4·148) इत्यनेन लोपे दण्डिन् शब्दात् स्त्रीत्वविवक्षायां ङीपि अनुबन्धलोपे स्वादिकार्येति च कृते 'दण्डिनी' इति सिद्धयति।

ङीपि ङकारानुबन्धः 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' (6·1·68) इत्यादौ विशेषणार्थः। अन्यथा तत्र 'हल्ङयाब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्युक्तौ 'ग्रामिणीः' इत्यादावपि सुलोपापत्तिः स्यात्। नहि अत्र ङीपः ईकारः किन्तु 'नी' धातोः। अतः सति विशेषणार्थे ङकारे ङीपः परत्वाभावात् न सोलोपापत्ति-

---

1. म. भा., 4·1·6
2. 'यवोऽस्यास्तीति यवमत् (यवशब्दात्मतुम्) निष्क्रान्तः यवमान् यस्या नगर्या- सा निर्यवमती' इत्यर्थः।

1. 'येनविधिस्तदन्तस्य' (1·1·72) इत्येनेति शेषः।
2. 'डुकृञ् करणे' (क्र्या. प. से.)

प्रसङ्गः । ङीपः पकारानुबन्धस्तु 'सुपित्तावनुदात्तौ' इति कर्त्री इत्यदौ ईकारस्य अनुदात्त स्वरार्थः ।

**ङीप् प्रत्ययविधायकेषु चतुर्थं सूत्रम्—**

'केवलमामकभागधेयपापापरसमानार्थकृतसुमङ्गलभेषजाच्च' (4·1·30) इति । अत्र—'नित्यंसंज्ञाछन्दसोः' (4·1·29) इति सूत्रम्, ङीविति चानुवर्तते । स्त्रियामिति चाधिकृतं बोध्यम् अन्यतरस्यामितिनिवृत्तम् तथा च 'एभ्यो नवभ्यो नित्यं ङीप् स्यात् संज्ञाछन्दसोः' इति सूत्रार्थः । 'अथोतरन्द्रः 'केवली[1] विशः' 'मामकीतनू'[2] 'भागधेयी'[3] 'पापी'[4]

---

1. केवलशब्दान्ङीप् शशिरूपं । सौतु हल्ङ्यादिलोपः स्यात् ।

2. मदीयायां तन्वामित्यर्थः । युष्मदस्मदोरन्यतरस्यांखञ्च' (4·3·1) 'इति अस्मच्छब्दात्चादाणि 'तवकमकावेकवचने' (4·3·3) इति अस्मच्छब्दस्य मामकादेशे ङीपि ।

3. अयं च मित्रावरुणयोर्भागधेयीस्थ, इत्यत्र वेदे प्रयुक्तः । भाग शब्दात्पुंलिङ्गात् 'तद्युक्तात्कर्मणोऽण्' (5·4·36) इति सूत्रे भाष्ये पठितेन 'भागरूपनामभ्यो धेयः' (वा. 5·4·25) इति वार्तिकेन स्वार्थे धेयप्रत्ययः, क्वचित्स्वार्थिकाः प्रकृतितोलिङ्वचन'न्यतिवर्तन्ते इति 'कर्मव्यतिहारेणच्स्त्रियाम्' (3·3·43) इति स्त्रियाकेवणचो विधानात् 'णचःस्त्रियाम्' (5·4·14) इति सूत्रे 'स्त्रियाम्' प्रकृतेः इति ग्रहणेन ज्ञापितया प्रकृतेः क्वचिल्लिङ्गवचनान्यति वर्तन्ते, इति परिभाषयो स्वार्थिकेषु लिङ्गातिवृत्तेरपि सत्वाद् भाग शब्दस्यपुंलिङ्गत्वेऽपि भागधेयशब्दः स्त्रियाम् अतो भागधेय शब्दादौत्वान्ङीपि—रूपमिदम् ।

4. पापेशब्दात् पापमस्तीत्यर्थे अर्शआद्यजन्तात् स्त्रीत्वे ङीप् यथा—तन्वः सन्तु पापीः ।

'अपरी'[1] 'समानी'[2] 'आर्यकृती'[3] 'सुमङ्गली'[4] 'भेषजी'[5] इत्येतानि चास्योदाहरणानि। अत्र 'संज्ञाछन्दसो'रित्युक्ति-, संज्ञाछन्दसोरन्यत्र केवला, मामिका—इत्यादौ ङीपो भावाय। नचात्र मामकग्रहणं नावश्यकमणन्तत्वाद्धि 'टिड्ढे' ति ङीप् सुलभ इति वक्तव्यम् यतः संज्ञाछन्दसोरेवेति नियमार्थं मामकग्रहणमावश्यकम्। अन्यथा लोके असंज्ञायां च प्रयुक्ते मामिका इत्यत्रापि ङीप् प्रत्ययापत्तिर्दुर्वारास्यात् अत्र हि टाप् इत्वं च भवतः।

**ङीप्प्रत्ययविधायकेषुपञ्चमं सूत्रम्—**

'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच् तयप्ठक्ठञ्कञ्क्वरपः' (4·1·15) इति। अत्र—'टित् च, ढश्च अण् च, ,द्वयसच् च मात्रच् च, दध्नच् च तयप्च, ठक् च, ढञ् च, क्वरप् च, एतेषां समाहारः, ततः पञ्चम्येकवचनम्, अनुपसर्जनादित्यधिकृतम्, तत् सूत्रपठितानां

---

1. 'अपरी' अपरशब्दः पवर्गमध्यः नतु दन्त्योष्ठमध्यः यथा—'उतवापरोभ्यो माधवा विजिग्ये' इति अत्र पवर्गघटितस्यैवदर्शनात् 'घृतादीना च', इति फिट् सूत्रेणान्तोदात्तत्वम् 'वृषादीनाञ्चा' (6·1·2·3) इति विहितं बोध्यम्।
2. समानशब्दात् ङीप्। यथा—'समानी व आकूतिः' इति।
3. आर्यकृत शब्दात् ङीप् आर्येणकृता इत्यर्थे समासात्प्रागेव बाधकाभावात् टाप् स्यादिति चेन्न, गतिकारकोपपदानांकृदभिःसहसमासवचनम्, प्राक् सुबुत्पत्ते (परि. शे. परि. 76) ,इतिपरिभाषाया सुबुत्पत्ते प्राक् समासे प्राप्तस्य टापो ङीपा बाधात् उपसर्जनिष्यमाणन्यायात्समासात्प्रागपि टापो बाधस्य वस्तुं शक्यत्वाच्च।
4. 'सुमङ्लशब्दात् ङीप्। सुमङ्गलीरियंवधूः। अत्र सुलोपस्तु न, 'छन्दसी वनिपौ च वक्तव्यौ' (वा. 5·2·122) इति वार्तिकेन ई विधानेन ङ्यन्तत्वाभावात्।
5. भेषजशब्दो व्युत्पन्नः, औषधे रूढः। बिभेति रोगो स्मादित्यर्थे 'भियःपुग्ध्रस्वश्च' (उणा. 1 पा. 139) इति निष्पन्न भिषज्शब्दात् भिषज इदमित्यणन्तो भैषज शब्दोऽपि औषधे एव रूढः। अत्रैव ङीविधान सामर्थ्यात् स्त्रित्वं, ततः भेषजशब्दात् ङीप् बालमनोरमाकारः 'भिषज् इयमित्यर्थेण वृद्धिधं बाधित्वा सूत्रे भेषज इति पाठात् इकारस्येत्वं निपात्यते' इत्याह। एवं संज्ञायामपि ङीबन्तं रूपं बोध्यम्। संज्ञाछन्दोभ्यामन्यत्र टाबन्तं रूपम्—'केवला' निश्चितेऽर्थे केवलशब्दो नित्यनपुंसकः यथा 'केवल' मूर्खः। एकस्मिन्नेर्थे कृत्स्ने चार्थे त्रिलिङ्गः। यथा केवलोयं व्रजाति, एक इत्यर्थः, केवलाभिक्षपःसर्वेइत्यर्थः स्त्रीलिङ्गे केवली इति।

टिदादीनां विशेषणम् श्रुतानुमितयोः, श्रुतसम्बन्धोबलीयान्[1] शीघ्रोपस्थिति-कत्वात्।

अत्र च ढादयः एकादेश प्रत्ययाः, तैः 'प्रत्ययग्रहणेयस्मात्[2] सविहितस्तदादेस्तदन्तस्यग्रहणम्' इति परिभाषया तदादिविशेष्यकतदन्तविधौ ढाद्यन्तं यत्तददाति लभ्यते। 'प्रातिपदिकात्' इत्यधिकृतम् तस्य टित् ढायन्ततदादि विशेषणम् तथा च 'अनुपसर्जनं यत् टिदादि तदन्तं यददन्त प्रातिपदिकं 'ततः स्त्रियां ङीप् स्यात्' इति सूत्रार्थः।

**स्त्रीप्रत्ययेषु तदन्त विधौ मानम् 'अनुसर्जनात्' इति सूत्रम्—**

टिन्च त्रिविधिम्। प्रत्यरूपम्। यथा—'चरेष्टः' (3·2·16) इति। प्रातिपदिकम्—नदट्, चोरट्, इत्यादि। यदि गणे पचादिविहितस्याच्प्रत्ययस्यैवटित्वं प्रतिज्ञायेत इत्याशयस्तदा टिद्रूपप्रातिपदिकं नास्ति। वस्तुतस्तु 'टिड्ढाणञ् द्वय सर्ज दध्नञ् मात्रच् तयप्ठकञ्कञ् क्वरपः' (4·1·15) इत्यत्र टित्प्रातिपदिकं गृह्यते। तच्च साक्षात् टित्वाभावेटिदवयवघटितत्वेन। अवयवेहि च तत् टित्वमकिञ्चित्करं, तत्समुदाये आरोप्येते। स चावयवः ट्यु—ट्युल्—ल्युडादिप्रत्ययरूपो धातुरूपश्चैक एव 'घेट्पाने'[1] इति। तत्र यं समुदायं यो डबयो न व्यभिचरति तादृशसमुदाये टित्वमारोप्यते। 'चरेष्टः' (3·2·16) इति टित्वम् अधिकरणोपपदे एव चरेष्टविधानादधिकरणघटितं समुदायं न व्यभचरतीति कुरुचरे एव टित्वमारोप्यते। तदुक्तं भाष्यकृता 'कुरुचर शब्द प्रत्ययो विधीयते, तत्र कः प्रसङ्गोयद् ,बहुकुरुचरशब्दान्नैव प्राप्नोति' इति। अत्र कुरुचरशब्दात्प्रत्ययो विधीयते इत्युक्त्या 'कुरुचर' इत्यस्य टित्वं सूचितम्। धातुरूपं च दित् घट् पाने' इति धेधातोः स्तनमिति कर्मोपदात्—'नाशिकास्तनयोः' इति खश् प्रत्येय मुमागमे स्तनन्धय शब्दात् ठिड्ढेति ङीपि स्तनधयी इति प्रयोगे दृश्यते। तथा च प्रकृते टित्पदं प्रत्ययमात्र बोधकम्। अत्र प्रत्ययमात्र बोधकत्वाभावात्तदादि विशेष्यकतदादि विशेष्यकतदन्त- विधिर्न[1]।

एवञ्च टिदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्। ढादयस्तु प्रत्यया एवेति प्रत्यय ग्रहण परिभाषया तदादेरित्यस्योपस्थित्यातदादि विशेष्यकतदन्तविधौ ढेद्यन्तं यत्तदादि तदन्तं यददन्तप्रातिपदिकं तत्र स्त्रियां ङीबित्यर्थः। ।टित् ढादि चानुपसर्जनं ग्राहयम् तथा च—

अनुपसर्जनं यटिदादि तद्न्तं प्रातिपदिकंततः स्त्रियां ङीप् स्यात् इति सूत्रार्थः फलतिः।

'कुरुचरी' 'नदट् नदी' 'सौपर्णेयी' ऐन्द्री, औत्सी, अरुद्वयसी अरुदध्नी, अरुमात्री, पञ्चतयी इति चास्योदाहरणानि।

1. प्रत्ययमात्रबोधकादेवहि 'प्रत्यय' टिस्तदन्तविधिरित्यर्थः।

तत्र 'कुरुचरी' इति रूपम्—कुरुषु देशेषु चरतीति विग्रहे अधिकरणे उपपदे चर्धातोष्ट इत्यर्थकेन 'चरेष्टः' (3·1·10) इत्यनेन कर्तरि टप्रत्यये 'टस्येत्वलोपयोः 'उपपदमतिङ्' (2·2·19) इत्युपपदसमासे प्रातिपदिकसंज्ञायां विभक्तेल्लुॅकि स्त्रीत्वविवक्षायां कुरुदेशाधिकचरणकर्त्री इत्यर्थे टित्—'अ' इति, सच न कुत्राचिद्विशेषणीभूतार्थकर्तृवाचकमित्यनुपसर्जनी भूतम्, तदन्तं कुरुचर इति, ततो ङीपि 'यस्येति च' इतीकारे परे अकारस्य लोपे ततः सुप्रत्यय 'हल्ङ्याब्भ्यो—दीर्घात्सुतिस्य–पृक्तंहल्—(6·1·68) इति सुलोपे सिद्धयति। 'नदट्–नदीति' रूपम्–'णद अव्यक्तेशब्दे' त्यतः 'नन्दिग्रहिपचादिभ्योल्युनिन्यचः' (3·1·134) इत्यच् प्रत्यये पचादि गणे 'नदट्' इति पाठेन टस्येत्वे स्त्रियां ङीपि अलोपे सौ तस्य लोपे सिद्धयति।

'सौपर्णेयीति' रूपम्—शोभनानि पर्णान्यस्या, यद्वा सुपर्णो गरुडः सो सत्यस्या इत्यर्थेअर्शआदित्वादचि गौरादि त्वान्ङीषि 'सुपर्णी, इति, ततः 'स्त्रीभ्यो ढक्' (4·1·120) इति सुपर्ण्या अपत्यं स्त्रीत्यर्थे ढकि आदिवृद्धौ ढस्य एयादेशो 'यस्येति च' इति ईकारलोपे, सौपर्णेय–शब्दात् ढस्ययोऽकारस्तदन्तान् ङीपि अलोपे ङयन्तात्सोर्लोपे सिद्धयति।

ऐन्द्रीतिरूपम्—इन्द्रो देवता अस्या इति विग्रहे 'सास्यदेवता' इति प्रथमान्तादणि आदिवृद्धौ तद्धितान्तत्वात्प्रातिपदिकत्वेन सोर्लुॅकि अणो योऽकारः स्तदन्तान् ङीपि ङ्यन्तात्सौ तस्य लोपे सिद्धयति। 'औत्सी' इतिरूपम्—उनत्ति क्लिद्यतीत्यर्थे 'उन्दी क्लेदने '(रु. प. से.) इत्यतः {उन्दिगुधिषिभ्यश्च' (उणा. 3 पा. 68) इति सप्रत्यये किदधिकारात् कित्वे नलोपे उत्सः = पर्वतादितः सवज्जलस्य पातस्थानम्, कश्चन ऋषिर्वा। 'उत्सः 'प्रस्रवणम्' इत्यमरः, इमे द्वे यत्र पानीयं निपत्य बहुली भवति तत्स्थानस्य नाम्नी। 'उत्सस्येयमित्यर्थं उत्सादिभ्योञ्' (4·1·83) इत्यञि तद्धितान्त त्वात् प्रातिपदिकत्वे 'सुपोधातुप्रातिपदिकयोः' (2·4·71) इति ङसो लुकि आदिवृद्धावलोपे ङीपि सौ तस्य लोपे सिद्धयति। 'उरुद्वयसी, उरुद्घ्नी उरुमात्री' इति त्रीणि रूपाणि–'सार्वथ[1] क्लीबे पुमानूरु' इत्यमरः जानूपरिभागउरुः उरुःप्रमाणमस्या इत्यर्थे प्रमाणेद्वयसजसनदघ्नम् मात्रचः (5·2·37) इत्यनेनप्रमाण वाचकात्प्रथमान्तात् अस्येति षष्ठ्यन्तेन निर्दिष्टप्रमेयेर्थे द्वयसच्दघ्नच्मात्रच् इति क्रमशः त्रयः प्रत्ययाः, उरुस् इत्येतः, क्रमशः त्रिषु प्रत्ययेषु जातेषु सौ तद्धितान्तत्वेन प्रातिपदिकात् सोर्लुॅकि ङीपि 'यस्येति च' (6·4·148) इत्यलोपे तस्य लोपे क्रमशः ऊरुमात्री, इति सिद्धयन्ति।

1. अ. को., 2/3/5

'पञ्चतयी' इतिरूपम्—पञ्च अवयवा अस्यावयविन इत्यर्थे अवयव बोधकात्प्रथमान्तात्सख्यावाचकात् अस्येति निर्दिष्टेऽवयविनि तयप् इत्यर्थकेन 'संख्याया अवयवे तयप्' (5·2.42) इति तयपि 'पञ्चन् जस् तय' इति जाते जसो लुकि सुवन्तत्वेन 'स्वादिष्वसर्वनामस्थाने' (1·4·17) इति वापदत्वान्नलोपे ङीपि अलोपे सौ तस्य लोपे सिद्धयति ।

अक्षिकी' इति रूपम् ....अक्षैः = पाशैर्दीव्यति = क्रीडति – विजिगीषते वेत्यर्थे 'तेन दीव्यति' (4·4·2) इति तृतीयान्ता दक्षशब्दात् ढकि ढस्येकः' (6·3.50) इति ढस्येकादेशे अलोपे आदिवृद्धौ तद्धितान्तत्वात्प्रातिपदिकत्वे तृतीयायाः 'सुपोधातु प्रातिपदिकयोः' (2·4·71) इति लोपे ङीपि 'यस्येति च' इत्यलोपे सौ तस्य लोपे सिद्धयति । 'लावणिकी' इति रूपम्—लवणं पण्यम् बिक्रयायय द प्रसारितम् अस्येत्यर्थे 'तदस्यपण्यम्' (4·4·51) इत्धिकारे 'लवणाट्ठञ्' (4.4·52) इति प्रथमान्तात् लवण शब्दादस्येति षष्ठ्यर्थे विक्रेतरि ठञ् प्रत्यये ढस्येकादेशे लोपे आदिवृद्धौ तद्धितान्तत्वेन प्रातिपदिकत्वात् 'सुपोधातुप्रातिपदिकयोः' इति प्रातिपदिका वयवस्य सोर्लुकि ङीपि अलोपे सौ तस्य 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहल् (6·1·68) इति लोपे सिद्धयति ।

'यादृशी' इति रूपम् यामिव पश्यन्ति जनाः येयंयाइव दृश्यमाना 'यादृशी' इति । अत्र यच्छब्दो यत्सदृशपरः, तस्मिन्नुपपदेत्यादिषु दृशोऽनालोचनेकञ्चनेकञ्च' (3·2·60) इति कर्मकर्तरि कञ् । या इव ज्ञानविषयो भवतीत्यर्थः । नच अनालोचने' इति निषेधात्कञोऽप्राप्तिः, अत्र दृशेज्ञानि विषयीभवनार्थकत्वेन ज्ञानविषयी करणस्यैवावलकनार्थकत्वे निषेध प्रवृत्तेः, उपपद समासे 'आसर्वनाम्नः' (6·1·91) इति यदो दस्याकारादेशे सवर्णदीर्घे यादृशशब्दान्ङीपि अलोपे सौ तस्य लोपे सिद्धयति ।

'इत्वरी' इति रूपम—एतुं शीलमस्या इत्यर्थे 'इणगतौ' (अ. प. अ. 17) इत्यतः 'इण् नशजिसर्तिभ्यः क्वरपः (3·2·163) इति क्वरपि 'ह्रस्वस्यपिति कृति तुक्' (6·1·71) इति तुकि कृदन्तत्वेन प्रातिपदिकत्वान्ङीवि सौ तस्य लोपे सिद्धयति ।

इदमत्रावधेयम्—ताच्छीलिकेणेप्यण् कार्यं भवति । तदुक्तं 'ताच्छीलिकेऽणेऽपीति । तच्छीलमित्यधिकारे भवस्ताच्छीलिकः । ताच्छीलिकेणेऽपि अण्कार्यं भवतीति तदर्थः । तच्छीले भवस्ताच्छीलिक इति तु नार्थः, प्रथमान्ताच्छीलवाचकादस्येति षष्ठ्यर्थेणो विधानात् । अत्र वचने ज्ञापकम् च 'कर्मस्ताच्छील्ये' (6·4·172) इति सूत्रमेव । तथाहि ताच्छील्ये णस्ये कर्मन् शब्दस्य सौ

परे टिलोपो निपात्यते । 'अन्' (6.4·177) इति प्रकृतिभाव बाधनार्थम् । प्रकृति भावस्तु अण्प्रत्यये परे विधीयते इतिणे प्रकृतिभावाप्राप्त्या तद्बाधनार्थं टिलोपनिपातनं व्यर्थं सञ्ज्ञापयति—'ताच्छीलिकेणे व्यणकृतानि कार्याणि भवन्तीता तथा च—'अन्' इति प्राप्तप्रकृतिभावाबधनार्थं निपातनं चरितार्थम् । वचनस्यास्य फलम्—'चौरी, तापसीत्यादि ।' तत्र—'चौरी' इति रूपम्—चुराशीलमस्य इत्यर्थे 'छत्रादिभ्योणः' (4·4·62) इति ण प्रत्यये 'चुरासुण' इत्यवस्थायां णस्यत्वलोपयोरादिवृद्धौ च: 'यस्येति' (6·4·148) इत्यालोपे प्रातिपदिकावयवस्य सोः 'सुपो धातु प्रातिपदिकयोः' (2·4·71) इति लोपे चोर शब्दात् ण प्रत्यान्त् 'टिड्ढाणञ् द्वयसज्दघ्नञ् मात्रच् तयप्ढक्ठञ्कञ् क्वरपः' (4·1·15) इति ङीपि अलोपे सौ तस्यलोपो चौरी इति सिद्धयति । येवं तपः शीलमस्या इति तापसो इत्यादि बोध्यम् । टिड्ढेति सूत्रे वक्ष्यमाणेत्यत्र टित्वात् उगित्वाच्चङीप् प्राप्तः । इत्याशङ्क्य 'यासुटो ङित्वेन' 'लाश्रमनुबन्धकार्यंनादेशानाम्' इति ज्ञापनान्न भवति श्नशानचः शित्वेन क्वचिदनुबन्धकार्येप्यनल्विधाविति निषेधज्ञापनाद् वा'' इति समाहितम्—भट्टोजिदीक्षितेन ।

अत्रेदमवधेयं 'वक्ष्यमाणा' इत्यत्र 'उगितश्च' इति न स्यात्, परत्वेन 'टड्ढ' इत्ययेनबाधात् इति । अतः वक्ष्यमाणेति, बहुवक्ष्यमाणा इत्यस्याप्युपलक्षणम् । यत्रोत्र स्थानिवत्वेन 'उगितश्च' (4·16) इति ङीप् प्राप्नोति नचात्र टित्वात् ङीपः प्राप्तिः यतः टिदश्चोपसर्जनम् । अनुपसर्जनस्यैव टिमः 'टिड्ढेति' ङीप् भवति इति सिद्धान्तः । इत्थं वक्ष्यमाणेत्यत्र टित्वात् बहुवक्ष्यमाणेत्यत्र' उगित्वाच्च ङीपः प्राप्ति इति दीक्षिताशयः तत्र 'वचपरिभाषणे, इति वच् धातोः' ब्रूञ्व्यक्तायांवाचि' इत्यतः ब्रूधातोर्वा कर्मणि । लृटः सद्वा' (3·3·14) इति शानजादेशे 'स्यतासीलृलुटोः' (3·1·33) इति स्य प्रत्यये ब्रुवोस्तु 'ब्रुवोवचिः' (2·4·53) इति वचादेशे कुत्वे सस्य षत्वे 'आनेमुक्' (7·2·82) इति मुक् नस्य णत्वे टापि च 'वक्ष्यमाणा' इति सिध्यति ।

'बहुवक्ष्यमाणा' इति तु बहुवक्ष्यमाणः यस्या विदुष्याः इत्यर्थे बहुव्रीहिः ।

नचात्र स्थानिको लृटः टकारस्य ऋकारस्यचाल्त्वेन तन्निमित्तक ङीब्विधौ 'अनल्विधावि' ति स्थानिवद्भावनिषेधेन ङीपः प्राप्तिरेव नास्तीति शङ्क्यः । यतः इत्सञ्ज्ञाकालनिमित्तके इत्वघटितवर्णमात्रवृत्तिधर्माघटित धर्मातिदेशे । क् ङीति विहितस्य 'घुमास्थागापाजहातिसहलि' (6·4·66) इतीत्वस्य 'नल्यपि' (6·4·69) इति निषेधसामर्थ्येन 'अनल्पिधौ' इति प्रवर्तते अनुबन्धकार्ये 'अनलिधौ' इति प्रवृत्तौ हि क्त्वावृत्तीत्वधर्म–विशिष्टाल्मात्र वृत्तिकत्वधर्मघटितकित्वस्याल्मात्र वृत्तिघटितत्वेन स्थानि वद्भावस्य निषेधात् । ल्यपः कित्वाभावे नेत्वाप्राप्त्या 'नल्यपि' (6·4·69) इति निषेधो व्यर्थः । उक्तार्थे ज्ञापिते तु टित्वोगित्वनिमित्तकस्य ङीपो नुबन्धकार्यत्वेन स्थानिवत्वनिषेधाप्रवृत्या स्थानिवत्वेन ल्यपः कित्वात् प्राप्तस्य ईत्वस्य वारणाय 'नल्यपि' (6·4 69 इति सूत्रे स्वांशे चरितार्थो भवति । फल च

'रमायाम्' 'नद्याम्' इत्यादौ याडाटौ अपवादत्वाद् बाधित्वा 'ङेराम्नद्याम्नीभ्यः' (7·3·116) इत्यामि कृते स्थानिवत्त्वेनामो ङित्वाद्याडाटौ भवतः। अन्यथा अत्र याडाटौरप्राप्त्या नुडापत्तिः स्यात्। इत्थं लृडादेशस्यशानचः टित्वादुगित्वाच्च 'वक्ष्यमाणे' त्यत्र 'टिड्ढेति ङीपः प्राप्तिरस्तीति दीक्षित शङ्कायाः आशयः।

दीक्षितकृतसमाधानस्यचायमाशयः—'यासुट्परस्मैपदेषूदात्तोङिच्च' (3·4·1·3) इति लिङादेशानां परस्मैपदानां यासुट्, स यासुट् ङित् भवतीति ब्रूते, अत्र यासुटो ङित्वविधानं यासुटोङित्वे फलाभावात् 'अवयवेष्वचरितार्थःसमुदायोपकारको भवति' इति न्यायेन 'यदागमन्यायेन यासुटः परस्मैपदावयवतया यासुड्विशिष्टं परमैपदं ङिदित्यर्थे परस्मैपदस्यलिङ्गस्थानिकस्य स्थानिवत्वेन ङित्वस्य सिद्धतया समुदास्य ङित्वार्थं कृतं यासुटः कृतं ङिद्वचनं व्यर्थी भूय ज्ञापयति—लाश्रयमनुबन्धकार्यं नादेशानामिति।

तथा च लृड्गतटित्वोगित्वयोः स्थानिवत्वेनादाय क्रमशः 'वक्ष्यमाणेत्यत्र च 'टिड्ढेति' उगितश्चेति ङीप् प्रत्ययो न भवतीति।

अथ यदि 'लाश्रयानुबन्धकार्यस्य तदादेशेषु अभावकल्पनेऽपि ब्रूतात्' इत्यत्र 'ब्रूव ईट्' इति पितोविधीयमानस्यलाश्रयानुबन्धकार्यत्वाभावेन ईटि कर्त्तव्ये तातङः स्थानिवत्वेन पित्वादीडाप्तिर्दुर्वारा, तथा च भाष्ये 'ङिच्च' इत्युक्तेः लकारगतङित्वं तिबादावतिदेशेन न लभ्यते। अतएव विशेषविहितत्वेन यासुटो ङित्वेन पिन्त्वस्य बाधाद् 'युयात' इत्यत्र 'उतोवृद्धिलुकि हलि' (7·3·89) इति वृद्धिर्न तथा च वृद्ध्यभावाय यासुटो ङित्वमावश्यकमित्युक्तं चेत् तदा श्नादेशस्य शानचः शित्वेन अनुबन्धघटितस्यापि अल्धर्मघटित धर्मस्यातिदेशस्य क्वचिदल्विधाविति न इति निषेध इति ज्ञापनात् 'वक्ष्यमाणा' बहुवक्ष्यमाणा इत्यनयोः टित्वोगित्वयोः स्थानिवत्वे नालाभान्न ङीप्।

भट्टनागेशस्तु शानचः शित्वं 'हलःश्नः' (3·1·83) इति सूत्रे एवं भाष्यकृता प्रत्याख्यात मिति तेनापि क्वचिदनुबन्धघटित धर्मस्यस्थानिवत्वेऽप्यनल्विधाविति निषेधः प्रवर्तते इति ज्ञापयितुं न शक्यते तस्मात् 'वक्ष्यमाणी' इति भवितव्यम्, 'वक्ष्यमाण' इत्यस्यैव शिष्टाभिमत्वे अजादित्वात् टाप् कल्पनीयः इत्याहुः। नागेशसिद्धान्ते 'वक्ष्यमाणीति' बहुवक्ष्यमाणीत्यस्या प्युपलक्षणम् इत्यवधेयम्।

इदमत्रावधेयं स्त्रीप्रत्यये 'अनुपसर्जनात्' (4·1·14) इत्यधिकारः 'यूनस्तिः' इत्यभिव्याप्येति पाणिनीयः सिद्धान्तः। तत्र 'अनुपसर्जनादित्यस्य' न उपसर्जनम्, तस्मादिति व्युत्पत्तिः। उपसर्जनम् अप्रधानम्, ततो न ङीबादिः। इति सूत्रार्थः।

अनुपसर्जनादित्यत्र नञ् हि प्रसज्ज्यप्रतिषेधः, यदि पर्युदासः तदा विरुद्धार्थेऽपि समासात् उपसर्जनविरुद्धात् प्रातिपदिकादित्यर्थे कुकुटी इत्यादौ उपसर्जन विरुद्धत्वाभावाजातिलक्षणो ङीबादिर्नस्यात्। प्रसज्ज्यप्रतिषेधेतु न दोष उपसर्जने एवं निषेध प्रवृत्तेः। अधिकारस्यास्य 'बहुकुरुचरा' इत्यत्र टिल्लक्षण ङीपो भावः, बहवो युवानो यस्यां सा 'बहुयुवा' इत्यत्र च 'यूनस्तिः' (4·1·77) इति ति प्रत्ययस्य यूवन् शब्दात् अभावश्च फले सुप्रसिद्धे स्तः। तत्र जिज्ञासते बहवः कुरुचरा यस्यां नगर्यां सा बहुकुरुचरा, इत्यादौ 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः (4·1 15) इति ङीप् वारणाय कथमिदमधिकारसूत्रमावश्यकं कथं च 'बहुयूवेत्यत्र' 'ति' प्रत्ययवारणाय तदधिकारसूत्रमावश्यकम्? यतः 'समासप्रत्ययविधौ प्रतिषेधः' (वा. 1·1·72) इति तदन्तविधिनिषेधात् टिद्रूपात् प्रातिपदिकात् ङीब् विधानेन टप्रत्ययगतटित्वस्य कुरुचरे आरोपेऽपि' 'बहुकुरुचर' रूपप्रातिपदिकस्य टिद्रुपत्वाभावाद् ङीपः प्राप्तिरेव नास्ति, तथा 'युवतिः' इत्यत्र यथा यूवन् शब्दात् ति प्रत्ययो भवति तथा न 'बहुयुवा' इत्यत्र ति प्रत्ययस्य प्राप्तिः। बहुयुवन् शब्दस्य युवन् शब्दत्वाभावात् स्वरूपमित्युक्तेः। अस्याः जिज्ञासायाः समाधानमिदमेव यदयमनुपसर्जनात् इत्यधिकारएव सर्वत्र स्त्री प्रत्ययेषु तदन्तविधिं ज्ञापयतीति। तथा च टित् 'कुरुचर' इति तदन्तात् 'बहुकुरुचर' इत्यस्यात् ङीप् प्राप्नोतीति तद्वारणाय तथा युवतिः इत्यत्र युवन् शब्दादिव स्त्रीत्वे यथा ति प्रत्ययः प्राप्नोति तथा बहुयुवेत्यत्रापि युवन् शब्दान्तात् बहुयुवन् शब्दात् 'ति' प्रत्ययः प्राप्नोतीति तयो वारणाय 'अनुपसर्जनात्' (4·1 14) इति सूत्रमावश्यकमिति। बहुकुरुचरा' इत्यत्र बहुयुवा इत्यत्र च कुरुचर युवन् शब्दौ बहुव्रीहिसमासघटकपदार्थतया उपसर्जनम् अन्यपदार्थोहि प्रधानं भवति। स्त्री प्रत्यये तदन्तविधि ज्ञापनस्यान्यत्र फलन्तु 'वन्नन्तं यत्तदादि तदन्तं यत् स्त्रियां प्रातिपदिकं ततोङीबित्यर्थेन बहवो धीवानो यस्यां सा बहुधीवरी इत्यत्र 'वनोरच' (4·1·7) इति ङीब्रोः सिद्धिः। नच तत्रापि अनुपसर्जनात् इति निषेधः शङ्क्यः तत्र तदधिकाराभावादित्यलंपल्लवितेन।

ङीप्प्रत्ययविधायकेषु षष्ठं सूत्रम्—'दामहायनान्ताच्च' (4·1·27) इति। अत्र—'संख्याव्ययादेर्ङीप्' (4·1·26) इत्यतः 'संख्यादेः' 'ङीप्' इतिचानुवर्तते, अस्वरितत्वाद् अव्ययग्रहणं नानुवर्तते, 'बहुव्रीहेरुधसोङीप्' (4·1·25) इत्यतश्च 'बहुव्रीहे' रित्यनुवर्तते 'स्त्रिया'मित्यधिकृतम्, तथाच—'संख्यादेर्बहुव्रीहेदाम्हायनान्ताच्चस्त्रियां ङीप् स्यादितिसूत्रार्थः। द्विदामन्शब्दे दामान्ते 'डाबुभाभ्याम्' (4·1.13) इति डापि, 'अनउपधालोपिनः '(4·1·28) ङीपि, 'अनोबहुव्रीहेः (4·1·12) इतिङीप् प्रतिषेधे च प्राप्ते, द्विहायनीत्यत्र च हायनान्ते अदन्तत्वाहापि प्राप्ते सूत्रमिदमुभयत्र ङीवर्थमारब्धम्। बहुव्रीहिविशेषत्वादेव सिद्धष्षष्टार्थ-मिह अन्तग्रहणम्। अव्ययग्रहणानुवृत्तेः फलम् 'उद्दामावडवा'[1], इत्यत्र पक्षे डाब्-निषेध-ङीपां सिद्धिः।

---

1. 'उत्क्रान्तं दामयस्या' इत्यर्थः। अव्ययपूर्वकस्य 'उद्दामन' इति बहुव्रीहेः संख्यापूर्वकत्वाभावात् दामान्तत्वेऽपि ततोङीपो भावे डापि टिलोपे सौरूपम्।

अस्य च 'द्विदाम्नी'[2], 'द्विहायनी बाला'[3] 'त्रिहायणी[4] बाला' चतुर्हायणीबाला[5] इत्यादीन्युदाहरणानिसन्ति ।

डीप् प्रत्यय विधायकेषु सप्तमं सूत्रम्—'द्विगोः' (4·1·21) इति । अत्र 'स्त्रियां' मिति 'अत' इति 'डीबिति चानुवर्तते । तथाच—'अदन्ताद् द्विगोर्ङीप्स्यात् इति सूत्रार्थः । उदाहरणम्—त्रिलोकी[6] इति ।

डीप् प्रत्यय विधायकेषु अष्टमं सूत्रम्—

'नित्यं संज्ञाछन्दसो' (4·1·29) इति । अत्र 'अनउपधालोपिनः' (4·1·28) इति, डीप् इति चानुवर्तते, 'स्त्रियाम्' इति चाधिक्रतन् । अनउपधा 'इति विकल्पस्यापवादः, आरम्भसामर्थ्यान्नित्यत्वेसिद्धे नित्यग्रहणमुत्तरत्र' अन्यतरस्याम् इत्यस्य अननुवृत्ति सूचनार्थम् । 'अन्नन्ताद् बहुव्रीहेरुपधा लोपिनो डीप्स्यात्सज्ञाछन्दसोः इति च सूत्रार्थः ।

उदाहरणम्—'सुराज्ञी', 'शतमूर्ध्नी', इति । तत्र 'सुराज्ञी' इति रूपम्—शोभनोराजायस्यामित्यर्थे बहुव्रीहौ 'अनउपधा' इतिवैकल्पिक ङीपं बाधित्वा नित्य ङीपि अलोपे स्वादिकार्ये च कृते सिद्धयति । शतमूर्ध्नीतिरूपं शतं मूर्धानी यस्या' इत्यर्थे पूर्ववत् नित्यंङीपि सिद्धयति । नन्विदं सूत्रं व्यर्थम्, छन्दस्यापाद्यमानस्या-

---

2. 'द्वेदामनी यस्या इत्यर्थः, संख्यापूर्वक बहुव्रीहित्वात्दामान्तत्वाद् डीप् ।

3. 'द्वौहायनौयस्या इति तदर्थः, हायनान्तात संख्यादि बहुव्रीहेः द्विहाव् शब्दात् डीप् ।

4 'त्रयः हायना यस्या' इत्यर्थः. त्रिहायनशब्दात् पूर्ववत् डीप् प्रत्यये कारलोपे 'त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्' (वा. 4·1·27) इति णत्वे रूपम् ।

5. 'चत्वारो हायना यस्या' इति तदर्थः । पूर्ववत् चतुर्हायनशब्दात् डीप्यलोपेणत्वे च रूपम् ।

6. त्रयाणां लोकानां समाहार इत्यर्थे 'तद्धितार्थोत्तरपदसमाहारेच' (2·1·51) इति, समासे 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः

इति स्त्रीत्वे प्राप्तं टापं बाधित्वा ङीप् 'यस्येति च' (4·6·148) इत्यलोपे स्वादि कार्येकृतेच रूपमिदम् । त्रयाणलोकानां समाहार इत्यर्थे च क्रमशः 'त्रिफला' 'त्रयनिका'—इत्यादौ 'द्विगोः' इति ङीपं बाधित्वा त्रिफल—त्र्यनीकशब्दाभ्याम् अजादौ पाठसामर्थ्यात् 'अजाद्यतष्टाप्' (4·1·4) इति टाप्प्रत्यय एव भवतीत्यवधेयम् ।

भावात् दृष्टस्य ङीबन्तस्य वैकल्पिकङीपासिद्धिः, संज्ञाशब्दानामध्ययनादितः प्रयुक्तानां नियतानुपूर्वीकाणां ङीपासिद्धिश्च सुतरां सिद्धेति चेन्न, संज्ञाछन्दसोः इत्यस्योत्तरार्थमावश्यकत्वेन स्पष्टार्थमत्रैव तदुक्तेः नित्यग्रहणमप्युत्तरत्रविकल्पनिवृत्यर्थम् ।

**ङीप् प्रत्यय विधायकेषु नवम् सूत्रम्—**

''पादोऽन्यतरस्याम्' (4·1·8) इति । अत्र अन्तलोपात्मके समासान्ते कृते परिशिष्टः पाच्छब्दों गृह्यते । पूर्वसूत्रात्ङीपइत्यस्थानुवृत्तिः । तथा च कृतसमासान्तात् पाच्छब्दान्तात् प्रातिपदिकात् ङीब्वास्यात्' इति सूत्रार्थः ।

उदाहरणाम् —द्विपदी. द्विपात् द्वौ पादौ यस्याः इति इहुव्रीहिः । 'संख्यासुपूर्वस्य' (5·4 140) इति पाच्छब्दान्तस्याकारस्य लोपो, ङीपि भत्वात् 'पादःपत् (6 4·130) इति पादः पदादेशे स्वादिकार्येच कृते 'द्विपदी'ति सिद्धयति । ङीबभावपक्षे 'द्विपा' दिति रूपम् ।

**ङीप् प्रत्यय विधायकेषु दशमं सूत्रम्—**

'पुरुषात्प्रमाणेऽन्यतरस्याम्' (4·1·24) इति । अत्र द्विगोरिति, तद्धितलुकीति, ङीबिति, चानुवर्तते । स्त्रियामिति, प्रातिपदिकादिति चाधिक्रियेते । तथा च—'प्रमाणे यः पुरुषस्तदन्ताद् द्विगोङीब्वास्यात्तद्धितलुकि' इति सूत्रार्थः ।

उदारणम्—'द्विपुरुषी, द्विपुरुषावा परिखा'[1] इति ।

**द्विपुरुषी इति रूपम्—**

द्वौपुरुषौ प्रमाणमस्याः इति विग्रहे 'तद्धितार्थो-त्तरपदसमाहारे च' (2·1·51) इति समासे 'संख्यापूर्वो-द्विगुः' (2·3·52 इति द्विगु संज्ञायाम् । द्विगोः प्रमाणवाचकत्वाभावेऽपि लुग्विधानसामर्थ्यात् 'प्रमाणेद्वयसच्दघनञ्मात्रचः—(5·2·37) इति विहितस्य मात्रचो लुकि 'तदस्य परिमाणम्' (5·1·57) इति वा विहितस्य ढकष्ठञो वा 'अध्यर्ध0' इति लुकि वैकल्पिके ङीपि स्वादिकार्येच कृते सिद्ध्यति । ङीपो भावे तु टापि द्विपुरुषा इति ।

**ङीप् प्रत्यय विधायकेषु एकादशं सूत्रम्—**

'पूतक्रतोरैच' (4·1·36) इति । अत्र 'ऐ' इति सौत्रत्वाल्लुप्तप्रथमान्त आदेश एव, नतु प्रत्ययः, उत्तर सूत्रे 'उदात' ग्रहणात्, प्रत्ययत्वेहि 'आद्युदात्तश्च'

---

1· 'दुर्गं' परितः तत्संरक्षणाय निर्मितो जलाशयः' इतितदर्थः ।

(3·1·3) इत्यादयुदात्त विधानदेवोदात्तत्वे सिद्‌वे तद्‌वैयर्थ्य । स्पष्टमेव इह ङीबुनुकृष्यते 'पूतक्रतुशब्दात् स्त्रियाँ प्रयोगे । ङीप् प्रकृते रैकारश्चान्तादेशः' इति च सूत्रार्थः ।

उदाहरणम्—'पूतक्रतायी' इति ।

'पूतक्रतायी' इति रूपम्—पूतः क्रतुर्येन स पूतक्रतुः, तस्य स्त्री 'पूतक्रत्रायी'। पुंयोगाद्‌धेतोः स्त्रियां वर्तमानात्पूतक्रतुशब्दान्ङीपि उकारस्यैकारायादेशयोः कृतयोः सिध्यति । येनयज्ञः पवित्रीकृतस्तस्य पत्नोतितदर्थः ।

पुंयोग इत्यस्य फलं तु—'यया तु स्त्रिया स्वयं क्रतवः पूतास्तत्र 'पूतक्रतुः' इत्येवभवविति ।

ङीप् प्रत्यय विधायकेषु द्वादशं सूत्रम्—

'मनोरौ वा' (4·1·38) इति । अत्र उदात्त इति, ऐ चेति ङीबिति चानुवर्तते । तथा च मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा' ताभ्यां' सन्नियोग शिष्टोङीप् च' इति सूत्रार्थः सम्पद्यते ।

अत्रइदमवधेयम्—'औकारेण नास्त्युदात्त इत्यस्य सम्बन्धः, किन्तु ऐकारेणेवोदात्त इति सम्बध्यते । वा ग्रहणेन ऐकार औकारश्च द्वावपि विकल्प्यते । यदा च द्वावपि न भवस्तदा तत्सन्नियोगशिष्टोङीवपि न, तथाच ताभ्याम् = ऐकारौकाराभ्याम्, सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तितिरति न्यायात् । अयञ्च न्यायः 'पूतक्रतौरैच' (4·1·36) इति भाष्ये लिङ्गसन्नियोगेन सर्वत्रागमादेशानां वचेन लिङ्गलुकि तत्कृतं प्राप्नोति इत्यनेन ध्वनितः इति । 'उदात्तं कारश्चे' समासनिर्देशेन तथ्यमुपर्युक्तं विज्ञायते । अस्य मनायी, मनावी, इति च उदाहरणे स्तः । उरिति निदिति चानुवर्त्य 'शृस्वृस्निहित्रप्यसिवसिहिननिक्लिदिबन्धिमनिभ्यश्च' (उणा0 1/10) इति सूत्रेण मन ज्ञाने इत्यत उप्रत्ययः, स च निदिति मनुशब्द आद्युदात इति शेषनिधातेनानुदात्तस्तस्य स्थाने ऐकार उदात्तः, औकार देशश्चान्तरतम्मादनुदात्त एव, तेन सह उदात्त इतयस्यासम्बन्धात् । तयोरभावे सन्नियोग शिष्टो ङीवपि न । एवञ्च 'मनायी, मनावी, मनुः' इति मनोः स्त्रीत्यर्थे मनेशब्दाङीपि । ऐकारादेशे, ऐकारस्यच आयादे स्वाकिकार्येच कृते मनायी' इति मध्योदात्तः । मनावी इति च शब्दान् ङीपि औकारादेश औकारस्य आवदेशस्वादि कार्यकृते-सिद्धः । मनुः प्रजापति विशेषः । ततः एकारौकारयोरभावे—ऐकारौकारयोरभावेतत्सन्नियोग शिष्टो ङीवपि नेति 'मनुः' इतिपक्षेरूपम् । 'मनावी, मनुः इतिच द्वयमाद्यदात्तमित्यवधेयम् ।

ङीप् प्रत्यय विधायकेषु त्रयोदशं सूत्रम्—

'यञश्च' (4·1·16) इति। अत्र 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (4·1·15) इति सूत्रे एव यञः पाठेन ङीपी सिद्धे 'प्राचांष्फतद्धितः' (4·1·17) इति उत्तरसूत्रे यञ एवानुवृत्तिर्यथा स्यादित्यतार्यं योगविभागः, तत्रच 'ऋन्नेभ्योङीप्' (4.1.5) इत्यतो ङीवित्यनुवर्तते, स्त्रियामित्यधिकारल्लब्धम्, यञः प्रत्ययत्वे तदन्तविधिः, तथाच—'यञन्तात्स्त्रियां' ङीप्स्यात् 'अकारलोपे कृते' इति सूत्रार्थः। गार्गी'[1] इतिचास्योदाहणम्।

ङीप्प्रत्ययविधायकेषु चतुर्दशं सूत्रम्—

'रात्रेश्चाजसौ' (4.1.31) इति। अत्र 'अजसौ' इत्यस्य न जसिः अजसिस्तस्मिन्' इत्यर्थः, 'आहौ प्रभूता दिभ्यः' इतिवच्चात्र इकारउच्चारणार्थः ङीपि, 'छन्दसी'ति चानुवर्तते। तथा च—'रात्रिशब्दान् ङीप् स्यात्, अजस् विषये छन्दसी'ति सूत्रार्थः।[2] 'रात्रि व्यख्यदायती' इति चास्योदाहरणम्।

ननु 'तिमिरपटैरवगुण्ठिता रात्र्यः' इति गोंनस्यात्, छन्दसीत्युच्यते, नचेदं छन्दः, 'अजसा' वितिच्च, किंचवेदेऽपि 'रात्र्यः' इति प्रयोगोनस्याज्जदिति चेन्मैवम्। यतः 'कृदिकारादक्तिनः' इत्यनेन रात्रि् ङीषिलोकेवेदच 'रात्र्यः,' इति प्रयोगस्यसाधुपद्यते। 'राशदिभ्यां त्रिप्' इति राधातोस्त्रिपिनिष्पन्नो यं हि रात्रि शब्दो व्युत्पत्तिपक्षे कृदिकारान्तः। अव्युत्पत्ति पक्षेऽपि रात्रिशब्दात् 'सर्वतो क्तिन्नर्थात्' ङीषि 'रात्र्यः' इत्यस्यसाधुत्वमुपपद्यते।

नागेशभट्टस्त्वत्र 'अजसादिष्विति वक्तव्यं, रात्रिं रात्रिं सहोयित्वा। अजसाविति किम्? यास्ताराभ्रयः। संज्ञायां तु लोकेऽपिङीबन्त एव। वृत्तौ 'संज्ञाछन्दसो' रित्यनुवर्त्तनात् राशदिभ्यान्त्रिबिति त्रिबन्त आधुदात्तो रात्रिशब्दः[1] इत्याह।

---

1. गर्गस्यापत्यं स्त्रीत्यर्थे 'गर्गादिभ्योयञ्' (4·1·5) इति यञि इत्संज्ञालोपयोः 'गर्ग अस् य' इति दशायां तद्धितान्तत्वात् प्रातिपदिकत्वे ङसो लुकि आदिवृद्धौ अकारलोपे गार्ग्यशब्दात् ङीपि 'यस्येति च' (6·4·148) इत्यलोपे 'हलस्तधितस्य' (6·4·150) इति यलोपे स्वादिकार्ये च कृतिरुवैमिदम्।

2. रात्रिशब्दाच्छन्दसि ङीप्।

1. ल0श0शे0वैदिकप्र0पृ0, 596।

15. ङीप् प्रत्यय विधाकेषु पञ्चदशं सूत्रम्—

'वनोरच' (4·1·7) इति अत्र 'वनः' इति पञ्चम्यन्तम् 'र' इति लुप्त-प्रथमान्तम् । अकारः उच्चारणार्थः 'वनोनहशइतिवक्तव्यम्' (वा0 सं0 72) इत्यत्र हशन्ताद्विहितो यो वन् 'इत्युक्त्या वन्पदेन प्रत्ययस्यैवग्रहणम् । निर-नुबन्धकस्यवन्प्रत्ययस्याभावात्' उत्सृष्टानुबन्धग्रहणेसामान्यग्रहणम् 'इति परि-भाषया वन्नित्यस्य 'प्रत्ययग्रहणेयस्मात्विधिस्तदादेस्तदन्तस्यग्रहणम्' (परि0 शे0 परि023) परिभाषया वनन्त तदादिरित्यर्थस्तु: 'अधिकृतप्रातिपदिक–विशेषेणतया' येनविधिस्तदन्तस्य इतितदन्त विधौ वन्नन्ततदाद्यन्तात्---

प्रातिपदिकात् ङीप्रश्चादेशः स्यादितिसूत्रार्थः । 'रश्च कस्य स्थाने' इत्याकाङ्क्षायांहि सूत्रे सन्निहितत्वेन श्रूयमानत्वाद्वनः इत्यस्य नस्य भवतीति— वन्नन्ततद्यन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात् नस्य च रादेशः इति सूत्रार्थं फलति ।

सुत्वरी, अति सुत्वरी, धीवरी, अतिधीवरी शर्वरी इत्यादीनि चास्यो-दाहरणानि सन्ति । तत्र षुञ् अभिसवे '(स्वा0उ0अ0)' इति सु धातोः कर्तरि, 'सुयजोङ्वनिप्' (3/2/103) इति वनिपि ईकार ङ्कार पकाराणामित्वे लोपे च ' ह्स्वस्यपितिकृतितुक्' (6·1·71) इति तुकि 'सुत्वन्' इति वन्नन्त तदादेः प्रातिपदिकात् ङीपि अनुबन्ध लोपे नस्य रादेशे स्वादि कार्ये च कृते सुत्वरी इति सिध्यति । 'सुत्वामम् = स्नपयन्तम्, पीडयन्तम्, स्नान्तम्, मुरां संदधानं वा अति-क्रान्ता इत्यर्थे अत्यादयः क्रान्ताद्यर्थेद्वितीयया इति समासे प्रातिपदिकत्वे सुब्लुकि[1] ङीपि नस्य रादेशे स्वादि कार्ये च कृते अतिसुत्वरी इति सिद्धयति ।

डुधाञ्[2] धारणपोषणयोः इति 'धा' धातोः कर्तरि भाषायामपि क्वनिपि घुमास्थागा पाजहतिसांहलि (6.4·66) इतीत्वे धीवन् इति प्रातिपदिकात् अथवा ध्यायतेः[3] क्वनिपि सम्प्रसारणे[4] पूर्वरूपे[5] च 'हल' (6·4·2) इति दीर्घे च कृते 'धीवन्' इति प्रातिपदिकात् ङीपि नकारस्य रादेशे अनुबन्धलोपे स्वादिकार्ये च कृते 'धीवरी' इति, 'धीवारं = धारयन्तं पोषयन्तं वा ध्यायन्तं वा अतिक्रान्ता इत्यर्थे अत्यादय क्रान्ताद्यर्थ-द्वितीयया:' इति समासे प्रातिप्रतिकत्वे सुब्लुकि स्वादिकार्ये

1. 'सुपोधातुप्रातिपदिकयोः' (2·4·71) इत्यनेनेति शेषः ।
2. जु0उ0अ0 1117
3. 'ध्यैचिन्तायाम्' भ्वा0प0अ0, 933
4. 'ध्यायतेः सम्प्रसारणम्' इत्यतेनेतिशेषः ।
5. 'सम्प्रसारणाच्च' (6·1·108) इत्यनेनेति शेषः ।

च कृते अतिधीवरी इति च सिद्धयतः। शृणाति दुःखं या इत्यर्थे शृहिंशायाम्[6] इति शृ-धातोः कर्तरि पूर्ववत् वनिपिगुणे[7] रपरत्वे[8] च कृते 'शर्वन' इति प्रातिपदिकात् ङीपि नस्य रादेशे स्वादि कार्ये च कृते 'शर्वरी' इति सिद्धयति।

नचात्र रेफरुपाद् हशः परत्वात् ,वनो नहशः' इति निषेधः शङ्क्यः। यतः हशन्ताद्विहितस्यैव वनन्तेन ङीब्निषेधो भवतीति सिद्धान्तः।

एषु उदाहरणेषु 'सुत्वरी, धीवरी, शर्वरी, इति वनन्ततदादेः प्रातिपदिकस्योदाहरणानि, अतिसुत्वरी, अतिधीवरी इति च वनन्ततदाद्यन्त प्रातिपदिकस्योदाहरणे इत्यवधेयम्।

नच ग्रहणवताप्रातिपदिकेन तदन्तविधिर्नास्ति (परि0शे0परि039)। इति निषेधात् कथमत्र वनन्त तदाद्यन्त इत्यर्थ लाभः इति शङ्क्तम। यतः स्त्रियामित्यधिकारे नेयं प्रवर्तते, इत्यमहत्पूर्वाग्रहणेन ज्ञापितचरम्। सुत्रे गृह्माणस्य 'वनः' इत्यस्य प्रत्ययत्वेन प्रातिपदिकञ्च नास्ति।

नच अवावा[1] ब्राह्मणी राजयुध्वा[2] इत्यादौ वनन्तात् ङीब्रो कुतो नेति शङ्क्यम्। यतः 'वनोनहशइतिवक्तव्यम्' (वा0 4·1·7) इति वार्तिकं तौनिषेधति।

---

6. क्रमा0प0से0, 1512

7. 'सार्वधातुकार्द्धधातुकयोः' (7·3·44) इत्यनेनेति शेषः।

8. 'उरण् रपरः' (1·1·51) इत्यनेनेति शेषः।

1. 'ओणृ अपनयने' इति ओण् धातोः वनिपि 'विड्वनोरनुनासिकस्यात्' इति णकारस्य आत्वे 'एचोऽयवायावः' (6·1·78) इति ओकारस्य आवादेशे अवाव्न् इति प्रातिपदिकात् स्त्रियां 'वनोरच' (4·1·7) इति प्राप्तस्य ङीपो रादेशस्य च 'वनोनहशइति वक्तव्यम्' (वा0 4·1·7) नलोप इतिनिषेधे नलोपादिषु उपधाया नलोपे कृते सुलोलोपेच रूपमिदं सिद्धयति।

2. 'राजानं योधितवती' इत्यर्थे कर्मभूते राजन्युपपदे 'युध संप्रहारे' (दि0आ0अ0 1198) इति 'युध् धातोः पयन्तात् क्वनिपि णिलोपे।

16. ङीप् प्रत्यय विधायकेषु षोडशं सूत्रम्—

'वयसि प्रथमे' (4·1·20) इति । अत्र वेति = गच्छतीत्यर्थे 'वीगेति' इति वी धातोः 'सर्वधातुभ्योऽसुन्' (उणा० 4/189) असुनि वय इति रूपम् प्राणिनां कालकृतावस्था विशेषो वयः । तच्च त्रिविधम्—कौमारम्, यौवनम्, स्थाविरमिति—तथा च उक्तम्—

''पितारक्षति[1] कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तुस्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ।।'' इति ।

केचिद् वयः चतुर्विधं मनुते । तथाहि—

''प्रथमेनार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ।।'' इति ।

बाल्यम्, कौमारम्, यौवनम् बार्द्धक्यञ्चेति चतुर्विधमिति तदाशयः वयसीतिवयोरूपे प्रवृत्तिनिमित्त इत्यर्थः । यत्प्रातिपदिकनिष्ठशक्ततानिरूपित शक्यता वयोरूपप्रवृत्तिनिमित्तं तत्प्रातिपदिकं वयोवाचकम् ।

यत्तु प्रातिपदिकं प्रकरणादिना वयो गमयति न तद्वयोवाचकम् । यथा—उत्तानशया, लोहितपादा, इत्यादयः । एते न वयः प्रवृत्तिनिमित्तकाः, किन्तूत्तानशयनादिना यौवन वयोद्योतका एवं । एवम्—द्विवर्षा, त्रिवर्षा इत्यादयः ।

इह वयसीत्यस्य विद्यमानादिति शेषः । ''अजाद्यत[2]'' इत्यतः 'अत इति' ऋन्नेभ्यः[3] इत्यतो ङीबिति चानुवर्तते, प्रातिपदिकादिति, स्त्रियामिति चाधि-

---

अनुबन्धलोपे उपपदसमासे प्रातिपदिकत्वात्सुपो लुकि नलोपे च कृते निष्पन्नात् स्त्रियांवर्तमानात् राजयुध्वन् शब्दात् 'वनोर च' इति प्राप्तयोः ङीप् रादेशयोः 'वनो न हश् इति वक्तव्यम्' इति निषिधेऽर्येषुसौ नान्तोपधादीर्घे नलोपसुलोपयोः 'राजयुध्वा' इति सिध्यति ।

1. मनु. 9/अ./3/श्लोक
2. 4/1/4
3. अष्टा० 4·1·5

क्रियेते । अत इत्यस्य प्रातिपदिक विशेषणतया तदन्तविधिः । तथा च 'प्रथम वयो वाचिनो दन्तात् स्त्रियां ङीप् स्यात्" इति सूत्रार्थः ।

उदाहरणम्—कुमारी, इति ।

कुमारी इति रूपम्—प्रथमेवयसि वर्तमानात् कुमारशब्दान्ङीपि अलोपे स्वादिकार्ये सति सिध्यति ।

ङीप्प्रत्ययविधायकेषु सप्तदशंसूत्रम्–'वर्णादनुनदात्तात्तोपधातोनः' (4·1·39) इति । वेति, ङीविति अनुपसर्जनात् प्रातिपदिकादिति चानुवर्तन्ते । स्त्रियाम्यिधिकृतम् । अनुदात्तादिति वर्णा-दित्यस्य विशेषणम्, तेन तदन्तविधिः । तोपधादित्यपि वर्णादित्यस्य विशेषणम्, तोपधादित्यस्य तकार उपधायस्य वर्णवाचकस्य तस्मादित्यर्थः । वर्णपद च न स्वरूपपरम्, तत्र तोपधादिति विशेषणस्य बाधात् । तथा च—'वर्णवाची यो नुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात् तकारस्य नकारादेशश्च' इति सूत्रार्थः ।

'एनी' 'एता' रोहिणी 'रोहिता' इत्यादि क्रमशः चास्योदाहरणानि । तत्र एनी इति रूपण्—

एत शब्दान् ङीपितकारस्य नकारे अलोपेसौतस्य लोपे च सिध्यति । ङीब भावे पक्षे एत शब्दात् टाबेवेति एताइतिरूपम् नत्वं तु न भवति ङीपा सन्नियोग शिष्टत्वात् । 'रोहिणी' 'रोहिता, रोहितशब्दो रक्तपर्यायः' लोहितोरोहितोरक्तः इत्यमरात् (1/5/15) । रोहितशब्दात्ङीपि तकारस्य नकारे अकारलोपेस्वादिकार्ये कृते 'रोहिणी' इति रूपम् । ङीब्रो रभावपक्षेटापि इति रूपम् ।

ननु 'अनुपर्जनात्' इति सूत्र श्रुतस्यैव विशेषणमिति 'टिड्ढ' इति सूत्र भाष्यल्लभ्यते इत्युक्तम् । तथा च वर्णवाची यो नुपसर्जन इत्येवार्थः स्यादिति त्रीण्येतानि यस्या इत्यर्थे बहुव्रीहावेतशब्दस्योपसर्जनत्वात् ङीप् नकारादेशश्च न स्यादिति चेन्न, अत्र वर्णवाचकान्तं यदनुपसर्जनं प्रातिपदिकं ततः ङीप् नकारौस्तः इत्यर्थेन त्र्येत इति प्रातिपदिकस्यानुपसर्जनत्वेनादोषात् ।

18. ङीप् प्रत्यय विधायकेषु अष्टादशं सूत्रम्—

'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' (4.1.37) इति । अत्र ऐगिति, ङीबिति चानुवर्तेते, स्त्रियामित्यधिकृतम् । तथाच—'एषामुदात्त ऐ आदेशः स्यान्ङीप् च' इति सूत्रार्थः ।

'वृषाकपायी,' 'अग्नायी 'कुसितायी कुसिदायी' इति चास्योदाहरणानि ।

तत्र, वृषाकपायी 'इति वृषाकपि शब्दः' अन्ते लघौ द्वयोवल्ह्वोः स परतो बह्वषः = बह्वच्कस्यफिषः = प्रातिपदिकस्य गुरुरुदात्त इत्यर्थकेन शान्तनवाचार्य प्रणीतफिट्सूत्रेण 'लघावन्ते द्वयोश्च बह्वषो गुरुः' इत्यनेन द्वयोर्लध्वोः परतः षकारात्परस्य गुरोराकारस्व उदात्तत्वे 'अनुदात्तपदमेकवर्जम्' (5·1·158) इति सूत्रेण षकाराकारं वर्जयित्वा सर्वस्यानुदात्तत्वेकपेरिकारस्यानुदात्तस्य ऐकारादेशे आन्तरतम्यादनुदात्त एव स्यात् । तस्य आदेशो प्युनुदात्त एव स्यादिति तद्वारणाया नुदात्तस्यापीकारस्य स्थाने उत्ताद ऐकारो विधीयते ङीप्च ऐकारस्य आयादेशो प्युदात्त एवेति स्वादिकार्येषु सिद्धम् । अग्नायी' अग्न्यादयस्त्रयः फिट सूत्रेण, कृदुत्तरप्रकृति स्वरेण च यथार्हमन्तोदात्ताः इति तत्रापि न फलम्, उदात्त इत्यस्य । कुसित कुसिद शब्दौ वृद्धि जीविपरैः । तत्र कुसितस्य स्त्री कुसितायी, कुसिदायीत्यत्र पूर्ववत्प्रक्रिया । कुसिद शब्दः निन्दिते कर्मणि कुसीदाद् दारिद्र्यं प्राप्नोति जनः इत्यभियुक्तोक्तेः । गत्यर्थादगिधातो 'अङ्गेर्नलोपश्च' (उणा 4/50) सूनिरिति किदिचानुवर्तते । इति नि प्रत्यये न लोपे च 'अग्निः' प्रत्ययाद्युदात्तस्वरेणान्तोदात्तः । आन्तरतम्यादिकार आयादेशश्चोदात्त एवेति नात्र उदात्त इत्यस्य फलम् । इत्थं वृषाकपिप्रभृतिभ्यः ऐकारादेशे ङीपि आयादशेस्वादिकार्येषूच कृतेषु क्रमशः वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी' इत्येते सिद्धि रित्यवधेयम् ।

19. ङीप्प्रत्यय विधायकेषु एकोन विंशतितमं सूत्रम्—

'संख्याऽव्यादेर्ङीप्' (4·1·26) इति । 'अत्र बहुव्रीहे' रित्यनुवर्तते । 'स्त्रिया-मित्यधिकाराल्लभ्यते । 'संख्याव्ययादे रुधो न्ताद्वबहुव्रीहेः स्त्रियां ङीप् स्यात्' इति सूत्रार्थः । ङीषोऽपवाद इति 'बहुव्रीहेरुधसीङीष्' (4·1·25) इतिप्राप्तस्य ङीषोऽपवाद इत्यर्थः । उदाहरणम्—'द्व्यूध्नी'[1] 'अत्युध्नी'[2] ।

---

1. द्वे ऊधसी यस्या इत्यर्थे बहुव्रीहौ अनङादेशे ङीपि अलोपे द्व्यूध्नी, इति रूपं सिद्धति ।

2. अत्यूध्नी, अतिशयिकुमूधो यस्या इत्यर्थे । बहुव्रीहि अतीत्यव्यया। दित्वान् ङीष् ।

ङीप्प्रत्यय विधायकं प्रथमं वार्तिकम्[1] —

'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' (4/1/15) इति। नञ्, स्नञ्, ईकक् ख्युन् चत्वारः तेन प्रत्ययग्रहणपरिभाषया तदादि विशेष्यक तदन्तविधौ तदन्ततदादीनामित्यर्थः। तरुण तलुनयोश्च ङीब्विधायकं वचनं संख्यानं सूत्रं तस्य समीपे उपसंख्यानम् = ङीब्विधायकसूत्रसमीप कर्तव्यनित्यर्थः। एतेन उपसंख्यानम्, वक्तव्यमिति पर्य्याय इत्यपास्तम्। संख्यायते = बोध्यते नेनेऽति संख्यानम् = सूत्रम्। अत्र प्रातिपदिकविशेष्यक तदन्तविधिर्न, प्रातिपदिकादित्यस्य षष्ठ्यन्तेन विशेषणभावाभावात्।

'स्त्रैणी' 'पौस्नी'[2] 'शाक्तीकी'[3] 'आढ्यङ्करणी'[4] 'तरुणी' 'तुलुनी' इति चास्यौदाहरणानि।

---

1. 'स्त्रिपुंसाभ्यां नञ् स्नञौ भवनात्' (4·1·87) इत्यनेन 'धान्यानां भवने क्षेत्रे' (5·2·1) इत्यत्र निर्दिष्टाद्भवनरूपार्थात्प्राग्यावन्तोर्थाः सूत्रेषु निर्दिष्टा अपत्यादि रूपास्तेष्वबाधितेष्वर्थेषु स्त्रीपुंसाभ्यां क्रमेण स्त्री शब्दात् स्वञ् पुंसो पत्यं स्त्री कन्येति यावत् तदर्थे 'स्त्री ङस् नञ्' पुंस ङस् स्नञ् 'आद्यचः' तद्धितेष्वचामादेः' (72·2·117) इति वृद्धौ प्रातिपदिकत्वान्ङसो लुकि नस्य णत्वे 'स्त्रैण' इति। स्नञि परे पुंसः पदत्वात् 'संयोगान्तस्यलोपः' (8·2·23) इति सलोपे 'पोस्न' इति ताभ्या क्रमशो ङीपि अलोपे स्त्रैणी पौंस्नी इति रूपं सिद्धयति।

3. प्रहरणवाचकात्प्रथमान्तात्शक्तिशब्दात्शक्तिः प्रहरणमस्या इत्यर्थे 'शक्तियष्ट्योरीकक्' (4·4·59) इति ईकक् प्रत्यये वृद्धौ 'यस्येति च' (6·4·148) इतीकार लोपे आदिवृद्धौ शाक्तक शब्दात् ङीपि अकारलोतपे शाक्तीकी इति रूपं सिध्यति।

4. 'इभ्य आढ्यो धनीस्वामी' (अ0को0 3/10/10)। न आढ्यो नाढ्यः। अनाढ्यः आढ्यो = धनी क्रियते इत्यर्थे 'आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणेख्युन्' (3·2·56) इत्यनेनच्विप्रत्ययान्तभिन्नेषु आढ्यादिषु कर्मसूपपदेषु कृञः करणे-

(क्रमशः)

ङीप्प्रत्यय विधायकं द्वितीयं वार्तिकम्[1] —

'पिशङ्गादुपसंख्यानम्' (4·1·39) इति, 'अन्यतोङीष्' इति वक्ष्यमाणस्य ङीषोऽपवादः। ङीप् पित्वादनुदत्त इति स्वरे भेदः।

'पिशङ्गी'[1] इतिचास्यो-दाहरणम्।

(3) ङीप् प्रत्यय विवायकं तृतीय[2] वार्तिकम्—

'बहुव्रीहौ वा' (वा0सं0 4·1·7) इति। अत्र 'वनोरच' (4·1·7) इत्यनुवर्तते। तथा च 'वनो र च' इति विधिः 'बहुव्रीहौवा' स्यादिति वार्तिकार्थः।

---

ख्युन् इत्यर्थकेन कृञः ख्युनप्रत्यये स्वस्येत्वलोपयोः योः 'युवोरनाकौ' (7·1·1) इत्यनादेशे कृञो गुणे 'खित्यनव्ययस्य' (6·3·66) इति पूर्वपदस्य मुमागमे 'कर्तृकर्मणोः कृति' (2·3·65) इति कर्मणि षष्ठ्यां 'आढ्य अस् करण' इति दशायां 'उपपदमतिङ्' (2·2·19) इति तत्पुरुषसमासे प्रातिपदिकसंज्ञायां 'सुपोधातुप्रातिपदिकयोः' (2·7·71) इति असोलुकि 'आढ्यकरण' शब्दान्ङीपि अकरलोपे सो तस्य लोपे नस्य णत्वे 'आढ्यङ्करणी' इति रूपं निष्पद्यते।

5. तरुण—तलुनयोर्युववाचिनोः 'वयसिप्रथमे' (4·1·20) इत्येव ङीपि सिद्धे पुनरत्र वचनं गौरादिष्वपि पाठात्प्राप्तस्य ङीषो वाधनार्थम्। अन्यथा परत्वादपवादत्वाद्वा 'वयसिप्रथमे' (4·1·20) इति बाधित्वा ङीषेव-स्यात् तथा च वार्तिके गौरादौ च पाठात्पर्यायेण ङीप्-ङीषौ भवतः।

अन्ये तु तरुन—तलुन शब्दौ प्रत्यग्रवाचकावपि वयसः प्राणिधर्मत्वाप्रत्यग्रे 'तरुणी तलुनी मदिरा' इत्यर्थे ङीप् सिद्ध्यर्थं तयोर्ग्रहणम्। अन्यथा तदर्थेऽपि गौरादावधीतश्चादानेन टापं बाधित्वा परत्वान्ङीषेव स्यात् वार्तिकपाठे तु उभौ भवत इत्येव ज्यायान्।

1. 'अन्यतो ङीष्' (4·4·30) इति सूत्रस्थ-मिति शेषः।

1. पिशङ्ग शब्दान् ङीपि अकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम्।

'अनोबहुव्रीहेः' (4·1·12) इति निषेधस्यायम् अपवादः। बहुधीवरी इति चास्योदाहरणम्। बहवोधीवानोयस्याः इति विग्रहे बहुव्रीहिसमासे सुपोलुकि बहुधीवन् इति प्रातिपदिकात् स्त्रियां वा ङीप् नकारस्यरत्वे च कृते स्वादि कार्ये च कृते सति बहुधीवरी' इति रूपसिद्धति।

ङीत्वरत्वयोरभावपक्षे बहुधीवा इति राजवद्रूपम्।

नच बहूनि पर्वाणि यस्याः सा बहुपर्वेत्यत्रापि ङीब्रत्वविकल्पःस्यादिति वाच्यम्, 'अल्लोपोऽनः' (6·4·134) इति उपधा लोपयोग्यस्थल एव एतद्वार्तिकस्य प्रवृत्तेः भाष्ये उक्तत्वात्। बहुपर्वन् शब्दे च 'नसंयोगाद्वमन्तात्' (6·4·137) इत्यल्लोपनिषेधात्। ङीब् रत्वाभावपक्षे बहुधीवन् शब्दात् स्त्रियां 'डाबुभाभ्यामन्यतरस्याम्' (4·1·13) इति डाबपि भवति वा। सति डापि डापावितौ बहुधीवन् आ इति स्थिते 'टेः' (6·4·143) इति टिलोपे बहुधीवा शब्दात् सोह्ल्ङ्यादिलोपे बहुधीवा इति रपावद्रूपम्।

इत्थं ङिब्रत्वयोर्डापश्चा भावे सौ बहुधीवेत्येव रूपम्। ङीब् रत्वयोः बहुधावरी इति, औजसादिषु तु बहुधीवर्यो बहुधीवे बहुधीवानौ इत्यादि रूपत्रयमित्यवधेयम्।

ङीप्प्रत्यय विधायकं चतुर्थं वार्तिकम्—

'वयस्यचरम इति वाच्यम्' (वा0 सं0 41·1) इति—अन्तोजघन्यं चरममन्त्यपाश्चात्यपश्चिमाः। षडन्त्यवाचकाः (अम0 3/1/1) अन्त्याभिन्ने वयसीत्यर्थः। ये त्रीणि वयांसीच्छन्ति तन्मदेनेदंवार्तिकम्, यदातु उपचयापचलक्षणे द्वे एव वयसी इति दर्शनं तदा वार्तिकं व्यर्थम्, यौवनस्यापि प्रथमवयः पदेन ग्रहणात्। पाणिनेरिदमेव मतं प्रतीयते।

'वधूटी', 'चिरण्टी'[1] इत्यादीनि चास्योदाहरणानि।

---

1. तत्र 'वधूटी' वधूटशब्दस्य यौवनवाचित्वे भाष्यमेव मानम्।
'गोपवधूटीदुकूलचौरायं इति भाषापरिच्छेदः। वधूट—चिरण्ट—शब्दाभ्यां प्रथमवयोवाचकत्वे त्यचरम् वयोवाचकत्वानङीपि अकारलोपे स्वादिकार्ये च कृते।

ङीप् प्रत्यय विधायकं पञ्चम वार्तिकम्—

'वयोवाचकस्यैवहायनस्यङीव्णत्वं चेष्यते' (वा. 4·1·27) इति। 'दामहायनान्ताच्च' (4·1·27) इति सूत्रेण संख्यादेर्बहुव्रीहेर्दामान्ताच्च ङीप् प्रत्ययो विहितः। सच 'त्रिहायणी[2] चतुर्हायणी[3] बाला'[4] इत्यत्र यथा भवति, तथा 'त्रिहायेना'[1] [2]'चतुर्हायनाशाला'[3] इत्यत्रापि प्राप्नोति इति तद्भावाय वार्तिकमिदमारब्धम्। 'वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते' इति वार्तिकार्थः स्फुटः। तस्याशयस्तु हायनान्ताद् बहुव्रीहेर्यःङीप् प्रत्ययो विहितः यच्च 'त्रिचतुर्भ्यांहायनस्यणत्वं[4] वाच्यम्' (वा. 4·1·27) इति णत्वे च विहितं तदुभयं वयोवाचकस्यैव हायनस्य भवतीति। तेन 'वयसोऽन्यत्रशालायां प्रयुज्मानेषु' त्रिहायना चतुर्हायना शाला' इत्यादौ ङीपः णत्वस्य च अभावः सिध्यति। नह्येते त्रिहायनादि शब्दाः शालायां प्रयुक्ता वयो वाचिनः। अतः टाप् एवात्र भवति ङीप्णत्वं च न भवति, इति।

ङीप् प्रतिषेधकं प्रथमं सूत्रम्—

'अनोबहुव्रीहेः' (4·1·12) इति। अत्र—नेति ङीबितिचानुवर्तते, 'अ' न्निति बहुव्रीहेर्विशेषणमिति तदन्तविधिः। तथा च—'अन्नन्ताद् बहुव्रीहेर्न ङीप' इतिसूत्रार्थः। बहुयज्वानो[6] इतिचास्योदाहरणम्। इदमत्रावधेयम् यदत्र 'बहुव्रीहे'

---

2. त्रयः हायनाः यस्याः सेत्यर्थः। हायन शब्दोऽत्र वर्ष वाची। तदुक्तम्—
"संवत्सरोऽवत्सरोऽब्दो हायनो स्त्रीऽशरत्समाः"—(अ.को. 1/4/20)
3. चत्वारः हायनाः यस्याः सेत्यर्थः।
4. 'अष्टवर्षाभवेदगौरी नववर्षात् रोहिणी।
दशवर्षाभवेत्कन्या तत्तद् दूर्ध्वं रजस्वला इत्युक्ते
बालाशब्दोऽत्र प्रथम वयोवाची।

1. त्रयः हायनाः यस्याः सेत्यर्थः।
2. चत्वारः हायना यस्याः सेत्यर्थः।
3. गृहमित्यर्थः।
4. निमित्त निमित्तिनोः समान रदस्थत्वाभावात्
'अट्कुप्वाङ्नुमुव्यवायेऽपि' (8/4/2) इति णत्वाप्राप्तौ त्रिचतुर्भ्यामिति वार्तिकमिदमारब्दम्।
5. 'बहवोयज्वानोयवोस्ते, इति तदर्थः, नान्तलक्षण ङीपोनेन निषेधे राजवद्रुपम्।

रित्यस्य प्रातिपदिकादित्यस्य विशेषणतया ततस्तदन्तविधौ' अन्नन्तबहुव्रीह्यन्तात्प्रातिपदिकान्नङीबित्यर्थो लभ्यते तः 'अतिदहुयज्वा'[1] इत्यत्र ङीप् नभवतीति । 'अनउपधा.'(4·1 18) इत्यपि 'अतिबहुयज्वे' त्यत्र न प्रवर्तते । यतः नेसंयोगाद्वमन्तात् (6·4 137) इत्यनेनात्र उपधालोपेनिषेधो भवतीति नायमुपधा'लोपी ।

ङीप् प्रतिषेधकं द्वितीयं सुत्रम्—

अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि' (4·1·21) इति । अत्र—द्विगोरिति ङीबिति चानुवर्तते प्रातिपदिकादिति स्त्रियामिति चाधिकृतम् । अपरिमाणादिना द्विगुर्विशेष्यते । तथा च—'अपरिमाणान्त द्विस्ताद्यन्ताच्च द्विगो ङीब् न स्यात् तद्धितलुकि सति इति सूत्रार्थः ।

'पञ्चाश्वा'[2] 'द्विबिस्ता'[3] 'द्वयाचिता'[4] 'द्विकम्बल्या'[5] इति क्रमशः चास्योदाहरणानि ।

---

1. 'बहुयज्वानमतिक्रान्तो' इति तदर्थः ।

2. पञ्चभिरश्वैः क्रीतेऽति तद्धितार्थे विवक्षिते 'तद्धितार्थोतरसपदसमाहारे च' (2·1·51) इति द्विगुः । 'सुपोधातुप्रातिपदिकयोः' (2·4·71) इति सुपलुकि पुनः सुपि 'तेन कृतम्' (5·1·37) इति ठकि तस्य 'अध्यार्थपूर्वाद्द्विगोर्लुगसंज्ञायाम्' (5·1·28) इति लुकि 'द्विगोः' (1·4·12) इति प्राप्तस्य ङीपो नेन निषेधात् टापि 'पञ्चाश्वा' इति रूपं सिद्धयति ।

3. द्वौ विस्तौ पचतीत्यत्र । पचि द्रविणे, द्वौ विस्तौ हेम्नो क्षौ पचति द्रावयति वा इत्यर्थे 'सम्भवत्यवहरतिपचति' (5·1·52) इति ठकि तस्य 'अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम्' (5·1·28) इति लुकि 'द्विगोः' (4·1·12) इति प्राप्तस्य ङीपोऽनेन निषेधे टापि 'द्विविस्ता' इति रूपं सिद्धति ।

4. तुलां स्त्रियांपलशतंभारःस्यादिंवंतिस्तुला । आचितो दशभाराः स्युश् शाकटो भार आचितः ।'' पलानां शतं तुलास्यात्, विंशतिस्तुलाः भारः, 'भारः स्याद्वोवधे विष्णोपलाना'द्विसहस्त्रके' इति कोशांतरम् । पुरुषेण हि द्वे पलशते वोढुं शक्येते । दश भारा आचितः स्युः ।यः शकटेन वोढु शक्यते भारः सोऽपि भार आचित

(क्रमशः...........)

ङीप्प्रतिषेधकं तृतीयं सूत्रम्—

'काण्डान्तात् क्षेत्रे' (4·1·13) इति । तत्र द्विगोरिति, न तद्धितलुकि इति, ङीबिति चानुवर्तते । तथाच—"क्षेत्रेयः काण्डान्तोः द्विगुस्ततो न ङीप् तद्धितलुकि" इति सूत्रार्थः ।

'द्विकाण्डा क्षेत्रभक्तिः' इति चास्योदाहरणम् 'काण्डो स्त्री' (अम. 3/3/43) प्रमाणेद्वयसजितिप्रमाणवाचकं यत् प्रथमान्तं ततः अस्य इति षष्ठ्यर्थे मेये द्वयसज्दघ्नञ् मात्रचः प्रत्यया इत्यर्थकेन 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (5·2·37) इत्यनेन प्रथमश्च (द्वयसच्) द्वितीयश्च (दघ्नच्) उर्ध्वमाने मतौमम' इति भाष्ये काण्डस्य उर्ध्वमान वाचकत्वाभावेन प्रथमद्वितीययोरभावे मात्रच प्रत्यय एव तस्यप्रमाणे विद्यमानात्प्रातिपदिकात्परस्य मात्रच प्रत्ययस्य (मात्रचः) लः लुगित्यर्थकेन 'प्रमाणेलः' (वा. सं. 5·2·37) इति वार्तिकेन लुकि द्विगोरिति प्राप्तस्य ङीपो निषेधे 'द्विकाण्डा' इति रूपं सिध्यति ।

ङीप् निषेधकं चतुर्थं सूत्रम्—

'नषट्स्वस्रादिभ्यः' (4.1.10) इति । अत्र 'ऋन्नेभ्योङीप्' (4·1·4) इत्यतो 'ङीप्' इति 'टावृचि' (4.1.9) इत्यतः टाबिति चानुवर्तते, स्त्रियामित्यधिकृतं, षट् इत्यनेन षटसंज्ञकाः[1] गृह्यन्ते, तथा च "षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च[2] ङीप टापौ

---

इत्युच्यते । अत्र भ्रियते सौ भरः स एव भारः स्वार्थेण्, नतु संकेतितो भारः, 'आचितः शकटोन्मेये पलानामयुतद्वयम्' इति विश्वकोशात्, 'अचितःशाकटोभारः' इत्यमराच्च । द्वावाचितौ वहति यासा द्वयाचिता इत्यर्थे "आढकाचितपात्रात्सो न्यतरस्याम्" (5·1·53) 'द्विगोः ष्ठश्च' (5·1·54) इति वैकल्पिकठनोर भावे 'आर्हादगोपुच्छ परिमाणात्ठक्' (5·1·19) इति 'अगोपुच्छ परिमाण' इति परिमाण शब्देन काष्ठादिनिर्मित कुडवादेरेव पर्युदासात् आचितस्योन्मानत्वेन आ अर्हात् गधिक्रियते इति ठकि तस्य अध्यर्धपूर्व—द्विगोर्लुगसंज्ञायां (5·1·28) इति लुकि अनेन 'द्विगोः' (4·1·12) इति ङीपो निषेधे टापि 'द्वयाचिता' इति रूपं सिद्धयति ।

1. 'ष्णान्ताषट्' (1·1·24)
2. "स्वसातिस्रः चतस्रः न नान्दादुहिता तथा जातामातेति सप्तैते स्वस्रादय उदाहृता ।" (भ. दी. वै. सि. कौ.) अजन्त स्त्रीलिङ्ग प्र. पृ. 369

न स्तः'' इति सूत्रार्थः । 'पञ्च'[3] 'स्वसा'[4] इत्यादीनि चास्योदाहरणानि सन्ति ।

अत्र भट्टोजिदीक्षितोक्तं सूत्रस्यास्योदाहरणं चतस्रः इति चिन्त्यं यतः तिसृ-चतसृ-शब्दयोः स्वस्रादिगणे पाठोनास्ति । तदाह—'ङ्णमेजन्तः' (1·1·39) इति सूत्रे कैयटः 'तिस्र चतसृ' इत्यनयोः पाठो न कर्त्तव्यः, 'न तिसृचतसृ' (6·4·4) इत्यनेन 'नामि' (6·4·3) इति दीर्घनिषेधादेव लिङ्गात् ङिबभावसिद्धेरिति । अतएव 'ङ्णमेजन्तः' (1·1·39) इति सूत्रे भाष्ये सन्निपातपरिभाषायाः फलनिरूपणावसरे तिस्रतिष्ठन्ति । तिसृचतसृभावे कृते 'ऋन्नेभ्यः' (4·1·4) इति ङीप् प्राप्नोति । 'सन्निपातलक्षणोविधिरनिमित्तंतद्विघातस्येपि न दोषो भवति' इत्युक्तं संगच्छते । अन्यथास्वस्रादिगणे तयोः पाठे निषेधेनैव ङीपोभावे सिद्धेः सन्निपातपरिभाषायाः फलप्रदर्शनं विरुध्येत । किं च तिसृचतसृशब्दयोः स्वस्रादित्वमतेऽपि प्रथमोपस्थितत्वात् (तिस्रः) इत्येवोदाहर्तुमुचितम् । अत्र षट्संज्ञकानां न षट्स्वस्रादिभ्यः (4·1·10) इत्यनेन ङीबेवनिषिध्यताम्, यतः नान्तत्वेन टाप् प्रसक्तिरेवनास्तीति न वक्तव्यम् । यतः 'पच' इत्यादौ नान्तलक्षणस्य ङीपोनिषेधे ततो जातयोर्जश्शसोः षड्भ्योलुक्' (7·1·12) इति लुकि प्रत्यय लक्षणेन पदत्वान्नलोपे अदन्तत्वात् टाप् प्राप्नोतीति तन्निषेधाय 'नषट्' इत्यत्र टापो नुवृत्तिरावश्यकी ।

ननु नलोपे कृतेऽपि 'अजाद्यतष्टाप्' (4·1·4) इति दृष्ट्या नलोपस्य त्रिपादीत्वेनासिद्धतया टापो प्राप्तिरिति चेन्न 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'

---

3. पञ्चस्त्रिय इत्यर्थे जस्शसोरुत्पत्तेः प्रागेव संख्याकारकाभ्यामन्तरङ्गत्वात् लिङ्गस्योपस्थितत्वेन स्त्रीत्वविवक्षायामन्तरङ्गत्वात् 'ऋन्नेभ्योङीप्' (4·1·5) इति प्राप्तस्य ङीपोनिषेधे प्रातिपदिकत्वाज्जतयोर्जश्शसोः षट्त्वात् लुकि नलोपे पञ्च इतिरूपं सिध्यति ।

4. स्त्रियाँ स्वसृशब्दात् 'ऋन्नेभ्योङीप्' (4·1·5) प्राप्तस्यङीपो 'नषट्स्वस्रादिभ्यः' (4·1·10) इति निषेधे ।

स्वसृ—1 सु (स्) 'ऋदुशनस्' (7·1·94) इत्यनेन ऋ इत्यस्य अनङ्गादेशे स्वसन् स् इत्यावस्थायां 'अप्तृन् तृच्स्वसृनप्तृनेष्टृक्षत्तृहोतृप्रशातृणाम्' (6·1·11) इति सूत्रेण दीर्घे हल्ङ्याबभ्योदीर्घात्सुतिस्यप्रिक्तं हल् (6·1·67) इत्यनेन नलोपे टापि रूपमिदं सिद्धति ।

(8·2·2) इति सूत्रस्य नियमार्थत्वे टापि कर्तव्ये न लोपस्यासिद्धत्वाभावात् । अतएव 'राजाश्व' इत्यादौ दीर्घः सिध्यति ।

ङीप् निषेधकं पञ्चमं सूत्रम्—

'मनः' (4·1·11) इति । अत्र पूर्वसूत्रात् ङीबिति नेति चानुवर्तते । तथा च मन्नन्तान्न ङीप् इति सूत्रार्थः । प्रत्ययत्वात् मनः प्रत्ययग्रहणपरिभाषया तदन्तविधिः प्रातिपदिकविशेषणतया तदन्तान्तमपि लभ्यते, तेन सीमानमतिक्रान्त 'अतिसीमा' इत्यत्रापि निषेधः । 'सीमा' इति चास्योदाहरणम् । ङीपो निषेधे स्वादिकार्ये च कृते रूपमिदम् ।

ननु ङीपो निषेधे 'सीमा' इति रूपमिष्यते । तच्च डाप् प्रत्ययेनापि सिध्यति किं निषेधेनेति चेन्न । ङीपो निषेधेहि द्विवचनादौ सीमानौ सीमान इत्यादि भवति । डापि तु तन्न सिध्येदिति भावः ।

'मनः' (4·1·11) इति 'अनो बहुव्रीहेः' (4·1·12) इति च 'स्त्रियां यत्प्राप्नोति' इति भाष्योक्तरीत्या टाप्ङीपोउभयोरपि निषेधः । एतेन 'सीमभ्याम्' 'बहुयज्वाभ्याम्' बहुधीवभ्याम् इत्यत्र डाप्ङीपोरभावे नलोपे टाब् दुर्वार इत्यपास्तम् ।

ङीप्प्रत्ययनिषेधकं प्रथमं वार्तिकम्—

'असितपलितयोर्न' (वा. 4'1·39) इति । 'वर्णादनुदात्तोपधात्तोनः' (4·1·39) इति प्राप्तेङीम्नत्वे [असितपलित शब्दाभ्यां नेऽति वार्तिकार्थः । असिता, पलिताबत्युदाहरणेचास्या ङीप्नत्वयोनिषेधे अदन्तत्वाद्दापि इमेरूपेहि सिद्धयतः । अत्र 'अवदातः सितौगौरः' इत्युक्तेः सितः = स्वेतस्तद्विरुद्धः कृष्णोऽसितशब्देनोच्यते । 'पलितोजरयाशौक्त्यम्' इत्युक्तेः पलितशब्दो जराकृतं यत्केशादीनां शौक्त्यं तद्वाची । तद्विशिष्टा वृद्धापि पलिताशब्दे नोच्यते इत्यवधेयम् ।

ङीप्प्रत्यय निषेधकं द्वितीयं वार्तिकम्[1]—

'वनोनहशइति वक्तव्यम्' इति । "हशन्ताद् धातोर्विहितो योवन्

---

1. 'वनोरच' (4·1·7) इति सूत्रस्थमितिशेषः ।

तदन्तात्तदन्तान्ताच्च प्रातिपदिकान् ङीप् रश्चने'ति वार्तिकार्थः। 'अवावाब्राह्मणी[2] राजयुध्वा'[3] इति चास्योदाहरणेस्तः।

---

2. ओण् धातोः वनिपि 'विड्वनोरनुनासिकस्यात्' (6 1-41) इति णाकारस्यात्वे 'अवावन्' शब्दः निष्पद्यते। ततः 'वनोरचे'ति प्राप्तयोः ङीब्रत्वयोनिषेधे राजवत् स्वादिकार्येषु कृतेषु रूपसिद्धम्। ब्राह्मणीति विशेष्यन्त्वत्र अवान् शब्दस्य स्त्रीत्वस्फोरणायोपात्तम्।

3. राजानं योधितवतीत्यर्थे भूतेकर्मणि क्वनिप् इत्यमनुवर्तमाने 'राजनि युधिकृञः' (3·2·95) इति क्वनिपि उपपदसमासे सुपोलुकि 'राजयुध्वन्' शब्दः निष्पद्यते। ततः स्त्रियां 'वनोरच' (4·1·7) इति प्राप्तयोः ङीब् रत्वयोः निषेधे अवावा इति वत् स्वादिकार्ये कृते रूपमिदम्। अत्रहि हशोविहितो वन् तदन्तौ युध्वन् शब्दः तदन्ता-राजयुध्वन् शब्दः इति ङीब्रादेशौ न भवतः, वन्नन्तास्येदमुदाहरणम्।

———

चतुर्थोऽध्यायः

# ईकाररूपस्त्रीप्रत्ययेषु ङीष्-प्रत्ययः

अथ यथा क्षरक्रम प्राप्तं ङीष् प्रत्ययो निरूप्यते। तत्र ङीष् प्रत्यय विधायकानि द्वविंशतिः सूत्राणि, सप्तदश वार्तिकानि ङीष्प्रत्ययनिषेधकानि त्रीणि सूत्राणि, त्रीणि वार्तिकानि च सन्ति।

**ङीष् प्रत्यय विधायकानि सूत्राणि—**

यथा—

(1) 'अन्यतोङीष्' (4·1·40)

(2) 'अस्वाङ्गपूर्वपदाद्वा' (4·1·53)

(3) 'इतोमनुष्यजातेः' (4·1·65)

(4) 'इन्द्र-वरुण भवशर्वरुद्रमृडहिमारण्ययव-यवनमातुलाचार्याणामानुक्' (4 1·49)

(5) 'क्तादल्पाख्यायाम्' (4·1·51)

(6) 'क्रीतात् करणपूर्वात्' (4·1·50)

(7) 'जातेरस्त्रीविषयादयोपधात्' (4·1·63)

(8) 'जानपदकुण्डगोणस्थलभाजनाग-कालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' (4·1·42)

(9) 'दीर्घ-जिह्वी च छन्दसि' (4·1·59)

(10) 'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' (4·1·55)

(11) 'नित्यं छन्दसि' (4·1·46)

(12) 'पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च' (4·1·64)

(13) 'पुंयोगादाख्यायाम्' (4·1·48)

(14) 'बह्वादिभ्यश्च' (4·1·45)

(15) 'बहुव्रीहेरुधसोङीष्' (4·1·25)

(16) 'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52)

(17) 'भुवश्च' 4·1·47)

(18) 'वाहः' (4·1·61)

(19) 'वोतोगुणवचनात्' (4·1·44)

(20) 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (4·1·54)

(21) 'शोणात् प्राचाम्' (4·1·43)

(22) 'षिद्गौरादिभ्यश्च' (4·1·41)

**ङीष्प्रत्यय विधायकानि वार्तिकानि**

यथा—

(1) 'अर्यक्षत्रियाभ्यां वा स्वार्थे' (वा. 4·1·49)

(2) 'आचार्यादणत्वंच' (वा. 4·1·49)

(3) 'उपमानात्पक्षाच्चपुच्छाच्च' (वा. 4·1·55)

(4) 'कबरमणिविषशरेभ्योनित्यम्' (वा. 4.1·55)

(5) 'जातिपूर्वादितिवक्तव्यम्' (वा. 4·1·52)

(6) 'नीलादोषधौ' (वा. 4·1.42)

(7) 'पाणिगृहीती भार्यायाम्' (वा. 4·1·52)

(8) 'पुच्छाच्च' (वा. 4·1·55)

(9) 'प्राणिनि च' (वा. 4·1·42)

(10) 'मातुलोपाध्याययोरानुग्वा' (वा. 4·1·49)

(11) 'मुद्गलाच्छन्दसि' (वा. 4·1·49)

(12) 'यवनाल्लिप्याम्' (वा. 4·1·49)

(13) 'यवाद्दोषे' (वा. 4·1·49)

(14) 'यातु स्वयमेवाध्यापिकातत्रवाङीष्वाच्यः' (वा. 4·1·49)

(15) 'योपधप्रतिषेधेहयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः' (वा. 4·1·62)

(16) 'संज्ञायां वा' (4·1·42)

(17) 'हिमारण्ययोर्महत्वे' (वा. 4·1·49)

**ङीष्प्रत्ययनिषेधकानि सूत्राणि**

यथा—

(1) 'नक्रोडादिबह्वचः' (4·1·56)

(2) 'नखमुखात् संज्ञायाम्' (4·1·58)

(3) 'सहनञ्विद्यमानपूर्वाच्च' (4·1 57)

**ङीष्प्रत्यय निषेधकानि वार्तिकानि**

(1) 'खरुसंयोगोपधान्न' (वा. 4·1 44)

(2) 'जातान्तान्न' (वा 4·1·52)

(3) 'पालकान्तान्न' (वा. 4·1·48)

(1) ङीष्प्रत्ययविधायकं प्रथम सूत्रम्—

'अन्यतोङीष्' (4·1·4) इति। अत्रवर्णादिति, अनुदात्तादिति, तोपधादिति[1] प्रातिपदिकादिति चानुवर्तते। अनुदात्तादित्यस्य प्रातिपदिकादिति[2] विशेष्यते। विशेषणात् तदन्तविधिः, अन्यत इत्यस्य भिन्नादित्यर्थ। भेदस्य प्रतियोग्याकाङ्क्षायां अनन्तरत्वात्तोपधादिति लभ्यते। तथा च— तोपधभिन्नाद्वर्णवाचिनोनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष्स्यादिति सूत्रार्थः।

नच 'शब्दक्रमादर्थक्रमोबलीयान्' इति न्यायेन वर्णवाचित एव विशेष्यस्य प्रतियोगितयाऽन्वयः स्यादिति वक्तव्यम्। यतः प्रयुक्तानामन्वाख्यानं व्याकरणम्' इति भाष्योक्त्या 'कल्माषी'[3] 'सारङ्गी'[4] इत्यादि प्रयोगानुसारेणतोपधस्यैव प्रति-

---

1· 'वर्णादनुदात्तात्तोपधातो नः' (4·1·39) इत्यतः इति शेषः।

2. ङ्याप्प्रातिपदिकात्' (4·1·1) इत्यत इति शेषः।

3. 'चित्तं किर्मीरकल्माषशबलैताश्च कर्बुरे' इति (अम. 1/5/17) इति कोशात् कल्माषश्चित्त वर्णः, तद्वत्यां स्त्रियां कल्माशब्दान् ङीपि स्वादिकार्येच कृते रूपमिदं सिध्यति।
यतः 'लाघवन्ते द्वयोश्चबह्वषो गुरुः' (फि. 42) इति मध्योदात्तोऽयं कल्पाषशब्दः।

4. 'चातके हरिणेपुंसिसारङ्गः शबले 'त्रिषु' (अम. 3/3/23) इत्युक्तेः सारङ्गश्चित्तवर्णः तद्वति स्त्री स्वादि तद्वत्यां स्त्रियां शारङ्गशब्दान् ङीपि स्वादि कार्येषु कृतेषु रूपमिदं। यतः 'लाघवन्ते द्वयोश्च बह्वषोगुरुः' (फि. 42) इति मध्योदात्तोयं सारङ्गशब्दः।

योगितया सम्बन्धकल्पनमुचितम् । 'कल्माषी' 'सारङ्गी' इति चास्योदाहरणेस्तः । इह [6]'कृष्णाकपिला'[7] इत्यादौ ङीषोवारणाय अनुदात्तादित्युक्तिः ।

ङीष्प्रत्ययविधाकं द्वितीयं सूत्रम्—

'अस्वाङ्गपूर्वपदाद्वा' (4·1·53) इति । अत्र 'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52) इति सूत्रमनुवर्तते, तथा च "अस्वाङ्गयत् पूर्वपदं तस्मात् परं यत् क्तांतं तदन्तात् बहुव्रीहेः ङीष् वा स्या"दिति सूत्रार्थः । यद्यपि अस्वाङ्गम् पूर्वपदं यस्य तस्मात् तान्त बहुव्रीहेरित्यप्यत्र व्याख्यातुं शक्यते, तथापि उत्तर सूत्रे नुवृत्ते अस्वाङ्गपूर्वपदादित्यत्र कर्मधारयसमासस्वीकारादिहापि तथा व्याख्यानमुचितमिहेति मन्ये । अयमाशयः—

'नस्वाङ्गमस्वाङ्गम्, पूर्वञ्चपदञ्च पूर्वपदम् । अस्वाङ्गं च तत्पूर्वपद मित्यस्वाङ्ग पूर्वपदम् = स्वाङ्ग भिन्नं पूर्वपदमिति यावत् । उत्तरसूत्रे 'स्वाङ्गाच्चोपसर्जनात्' (4·1·54) इत्यत्र 'कल्याणपाणिपादा' इत्यत्र ङीष्वारणाय 'अस्वाङ्गपूर्वपदात्' इत्यनुवर्त्य तथा व्याख्यानात् अर्थाधिकारानुरोधेनात्रापि तथावौचित्यात् । यदि अस्वाङ्गं पूर्वपदं यस्य बहुव्रीहीरित्यर्थः स्यात्तदा कल्याण पाणिपाद रूप बहुव्रीहेः पूर्वपदस्य कल्याणस्य स्वाङ्गभिन्नत्वेन 'स्वाङ्गाच्चोपसर्जनात्' (4·1·54) इत्यनेन ङीषापत्तिर्दुर्वारास्यात् । अस्वाङ्गं च यत्पूर्वपदमिति कर्मधारये तु अस्वाङ्गात् पूर्वपदात्परं यदसंयोगोपधमुसपर्जनं स्वाङ्गवाचकं तदन्तात्प्रातिपदिकात् ङीष् इत्यर्थेन प्रकृते अस्वाङ्गं यत् पूर्वपद भूतं कल्याणपदं तस्मात्परं पाणिपदं तच्च नोपसर्जनम् तदन्तं च न प्रातिपदिकम्—इति न ङीष् ।

नच अस्वाङ्गं पूर्वपदं कल्याणपदं ततः परं स्वाङ्गवाचकं पाणिपादपदं तदन्तान्ङीष् स्यादिति वाच्यम्, स्वाङ्ग समुदाय वाचकस्य पाणिपादस्य स्वाङ्ग-

---

6. 'कृष्णे नीलासितश्यामकालश्यामलमेचकाः' (अम॰ 1/5/14) इत्युक्तः कृष्णशब्दो नीलवर्णः तद्वतिविशिष्यमानाकृष्णशब्दात् स्त्रियां टापि सवर्णदीर्घे स्वादिकार्ये च कृते रूपमिदं । द्रौपदी, पिप्पली वा वदर्थः । कृष्णशब्द; प्रत्ययस्वरेणान्तोदान्तः इति अनुदात्तान्तन्त्व नास्ति ।

7. कपिलः = पिङ्गलवर्णः तद्वतिः विद्यमानात् कपिलशब्दात् स्त्रियां टापि सवर्ण दीर्घे स्वादिकार्येषु च कृतेषु रूपमिदं सिध्यति ।

कपिलशब्दोऽयमव्युत्पन्नः फिट् सूत्रेणान्तोदात्तः, इति अनुदात्तान्तत्व नास्ति ।

वाचकत्वाभावात्। अत्र अस्वाङ्गपूर्वपदादित्यनुवर्त्य 'कल्याणपाणिपादा' इत्यत्र ङीष् वारणपरभाष्यमेवमानम्। पाणी च पादौ चानयोः समाहारः पाणिपादम्, कल्याणं पाणिपादं यस्याः सा कल्याणपाणिपादा। अत्र पाणिपादं प्रथमा निर्दिष्टत्वंपुपसर्जनम्। उपसर्जनीभूतस्वाङ्ग समुदायवाची न स्वाङ्गवाची। यच्च प्रत्येकं पाणीति, पादेति च स्वाङ्गवाची न तदुपसर्जन मिति ङीष् न भवति। असति तूपसर्जग्रहणे स्वाङ्गवाचिना पाद शब्देन स्वाङ्गान्तो बहुव्रीहिर्भवतीति ङीष् आपद्येत। एवञ्च करे मुखं यस्याः सा करमुखीति करस्थापितमुखे व्यर्थे उत्तरसूत्रेण ङीष् विधानं चिन्त्यम्, अस्वाङ्ग पूर्वपदात्परस्य स्वाङ्गवाचकाभावादिति।

अत्रापि जातिपूर्वादिति सम्बध्यते अन्यथा बहुनादीनामस्वाङ्गत्वेन तत्पूर्वके 'बहुक्रीता' इत्यादि वैकल्पिक ङीषो दुर्वारत्वं स्यात्। तथा च जातिपूर्वादित्यस्य क्तादित्यस्यान्तोदात्तादित्यस्य चात्रापि सम्बन्धः इत्यवधेयम् तेन बहुकृता इत्यादौ नातिप्रसङ्गः, बहुशब्दस्य जातिवाचकत्वा भावात्। ननु पुत्रहतीत्यत्र 'अस्वाङ्गपूर्वपदाद्वा' (4·1·53) इति वा ङीष् इति कैयट विरोधः पुत्रस्य जातिवाचकत्वाभावात्। अन्यथा 'पुत्रादिनि' इति णिनिर्न स्यादजाताविति निषेधात्।

यत्तु नात्रणिनिः किन्तु अदनमादः भावेघञ्, सो स्त्यस्या इति अादिकी पुत्राणामादिनी पुत्रादिनीति पुत्रस्य जातित्वेऽपि न क्षतिरिति तन्न, 'जातिकालसुखादिभ्यो नाच्चाद्भात्क्तो कृतमितप्रतिपन्ना' (6·2·170) इति सूत्रे जातेः किम्? पुत्रजातः 'इति सिद्धान्तकौमुदीग्रन्थविरोधापत्तेः। यदि चात्र 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इति सूत्रस्थ भाष्योक्तम्—

'प्रादुर्भावविनाशाभ्यां सत्वस्य युगपद्गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः॥'

इति जातिलक्षणं—

"सत्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या प्रादुर्भावविनाशौ प्राप्नोति यावद् द्रव्य भाविनीति यावत्। गुणैर्युगपद् द्रव्येण सम्बध्यते। बहूवर्थां सर्वव्यक्ति, व्यापिनीमित्यर्थः। तां जातिं कवयो विदु रिति कैयटव्याख्यातं गृह्येत तर्हि पुत्रत्वस्य यावदद्रव्य भावित्वेन जातिवाचक एव पुत्रशब्दः इत्युच्ये तदा 'पुत्रहती' इत्यत्र 'अस्वाङ्ग पूर्वपदाद्वा' (4·1·53) इति वा ङीष् इति कैयटग्रन्थोऽपि सङ्गतएव प्रतिभाति। 'जातिकाल' इति सूत्रे जातेः किम्? पुत्रजात 'इति प्रत्युदाहरणन्तु' आकृति ग्रहणाजातिः इतिलक्षणाभिप्रायेण। 'पुत्रत्वस्याकृति व्यङ्ग्यत्वाभावा'दिति तत्वबोधिनीकारः। 'सुरापीती' 'सुरापीता' इत्यादौ बहुव्रीहेश्चान्तोदात्तात् (4·1·52) इति पूर्वसूत्रेण नित्येङीपिप्राप्ते तद् विकल्पार्थं सूत्रमिदमारब्धम्।

'वस्त्रच्छन्ना'[1] इत्यत्र ङीषो भावाय 'बहुव्रीहेश्च.' (4·1·52) इत्यत्र श्रुतम् अन्तोदात्तादित्येतदिहानुवृत्तम् । 'सुरापीती'[2] सुरा पीता[1] इति चास्योदाहरणम् ।

ङीष् प्रत्यय विधायकं तृतीयं सूत्रम्—

'इतोमनुष्यजातेः' (4·1·65) इति । अत्र स्त्रियामित्यधिकाराल्लभ्यतेः[2] पूर्व सूत्रात् ङीष् इत्यनुवर्तते, इत इति मनुष्यजातेरित्यस्य विशेषणम्, ततस्तदन्तविधिः[3], तथा च इदन्तान् मनुष्यजातिवाचिनः स्त्रियां ङीष् स्यादिति सूत्रार्थः । 'दाक्षी'[4] इत्युदाहरणम् । स्त्रीप्रत्ययविधिषु अत इत्यनुवृत्तेरिदन्तात् 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इत्यस्या प्राप्त्या सूत्रमिदमारब्धम् । अत्र 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इत्यतो जातेरित्यनुवर्तमानेपुनर्जाति ग्रहणाद् विज्ञायते, यदिदं ङीष् विधानंयोपधादपि भवतीति तेन 'औदमेयो'[5] इत्यत्रापि ङीष् सिध्यति ।

---

1. म. भा. 4/1/63
2. उरुभिन्नीतिवत् पूर्वनिपातः 'जातिकालसुखादिभ्यः' (6·2·170) इति अन्तोदात्तत्वंतुनात्र शङ्क्यं यतस्तत्र अनाच्छादनादित्युक्तम् । तथा च बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरे शेषनिघातेन अनुदात्तान्त एव । अतः 'अस्वाङ्गपूर्वपदाद्वा' (4·1·53) इत्यनेन 'बहुव्रीहेश्च' (4·1·52) इति पूर्वसूत्रेण च वस्त्रच्छन्नेत्यत्र वैकल्पिको नित्यश्च ङीष् न भवति, यतः अन्तोदात्तत्वेएवोभयो प्रवृत्तिः ।
3. सुरापीत शब्दात् ङीष् 'यस्येति च' (6·4·148) इत्यकार लोपे स्वादिकार्येषु कृतेषु रूपमिदम् ।

1. 'अस्वाङ्गपूर्वपदाद्वा' (4·1·53) इत्यस्य वैकल्पिकत्वात् ङीषोऽभावपक्षे अदन्तत्वात् टापि सवर्ण दीर्घे स्वादिकार्येषुकृतेषु रूपमिदम् ।
2. अष्टा. (4·1·3)
3. 'येनविधिस्तदन्तस्य' (1·1·72)
4. दक्षः प्रजापतिविशेषः, यस्यषष्टिदुहितरः । दक्षस्य गोत्रापत्यमपत्यं वेत्यर्थे 'अतइञ्' (4·1·95) इति इञ् प्रत्यये लोपे आदिवृद्धौ 'दाक्षि' इति । ततो 'गोत्रं च' इति जातित्वाङीष् 'यस्येति च' (6·4·148) इतीकार लोपे स्वादिकार्यम् ।
5. उदकं मेयं यस्य स उदकमेषो नाम कश्चित् ।
'उदकस्योदः संज्ञायाम्' (6·3·57) इत्युदादेशः । उदमेयस्यापत्यमित्यर्थे उदमेय शब्दात् 'अतइञ्' (4·1·95) इति इञ् प्रत्यये वृद्ध्यादि कार्ये औदमेयः इति । ततः (गोत्रं च 'इति जातित्वान्ङीष् । पूर्वेणातु ङीषो प्राप्तिर्योपधत्वात् ।

अत्र जातेरित्युक्तादेवेवेष्टसिद्धौ मनुष्येत्युक्तिः तित्तिरिः[1] इत्यत्र ङीषो भावाय। अत्र 'इतः' इत्युक्तिः 'दरत्'[2] इत्यत्र ङीषो भावाय।

ङीष् प्रत्यय विधायकं चतुर्थं सूत्रम्—

'इन्द्रवरुणभवशर्वरुद्र मृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (4·1·49) इति। अत्र कित्करणादागम एव आनुक् नत्वादेशः, 'अन्यतो ङीष्' (4·1·40) इत्य 'ङीषि' ति 'स्त्रियां) (4·1·3) इतिचाधिकृतम्। तथा च—'एषामानुगामः ङीष् च स्यात् स्त्रियां' इति सूत्रार्थः। अत्रेदमवधेयम्—इन्द्रादिभ्यः षड्भ्यः मातुला चार्याभ्यांच 'पुंयोगादाख्यायां' (4·1·48) इत्यनेनैव ङीष् सिद्ध इति ङीष्मनूधतत् सनियोगेन आनुगागममात्र मनेन विधीयते, हिमारण्ययवयवनां तु आनुक् ङीष् चेत्युभयमनेन विधीयते तत्र पुंयोगासंभवा' दिति।

इन्द्राणी[1], वरुणानी[2], भवानी[3], शर्वाणी,[4] रुद्राणी[5]।

---

1. तरति = प्लवते सौ तित्तिरिः तृ धातोरिः प्रत्ययः सच कित् सन्वत्कार्य-मभ्यासस्य तुगागमश्च 'तित्तिरि वरतन्तु' (4·3·102) इति निपातनात् साधुः। तित्तिरिः ऋषि पक्षिभेदश्च। स्त्रियामप्ययं शब्दः प्रयुज्यते। यतः 'स्त्रीपुंसयोरपत्यन्ताद्विचतुः षट् पदोरगाः' इत्युक्तम्। (अ को. 2/5/38) अतोस्य स्त्रीत्वेपि इदन्तत्वेऽपि जातिवाचित्वेपि मनुष्यजाति वाचित्वा भावात् ङीष् न भवति।

2. 'दृ हिंसायाम्' (स्वा. प. से. 1306) दृणाति दीर्यते वासौ इत्यर्थे 'शृद्भसो दिः' (उणा. 1 पा. 135, सू.) इति अदिः, ऋकारस्य गुणैरपरेत्वेच 'दरत्' इति। अस्य स्त्रीत्वं कोषात्। तथाच मेदिनी कोषः 'दरत स्त्रीवत्सरे प्यूतौ दरत्' स्त्रियां प्रपाते च भयपर्वतयोरपि इति।

1. 'इदि परमैश्वर्ये इति इदित्वात् कृतनुमागमात् इन्द् धातोः इन्दति = परमैश्वर्यवान् भवति 'इत्यर्थे ऋजेन्द्राग्र' (उणा. 2/28) इति रन् प्रत्ययान्तोनिपातितः इन्द्रशब्दः, 'देवराज' इति तदर्थः। 'इन्द्रस्यपत्नी' त्यर्थे इन्द्रशब्दान् ङीषि अनुगागमे नयोरनुबन्धानां क्रमशो ङकार-षकार-ककाराणां लोपे उकारस्यचोच्चारणार्थत्वाददर्शने जाते सवर्ण-दीर्घेणत्वे स्वादिकार्येषु च कृतेषु-रूपमिदम्।

(क्रमशः...............)

मृडानी[1], हिमानी[2], अरण्यानी[3], यवानी[4], यवनानी[5], मातुलानी[6], मातुली[7]

---

2. 'वृणोति वियतेवा' इत्यर्थे 'कृदादिभ्यः' (उणा. 3/28) इति 'वृ' धातोः रुन् प्रत्यये वरुणशब्दोनिष्पद्यते, ततो 'वरुणस्य स्त्री'त्यर्थे ङीषि आनुगागमे सवर्णदीर्घेस्वादिकार्येषु कृतेषुरूपमिदम्।

3. 'भवतिसृष्टिः प्रलयोवा अस्मादित्यर्थे भूधातोः 'ऋदोरप् (3.3.57) इत्यप्प्रत्यये भवशब्दो निष्पद्यते, ततो 'भवस्यपत्नी'त्यर्थे ङीषि आनुकि सवर्ण दीर्घे स्वादिकार्येषुकृतेषुरूपमिदम्। 'चण्डिका' इति-तदर्थः। तदुक्तम्—'भवानीरुद्राणीमृडानीचण्डिकाम्बिका' इति (अम. 1/1/3)

4. 'शृणाति = हिनस्तिपापं दुःखंवे'त्यर्थे शृहिंसायाम्' (क्रया. प. से. 1552) इत्यतः 'कृभृशृदृभ्यो वः' (उणा. 1/55) इति व प्रत्यये गुणोपरत्वे च शर्वशब्दो निष्पद्यते। ततः 'शर्वस्य स्त्री'त्यर्थे ङीषि आनुकि सवर्णदीर्घेस्वादिकार्येषु च कृतेरूपमिदम्।

5. 'रोदयति पापान्' इत्यर्थे 'रुदिर् अश्रुविमोचने' (अ. प. से. 1092) इति रुद्धातोर्णन्तात् 'रोदेर्णिलुकृच' (उणा. 2/22) इति रुक्प्रत्यये णिलोपे णेर्लुकालुप्तत्वात् 'नलुमन्ताङ्गस्य' (1.1.62) इतिप्रत्यय-लक्षण प्रतिषेधाल्लघूपधगुणाभावे रुद्र शब्दोनिष्पन्नः, ततोरुद्रस्यस्त्रीयर्थे ङीषि आनुगागमे सवर्णदीर्घे स्वादिकार्येषुकृतेषु-रूपमिदम्।

1. मृड्नाति = पिनष्टिपापं, सुखयति प्राणिनः इति वेत्यर्थे 'मृडसुखेक्षोदेच' इति मृड्धातोः इगपधज्ञां (3.1.135) इतिकप्रत्यये मृडशब्दो निष्पद्यते, ततो मृड्स्य स्त्रीत्यर्थे ङीषि आनुकि सवर्णदीर्घे स्वादिकार्ये च कृते रूपमिदम्।

2. महद्धिमम्मित्यर्थे हिमशब्दात् स्त्रियां 'हिमारण्ययोर्म' (वा. 4.1.49) इत्युक्तः ङीषि आनुकि सवर्णदीर्घेस्वादिकार्येषुकृतेषु रूपमिदम्। वार्तिकप्रामाण्यात् स्त्रीत्वम्।

3. महदरण्यमित्यर्थे अरण्यशब्दात् स्त्रियां 'हिमारण्ययोर्महत्वे' (वा. 4.1.49) इत्युक्तः ङीषि आनुगामगे सवर्णदीर्घस्वादिकार्येषु-रूपमिदम्। वार्तिकप्रामाण्यात् स्त्रीत्वम्।

(क्रमशः............)

आचार्यानी[1], इतीमानि चास्य ङीष् उदाहरणानि सन्ति ।

नन्वत्रसूत्रे 'ब्रह्मन्' शब्दस्यानुपादानात् 'ब्राह्मण : स्त्री' त्यर्थे 'ब्राह्मणी' त्यत्रानुङ् ङीपौ कथमितिचेत् सत्यम् । यतो ब्रह्माणमानयति जीवयतीत्यर्थे कर्मण्यणि[2] ब्रह्मान शब्दा दणन्तान्[3] ङीपि 'ब्रह्माणी' त्यस्य साधुत्वं नत्वानुगमात् ङीष्-प्रत्ययाभ्यामित्युक्तं भट्टोजिदीक्षितेन[4] । आनुकिदीर्घोच्चारणं पररूपापत्तिवारणाय । अकारोच्चारणमल्लोपनिवृत्या चरितार्थम् । नुकित्वल्लापत्तिः ।

---

4. 'दुष्टोय व' इत्यर्थे यवशब्दात् स्त्रियां 'यवाद्दोषे' (वा. ) इत्युक्तेः ङीषि आनुकि सवर्णदीर्घे स्वादिकार्ये च कृते रूपमिदम् ।

5. 'लिपिरक्षरविन्यासः' तत्र लक्षणयावृत्तौ यवनशब्दात् स्त्रियां 'यवनाल्लिप्याम्' (वा. 4·1·49) इत्युक्ते ङीषि आनुकि सवर्णदीर्घे स्वादिकार्येषुकृतेषु रूपमिदम् ।

6. मातुलस्य स्त्रीत्यर्थे मातुलशब्दात् स्त्रियां ङीषि आनुकि सवर्णदीर्घे। स्वादिकार्येषु कृतेषु रूपमिदम् ।

7. मातुलोपाध्याययोरानुग्वा' (वा. 4.1.49) इत्युक्तेः आनुकी भावपक्षे ङीषि रूपमिदम् ।

1. आचार्यस्यस्त्रीत्यर्थे आचार्यशब्दात् ङीषि आनुकिसवर्णदीर्घे 'आचार्यादणत्वंच' (वा. 4·1·49) इत्युक्तेः णत्वाभावे स्वादिकार्येषु कृतेषु रूपमिदम् ।

2. 'कर्मण्यण्' (3·2·1) इत्यनेनेतिशेषः ।

3. 'टिड्ढ.' (4·1·15) इत्यनेनेतिशेषः ।

4. वै. को. स्त्रीप्रत्यय प्र. पृ. 657 ।

दीक्षित ग्रन्थे—आनयतीत्यस्य व्याख्यानं जीवयतीति ।
तथाच—'अनप्राणने' (दि. आ. से. 6) प्राणनंजीवनम् ।
अस्माद्धातोर्हेतुमण्णिचि, उपधावृद्धौ, तिपि, शपि, गुणायादेशोआनयतीति रूपम् । भर्तृजीवनस्य जाया सौमङ्गल्यायत्तत्वात् । ततश्च ब्रह्माण मानयतीति विग्रहे आनिण्यन्तात् 'कर्मण्यण्' इत्यणि', 'णेरनिटि' । इति णिलोपे आनशब्देन ब्रह्माणमित्यस्य उपपदसमासे सुब्लुकिनलोपे सवर्णदीर्घे ब्रह्मान शब्दात् 'टिड्ढ.' (4·1·15) इति ङीपि 'य स्येतिच' (6·4·148) इत्यकारलोपे 'पूर्वपदात् संज्ञायामगः' इति णत्वे 'ब्रह्माणी' इति रूपमिति दीक्षिताशयः ।

(5) ङीष् प्रत्यय विधायकं पञ्चमं सूत्रम्—

'क्तादल्पाख्यायाम्' (74·1·51) इति। अत्र करणपूर्वादित्यनुवर्तते, अत इति च। उभये क्तान्तान्तप्रातिपदिकस्य विशेषणम्। तथा च 'अदन्तं करणपूर्वकं यत् क्तान्तं[1] प्रातिपदिकं ततः स्त्रियांङीष् अल्पाख्यायांगम्यमानायाम्' इति सूत्रार्थः

इह 'अल्पाख्यायाम्' इति समुद'योपाधिः। ननु 'अल्पैरभ्रै लिप्ते'त्यर्थे पूर्वपदार्थस्यैबाल्पत्वं गम्यते न विलोपनस्येति चेन्न, अभ्रस्याल्पत्वे विलेपनस्यात्यल्पत्वस्यावश्यम्भावात् तथा चाल्पत्वं करणगतं क्रियागतं वेति सिद्धम्।

'अभ्रलिप्तोद्यौः' इति चास्योदाहरणम्। अल्पेनाभ्रेण = मेधेन लिप्ता इति, अभ्रेण ईषल्लिप्तावेतितदर्थः। चन्दन लिप्तेत्यत्र ङीषो भावाय 'अल्पाख्याया' मित्युक्तिः। अधिकेन चन्दनेन लिप्ता, चन्दनेनातीव लिप्ता वेतिहितदर्थः।

(6) ङीष्प्रत्यय विधायकं षष्ठं सूत्रम्—

'क्रीतात्करणपूर्वात्' (4·1·50) इति। अत्र 'प्रातिपदिकात्' इत्यधिकृतम्, तस्यानुवर्तमानम् 'अतः' इति करणपूर्वात् इति, क्रीतादिति च विशेषणम्। तत्र अत इति क्रीतात् इति च विशेषणतया तदन्तपरम्। तथा च 'क्रीतान्ताददन्तात्करणादेः स्त्रियां ङीष्स्यात्' इति सूत्रार्थः।

'वस्त्रक्रीती' इत्यादि चास्योदाहरणम्। तत्र 'वस्त्रेणक्रीता' इति टाबन्तेन 'वस्त्र टा क्रीता सु' इत्यलौकिक विग्रहे समासे क्रीतान्तस्य प्रातिपदिकस्य अदन्तत्वाभावान् ङीष् न स्यात् इति चेत न 'कर्तृकरणेकृताबहुलम्' (2·1·32) इत्यनेन 'गतिकारकोपपदानां[1] कृदभिः सहसमासवचनंप्राक् सुबुत्पत्तेः' इति परिभाषया वस्त्रटाकृत इति दशायां कृदन्तेनैव समासे सुपोलुकि 'वस्त्रक्रीत' इति समासरूपं प्रातिपदिकमदन्तमेवेतितत्र टापं बाधित्वा ङीषेवभवति। अत्र कथं 'धनक्रीता' इत्यस्य साधुत्वम्? इति चेदत्रोच्यते 'कर्तृकरणे कृताबहुलम्' (2·1·32) इत्यत्र बहुलग्रहणात् 'गतिकारक' इत्यस्यनित्यतया क्वचिदप्रवृत्या सुबन्तेन समासे सुपः प्रागेव टापि ततः सुपि समासे 'धनक्रीता' इत्यत्र अदन्तंयत् करणपूर्वकक्रीतान्तंप्रातिपदिकं तस्याभावेन ङीषो प्राप्त्या टापि धनक्रीता इत्यस्य साधुत्व-सिद्धिः वस्तुतस्तु 'धनक्रीत' इत्यस्याजादिषु आकृतिग्रहणेन पाठस्वीकारात् ततष्टापिधनक्रीता इत्यस्य साधुत्व-सिद्धेः सुलभतया 'गति'ति परिभाषाया अनित्यत्वे न मानम्। नच बहुलग्रहणं मानम्,

1. परि0 शो0 परि0 77

भाष्ये 'कर्तृकरणे कृता बहुलम्' (2·1·32) इत्यत्र बहुलग्रहणस्य फलत्वेन तदनित्यत्वानुक्तेः ।

ननु 'गतिकारक' इत्यस्य अनित्यत्वाभावे 'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जि-परमे बर्हिर्दिव्यग्निभ्यः स्थः' (8·3·97) इति सूत्रे गोभूम्यादि-ग्रहणं व्यर्थम् 'गोष्ठः भूमिष्ठः' इत्यादौ स्थ इत्यस्य पदत्वाभावेन सात्पदाद्योः (8·3·111) इति निषेधाप्रवृत्या 'आदेशप्रत्यययोः' (8·3·59) इत्यनेनैव षत्वसिद्धेरिति चेन्न, 'आदेशप्रत्यययोः' (8·3·59) इत्यनेन पदादेः षत्वं चेत्तदा गवादिभ्यः परस्य स्थादेरेवेति नियमार्थत्वेन चारितार्थ्यात् । तेन हृदिस्थ इत्यादौ न षत्वम् । अतएव 'हृदिस्था शोभते माला' इति पद्येषत्वाभावः संगच्छते । नियमार्थत्वोक्त्या परिभाषाया अनित्यत्वे गवादिग्रहणमेव मानमित्यपि परास्तम् । नियमार्थत्वेन तच्चारितार्थ्यात् । किञ्च 'पदादादिः पदादिरिति' भाष्योक्त पञ्चमी समासपक्षे पदात्परस्योत्तरस्यादेः षत्वं नेत्यर्थेन निषेधबाधनार्थं गवादिग्रहणस्य चरितार्थ्यात् गवादिग्रहणेन परिभाषाया अनित्यत्वं वक्तुमशक्यम् ।

वयंतु मन्यामहे यत् 'न पदान्ते (1·1·58) सूत्रे भाष्ये 'गोचा' इत्यादिसिद्ध्यर्थं परिभाषाया अनित्यत्वमावश्यकम् । अन्यथा कृदन्तेन समासे अच इत्यस्य पदत्वा भावे न 'न पदान्त0' (1·1·58) इति निषेधाप्रवृत्या लुप्ताऽकारस्य स्थानिवत्वेन गो इत्यस्यावादेशापत्तिः, अनित्यत्वे तु सुबन्तेन समासे पदे परतोऽन्तस्यौकारस्यावङादेशे स्थानिवत्त्वनिषेधान्न दोषः' इति ।

भट्टनागेशस्तु पदत्वयोग्ये परत इत्यर्थेन स्थानिवत्वनिषेधादनित्यत्वे तस्याः किमपिफलं नास्तीत्याह । 'धनक्रीता' इत्यस्याजादित्वात् सिद्धिः पदत्व योग्यत्व च सुप् निष्ठ विधेयतानिरूपितोद्देश्यता वच्छेदकान्तत्वम् = सङ्केत सम्बन्धेन प्रातिपदिकपदवत्वमिति यावत्' इति च तदाशयः ।

ङीष्प्रत्यय विधायकं सप्तमं सूत्रम्—

'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इति । अत्र जातेरिति पञ्चम्यन्त, तत्र जातिनिरूपितपरत्वस्य प्रत्यये सम्भवाज्जातिवाचपरम् । नच जातिशब्देन जातिवाचक जातिशब्दस्यैव ग्रहणमस्त्विति वाच्यम्, अस्त्रीविषयादित्यादि विशेषण वैयर्थ्यापत्तेः । अस्त्रीविषयादित्यत्र अनन्यभावेविषयशब्दः, स्त्रियामेव यस्य प्रातिपदिकस्य नियमेन वृत्तिस्तत्स्त्रीविषयम्, ततोऽन्यदस्त्रीविषयम्, स्त्रीविषयः = नियमेन वाच्यो यस्येति विग्रहे बहुव्रीहिणा स्त्री विषयशब्दो नित्यस्त्रीलिङ्गपरः ।

तथाच अस्त्रीविषयादित्यनेन नित्य स्त्रीलिङ्ग भिन्नार्थो विवक्ष्यते। नित्यार्थलाभार्थमेव विषयग्रहणम्। अन्यथा 'अस्त्रियाः' इत्येव ब्रूयात्। तथा च—'जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्या' दिति सूत्रार्थः।

लोके जननेन प्राप्यते या सा जातिरिति रीत्या जाति शब्दस्य शुक्लादिगुणसाधारन्येन प्रवृत्तिदर्शनात्तस्यैवात्त विवक्षायां गुणेऽतिव्याप्तिः। यदि तन्त्रांतर प्रसिद्धे भिन्नेषु स्वाश्रेयषु अभिन्नभिधान 'प्रत्ययनिमित्त जातिः' इति अभिन्नयोः = समानकारयोरभिधानप्रत्यययोः, अभिधीयतेऽनेनेत्यभिधानम् = शब्दः, प्रत्ययः ज्ञानम्, निमित्तं जाति'रित्यर्थिकायाजातेश्रयणे, नित्यमेकमनेकानुगतं सामान्यमित्यस्य वाजातेराश्रयणे शुक्लादिगुणानां नित्यत्वैवत्ववादिनयेतेऽवति व्याप्तिरिति शुक्ला शाटीत्यादि न सिध्येत्। किञ्च लौकिक जातिग्रहणे ब्राह्मणत्वादीनां गोत्रस्यौपगवादेर्जातित्वे वादिनो विप्रतिपत्तेः, चरण शब्दाभानं च कढादीनामध्ययनक्रियासम्बन्धनिबन्धनत्वेन पाचिकादिवत् क्रियाशब्दत्वात्, सवर्णेभ्यः सवर्णासुजायन्ते हि सजातयः' इत्यादि स्मृत्या जननेन यत्प्राप्यने ब्राह्मणत्वादि सा जातिश्चेत्तदा युवत्वादाव व्याप्तिः। तथाच युवतितरा इत्यत्र 'जातेश्च' (6·3.41) इति पुंवत्वनिषेधो न स्यादित्यतो भाष्योक्त जाति लक्षणमेवात्र जातिपदग्राह्यमिति स्वीकर्तव्यम्। तथाहि—'आकृतिग्रहणाजातिः', लिङ्गानां च नसर्वभाक्। सकृदाख्यातनिर्ग्राह्या—गौत्रं च चरणैः सहा। 'इत्युक्तं भाष्ये' (4·1·63)। अत्र—'आकृतिग्रहणा'—इत्यस्य जातेः प्रथमलक्षणस्य 'अनुगत संस्थान व्यङ्ग्ये' ति फलितोऽर्थः अत्रहिं गृहयन्ते = ज्ञायन्तेऽनेनेति करणेल्युट्, सामान्ये नपुंसकम्, आकृतिः = अवयवसंनिवेशः। 'आकृतिग्रहणं ज्ञान साधनंयस्यासा' इति 'आकृतिग्रहणा' इत्यस्य व्युत्पत्तिः। उपसर्जनत्वादिहग्रहण शब्दात् 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ् क्वरपः' (4·1·15) इति न ङीप् इत्यप्यवधेयम्। इदृशाकास्तटः इत्याकृत्युपदेशादि व्यङ्ग्या तटत्वादि जातिः। सर्वासु तटादितत्तद् व्यक्तिषु आकृति विशेष जल समीपप्रदेशविशेषेषु तटशब्दो रूढः, यतः—'कूलंरोधश्चतीरं[1] च प्रतीरं च तट 'त्रिषु' इत्युक्तम्। नच बाल्याद्यवस्थाभेदभिन्नेष्वनेकदेहेषु वृत्तिया देवरत्तत्वादिकस्यापि जातित्वापत्तिरिति वाच्यम् समानकालिकानेकव्यक्तिवृत्यनुगतसंस्थानव्यङ्भ्येत्यर्थात्। देवदत्तादिशरीर च न ह्येक कालावच्छेदेनानेकम्, घटदयश्चैक कालावच्छेदेनानेके सन्तीति घटत्वादेर्जातित्वम्। अतएव कल्पभेदेनेन्द्रादेर्भेदेप्येक कालावच्छेदेनानेकन्द्राहे-रभावादिन्द्रत्वादिकं न जातिः।

---

1. अ० को०, 1/10/7

नच दमयन्त्याः स्वयंवरे पञ्चद्रोपाख्यानादिन्द्रत्वस्यैककालिकानेकेन्द्र वृत्तित्वेन जातित्वापत्तिदुर्वारेति वाच्यम्, सर्वेषामिन्द्राणां संस्थानस्यैकत्वे मानाभावात्, समानकालिकानेक व्यक्ति वृत्तित्वे सति विभिन्न कालिकानेक व्यक्तिवृत्यनुगत संस्थान व्यङ्ग्यया ए व जातित्वात् । पञ्चानामिन्द्राणामनेककालवृत्तित्वाभावे नादोषाच्च । दुर्गा, अपर्णा, इत्यादौ नित्यस्त्रीत्वादेव न ङीष् । प्रथमलक्षणमनुसृत्य ङीषो स्यं तटी[1] त्युदाहरणम् ।

नन्वेवं 'वृषलत्वादीनां जातित्वं न स्यात् यतो वृषलादीनामवयवसंस्थानस्य ब्राह्मणादि साधारण्येन वृषलत्वादेराकृति ग्रहणत्वं नास्ति, किन्तु साक्षादुपदेशगम्यत्वमेवेति द्वितीयमाह जातिलक्षणम्—'लिङ्गानाञ्च न सर्वभाक्सकृवाख्यातनिर्ग्राह्या' इति । द्वितीयलक्षणस्यास्य असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनात् व्यक्त्यन्तरे कथनं विनापि सुग्रहाजातिरिति द्वितीय लक्षणस्य फलितार्थः । द्वितीय जाति लक्षणमनुश्रृत्यस्य सूत्रस्योदाहरणं 'वृषली'[2] इति । यतः एकस्यां व्यक्तौ सकृद्-वृषलाद् वृषत्याम्, उत्पन्नोऽयमित्युपदेशात् वृषलत्वं तद्पत्य तत्सहोदरादौ सुग्रहम् । यद्यपि ब्राह्मणत्वमपि एकत्रोपदिष्टं तत्पितृपितामहादिषु सुग्रहम्—तथापि 'ब्राह्मणी'[3] इत्यत्र न जातिलक्षणौ ङीष् भवति । शाङ्गरवादिपाठान् ङीना बाधात् । अतः 'ब्राह्मणी' इति परित्यज्य 'वृषली' इत्युदाहरणं भट्टोजिदीक्षितेनोक्तं । द्वितीय जातिलक्षणेस्मिन् 'शुक्ला'[4] इत्यत्र शुक्लेत्यस्य जातित्ववारणार्थं सत्यन्तमुक्तम् ।

---

1. तटशब्दात् ङीषि 'यस्येति च' (6·4·48) इत्यकार लोपः स्वादिकार्यं च ।

2. वृषलशब्दात् ङीषि अकारलोपः स्वादिकार्यम् । जघन्या इति तदर्थः । जघन्यात् = देहस्यान्त्यात्पादाज् जाताहि जघन्यजा इत्युक्तम्— 'शूद्राश्चावरवर्णाश्चवृषलाश्च जघन्यजाः' इति (अ0 को0 2/10/1) तथा 'अन्तोजघन्यं चरमान्त्यपाश्चात्यपश्चिमाः, इत्युक्तम्' (अ0 को0 3/1/81) षडन्त्यवाचकाः ।

3. 'ब्राह्मणो पत्यमित्यर्थे तस्यापत्यम्' (4·1·92) इत्याणि 'ब्राह्मो-जाती' (6·4·171) इति टिलोपाभावे आदि वृद्धौ 'ब्राह्मण' इति-स्त्रियां जातिलक्षणं ङीषं बाधित्वा शाङ्गरवादौ पाठ सामर्थ्यात्, शाङ्गरवाद्यञोङीन्' (4·1·73) इति ङीनेव स्वरे भेदः ।

4. बलाकेति शेषः 'गुणेशुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति,

(क्रमशः...........)

'देवदत्ता'[1] इत्यादौ जातिलक्षणङीषो भाधार्थं सकृद् इत्यादि द्वितीयलक्षणे प्रविष्टम् ।

अथैताभ्यां लक्षणाभ्यामौपगवीकठीत्यादेरसंग्रहोऽनुगत-संस्थानव्यङ्ग्यत्वाभावात् सर्व लिङ्गत्वाच्चेत्यतस्तृतीयंजातिलक्षणमुक्तम् । 'गोत्रं च चरणैः सह' इति । गोत्र शब्देनात्र अपत्यमात्रविवक्षितं नतु 'पौत्रप्रभृतीतिपारिभाषिकम् । अत एवानन्तरापत्यप्रत्ययान्ते 'अवन्ती'[2] इत्यत्र जातिप्रयुक्तो ङीषिति 'अनुपसर्जनात्' (4·1·14) इति सूत्रस्थं भाष्यं संगच्छते । चरणशब्दोत्र शाखाध्येतरि प्रसिद्धः । चरणैः सह गोत्रं जातिरिति तृतीय लक्षणार्थः । अपत्यप्रत्ययान्तः शाखाध्येतृ वाची च शब्दो जातिकार्यमलभत् इति फलितार्थः । सूत्रस्यास्य 'औपगवी'[3] 'कठी'[1]

---

इति कोषात् विशेषनिध्नतया त्रिलिङ्गत्वाद्सर्व-लिङ्गत्वाभावात्, अवयव संस्थान व्यङ्ग्यत्वाभावाच्च, शुक्लत्वं न जातिः, अतोऽत्र न ङीष् किन्त्वदन्तत्वात् टावेव भवति ।

1. संज्ञात्वेन नपुंसक लिङ्गहीनत्तया असर्व-लिङ्गत्वेन न सकृदाख्याद् निर्ग्राह्यत्वमिति, देवदत्तस्य जातिवाचिकत्वा भावात् न ङीष् किन्तु टावेव भवति ।

2. 'अवन्तस्यापत्यं स्त्री'तितदर्थः । अपत्यप्रत्ययान्तत्वात् जातिलक्षणे ङीष् भवति, 'गोत्रं च चरणैः सह' इत्युक्तेः ।

3. औपगवतीति गोत्रस्योदाहरणम् । उपगता गावो यस्या असौ उपगुः उपगोरपत्यं गोत्रापत्यं वेत्तिविग्रहे अणि वृद्धौ औपगव शब्दात् अणन्तत्वात्प्राप्तं ङीपं बाधित्वा ङीष्, स्वरे भेदः । चरणस्य जातित्वे उदाहरणमिदम् ।

1. कठेन प्रोक्तमधीमानेत्यर्थे कठशब्दात् 'वैशम्पायनान्ते वासित्वात् 'कलापि वैशम्पायनान्ते वासिभ्यश्च' (4·3·104) इति णिनिः णिनेः 'कठचरकाल्लुक्' (4·3·107) इति लुकि 'छन्दोब्राह्मणानि च तद्विषयाणि' (4·2·66) छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि अध्येतृवेदिहप्रत्ययं विना न प्रयोज्यानीत्युक्तेः णिन्यन्तात् कठशब्दात् तदधीते0' (4·1·59) इत्यणः 'प्रोक्ताल्लुक्' (4·1·64) इति लुकि कठ शब्दस्य कठप्रयोक्तशाख्याध्येतृ वाचकत्वेन जातिवाचकतया 'जातेरस्त्रीविषयादयोपधात्' (4·1·64) इति स्त्रियां ङीषि 'यस्येति च, (6·4·148) इत्यलोप स्वादिकार्यम् । कठशाखा ध्येत्रीतितदर्थः ।

'कलापी'[2] 'बह्वृची'[3] इति सूत्रस्यास्य तृतीय लत्रणमनुश्रृत्योदाहरणानि । 'गोत्रं च चरणै सह' इति जाति लक्षण मनुसृत्य ब्राह्मणीति नास्य सूत्रोदाहरणम्, यतः शाङ्र्गरवादिपाठाङीना ङीष् बाध्यते अस्त्रीविषयादयोपधात् इत्येतावत्युच्यमाने मुण्डा[4] इत्यत्र ङीष्स्यात् तद् वारणाय 'जाते'रित्युक्तम् । 'बलाका'[1] इत्यत्र ङीषो भावाय 'अस्त्रीविषयादित्युक्तम् । तदुक्तौहि बलाकाया आकृति व्यङ्ग्यतया जातित्वेपि

---

2. कलापेन प्रोक्तमधीयानेत्यर्थः वैशम्पायनान्ते वासित्वात् 'कलापिवैशम्पायनान्तेवासिभ्यश्च' (4·1·104) इति कलाप शब्दात् णिनिः 'कठचरणाकाल्लुक्' (4·1·107) णिनेल्लुर्क् तदधीते' (4·1 59) इत्यणः 'प्रोक्ताल्लुक्' (4·1·64) इतिलुक् तत ङीष् 'कलापशाखाध्येत्री' ति तदर्थः ।

3. बह्वः ऋचोध्येतव्या यस्या इति विग्रहः 'ऋक्पूरब्धूः पथामानक्षे' (5·4·74) 'अनृचबह्वृचावध्येतर्य्येव' इत्यकारः समासान्तः, ततो ङीष् बहवृच शाखाध्येत्रीति तदर्थः । अत्र कथं स्त्रीणां वेदाध्ययने प्रवृत्तिः, स्त्रीशूद्रो न वेदमधीयातां' इति श्रुतेः इति प्रश्नस्तु न युक्तः पुराकल्पेस्त्रीणामपि वेदाध्ययनधिकारआसीदिति यमादि स्मृत्या श्रुति रुह्यते । तथा च यमादि स्मृतिः ।

"पुराकल्पेतु नारीणां मौञ्जीबन्धमिष्यते ।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा ॥" इति ।
वी.मि. संस्कारप्रकाशे 402-403 पृष्ठे उद्धता ।
स्मृति चन्द्रिका प्रथम भागे मनुना इयम् उद्धृता ॥

4. मुण्डत्वं नाम विलुप्त सर्वकेशत्वं तत्तु नाकृति व्यङ्ग्यम् केशदशायामपि तदाकृतेः सत्वात् नापि लिङ्गानाञ्चइति लक्षण लक्षिता जाति सर्व-लिङ्गत्वात् । नापि गोत्रचरणान्तर्भूतमनुक्तत्वम् अतोजातिरिति ङीष् न भवति, किन्त्वदन्दत्वात् टादेव भवति ।

1. 'बलाका बिसकण्ठिके'तितदर्थः इत्युक्तम्—
बलाका बिसकण्ठिका' (अ० को० 2/5/25) बिसकण्ठिकायाश्च विसमिव दीर्घः कण्ठोयस्याः इत्यर्थः । बलाकाया आकृति व्यङ्ग्य तया जातित्वेपि नियतस्त्रीत्वान्न ङीष् किन्तु अदन्तवात् बलाकशब्दात् टाबेव ।

नियतस्त्रीत्वान्न ङीष् । 'क्षत्रिया'[2] इत्यादौ ङीषो वारणायास्रायोपधादित्युक्तिः ।

'परेतु आकृति ग्रहणेत्येकमेव जातिलक्षणं, तत्र आकृतिपदमुपदेशोपलक्षणम्, आकृति द्वारा साक्षाद्वोपदेशग्राह्या जातिरितितदर्थः । तत्रेदृशाकारो गौरित्याकृत्युपदेशग्राह्या गोत्वादिजाति = 'अयं ब्राह्मणः' इति साक्षादुपदेश ग्राह्या ब्राह्मणत्वाजातिः ।

नन्वेवं शुक्लादिगुणानामपि जातित्वं दुर्वारम्, एकत्र अयं शुक्लः इत्युपदेशे सर्वत्र ग्राह्यत्वात् इति चेन्न, जातिग्राहकोपदेशस्यैव लक्षणत्वात् । अयं शुक्लः इति च गुणग्राहकोपदेशः । नचैवमात्माश्रयोदोषः जातिलक्षणे: जातेः प्रवेशादिति वाच्यम्, उपदेशविशिष्टस्यैव जातिग्राहकोपदेश पदेन ग्रहणात् । वैशिष्ट्यञ्च स्व (उपदेश) प्रयोजिकाया 'अस्य गोत्वादिज्ञानं जायतामितीच्छा तदुद्देश्यता गोत्वज्ञाननिष्ठा तादृशोद्देश्यतानिरूपिता या विषयित्व सम्बन्धावच्छिन्नावच्छेदकता सा गोत्वे तादृशावच्छेदकता समानाधिकरणविशेष्यत्वासमानाधिकरणा च या प्रकारता तन्निरूपकज्ञान जनकस्यैवोपदेशस्य ग्रहणात् ।

अयं शुक्ल इत्युपदेश वैशिष्ट्यं न शुक्लत्वे तस्ये गुणरूपतया तत्र शुक्लत्वनिष्ठ प्रकारतानिरूपित विशेष्यता सामानाधिकरण्यस्यैव प्रकारतायां सत्वात् । एवम् 'अयमभावः' इत्यत्रापि नातिव्याप्तिः, अनुयोगित्वस्यानुयोगिताविशेषरूपत्वेन तन्निष्ठप्रकारतया विशेष्यत्वसमानाधिकरणत्वादित्याहुः ।

एवञ्च लिङ्गानाञ्च न सर्वभाक् 'सकृदाख्यातनिर्ग्राह्या इति आकृति ग्रहणायाः स्वरूपानुवादं न तु लक्षणान्तरम् । तेन शुक्लादिगुणानामेकत्वपक्षे न जातित्वम् । विशेषणानां चा जातेः' (1.2.52) इति सूत्रे जातेराविष्टलिङ्गत्वं भाष्ये उक्तम् । आविष्टलिङ्गत्वञ्च-नियतलिङ्गत्वमिति कैयटः । नियतलिङ्गत्वञ्चात्र लिङ्गत्रयविशिष्टभिन्नत्वम् । तथा च यावन्त उक्तलक्षणकजातिवाचकास्ते न लिङ्गत्रय विशिष्टा । भाष्यप्रमाण्यज्जातेरेकशब्दवाच्यायान त्रिलिङ्गता । 'तटत्रिषु' इति कोश कृतां तु प्रमदः । जातिवाचकं नियतलिङ्गम् इति प्रायिकमिति केचित् । तेन तटादेस्त्रिलिङ्गत्वेऽपि न दोष इति केचिदिति शेखरकारो भट्टनागेशः ।

---

2. क्षणनं क्षत, भावे क्विप्, क्षतस्त्रायते इति क्षत्त्रः ज्ञायतेः कः, क्षत्रस्यापत्यं स्त्री इत्यर्थे 'क्षत्राद्धः' (4.1.138) इति घः, इयादेशे टापि 'क्षत्रिया' इति । अयं क्षत्रियः इत्युपदेश गम्यत्वेन क्षत्रिय त्वस्य जातित्वेपि योपधत्वान्नङीष् ।

आकृतिग्रहणेत्येकम्, प्रादुर्भाव विनाशाभ्यामित्यपरम् । अतएव कः पुनरेतयोर्जाति-लक्षणयोर्विशेषः ? यथा पूर्व लक्षणं तथा कुमारी भार्य्य इति भवितव्यम् । यथोत्तरं तथा कुमार भार्य्य इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम् । आकडारसूत्रेऽपि आकृतिग्रहणाजातिः इत्येवोक्तं भाष्ये । इत्यपि नागेशेनोक्तम् ।

ङीष्प्रत्ययविधायमृष्टमं सूत्रम्—

'जानपदकुण्डगोणस्थलभाजनागकाल नीलकुशकामुककबरात् वृत्यमत्रावपना-कृत्रिमा–श्राणास्थौल्य वर्णानाच्छादनायोविकार मैथुनेच्छा केशवेशेषु' (4·1·42) इति । जानपदादि कबरान्तसमाहार—द्वन्द्वात्पञ्चमी । वृत्यादि केशवेशान्ते इतरेतर-योग द्वन्द्वात्सप्तमी । अत्र स्त्रियामिति प्रातिपदिकादिति चाधिकृतम् । ङीषित्यनु-वर्तते तथा च एभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्यादिष्वर्थेषु ङीष् स्यात् इति सूत्रार्थः ।

'जानपदी'[1] ........ ........ ........

'कुण्डी'[1] 'गोणी'[2] 'स्थली'[3] 'भाजी'[4] 'नागी'[5] 'काली'[6] 'नीली'[7] 'कुशी'[8]

---

1. जनैः पितृपितामहादिभिः पद्यते = गम्यते यो देशः स जनपदः, 'घऽर्थे क विधानम्' इति कर्मणि कः, जनपदे भवा इत्यर्थे 'उत्सादिभ्योञ्' (4·1·86) इति प्राग्दीव्यतीये भवार्थेञि जानपदशब्दात् 'टिड्ढ' इति ङीप बाधित्वा वृत्तिरनुच्छेद्या जीविका तस्यां गम्यमानायां ङीषि अकारलोप 'जानपदी' इति रूपम् । ङीषि आद्युदात्तः ।

1. 'पिठरस्थाल्युखाकुण्डम्' इत्युक्तेः (अम0 2/9/31) कुण्ड शब्दस्य नपुंसकत्वेपि स्त्रियां ङीष् विधान सामर्थ्यात् स्त्रीलिङ्गत्वमपि । तथा च मेदिनी.द्विकं डान्तवर्गः श्लो. 4 कुण्डी कमण्डलौ जारात्पतिवत्नी सुते पुमान इति । कमण्डलुरूपेऽर्थे नित्यस्त्रीत्वात् 'जातेरस्त्रीविषयादयो-पधात्' (4·1·62) इत्य प्राप्तो ङीष् अपऽर्थे जातेअकारलोपे रूप-मिदम् । यद्वाअनेकविधिसंस्थानेषु अमत्रेषु (पात्रेषु) कुण्डव्यवहारेण कुण्डत्वे जातित्वाभावादप्राप्तौ ङीषिति बोध्यमिति भट्टनागेशः ।

कमण्लु संस्थानस्यानुगतत्वात्कमण्डलुरूपामत्रवाचिनः कुण्ड शब्दस्य जाति वाचकत्वात् 'जाते' इत्येव ङीषि सिद्धे नियमार्थमिदं ।

(क्रमशः ..........)

यस्तु घटपर्याय: कुण्डशब्द: स न प्रत्युदाहरणम्' पिठरे स्थाल्युखाकुण्डम् 'इत्यमरेण नित्यनपुंसकत्वात्।' कुण्डभग्न्यालये मानभेदे देवजलाशये इति कोशात अग्न्यालयादिवैधस्थान वाचकस्यापि नित्यनपुंसकत्वेन प्रत्युदाहरणत्वाभाव एव। 'अस्त्री कमण्डलु: कुण्डी' इत्युक्ते: (अम02/7/46) नित्यस्त्रीलिङ्गइति अप्राप्तो ङीष विधीयत इति भट्टोजिदीक्षित:।

2. चौरादिकाद् गुण धातोर्धति 'गोण' इति, ततो ह्यपनेर्थे ङीषि अकारलोपे स्वादिकार्येषुकृतेषु। 'गौणी' इति रूपमिदम्।

3. 'स्थली' स्थलस्थाने' इति भौवादिकात् 'घञर्थे क विधानम्' इत्यधिकरणे 'स्थल' शब्द: ततो कृत्रिमायां भूमौ गम्यमान्तायां ङीषि 'स्थली' इति रूपं सिध्यति। अकृत्रिमा जलशून्याभूमि:, तथा च रघु:—स013/23/ सैषा स्थली यत्र विचिन्वतात्वाम्। इति कृत्रिमाकृत्रिम भूभाग: संस्कृता संस्कृत भूभाग इति यावत्। स्थलम्स्थलान्येति कृत्रिमेत्यर्थ:।

4. भाज 'पृथक्कर्मणि' भज सेवायाम् इत्यत् 'कर्मणिघञि' भाज इति निर्देशादेव कुत्वाभाव: घञर्थे भाजशब्दस्ततो ङीषि अकारलोपस्वादिकार्येषु कृतेषु रूपमिदम्।

5. नागशब्दस्य स्थौल्ये प्रसिद्धत्वात्--तथाच गजवाची नागशब्द: स्थौल्यगुण योगादन्यत्र प्रयुक्त उदाहरणम्। गजवाची नागशब्द: कस्याश्चित् स्त्रियां स्थौल्यदर्शनात् नागसदृशे प्रयुक्तस्तदा ङीषि इति रूपमिदं सिध्यति।

नच 'अभिव्यक्त पदार्था ये स्वतन्त्रालोकविश्रुता:। शस्त्रार्थस्तत्र कर्तव्य: न शब्देषु तदुक्तिषु' ''इति विरोधस्तु नशङ्क्य: तस्य पदकार्ये एव प्रवृते:। यदातु सर्ववाची नागशब्दो दैर्ध्यगुणसम्बधात् कस्यांश्चित् दशायां स्त्रियां प्रयुक्त: लाक्षणिकस्तदा न ङीष् टाबेवेति प्रत्युदाहरणम्।

6. कालवर्ण-विशिष्टा इतितर्थ:। अन्यथा 'गुणे शुक्लादय: पुंसि' इति कोशास्त्रियामप्रयोगएव स्यात्। सूत्रे वर्णशब्दोऽर्शआद्यजन्तो वर्णविशिष्टार्थपर:। 'कृतान्तानेहसो: काल:' इत्युक्ते: (अम0 3/3/193) 'कालोमृत्यो महाकाले समये यमकृष्णयो:' इति मेदिन्युक्तश्च यम-

(क्रमश:)

वाचक कालशब्दः क्रौर्यगुणयोगात् यमराजसदृशास्त्रियां प्रयुक्तो यदा लाक्षणिकस्तदा वर्ण-विशिष्टार्थकत्वाभावात् टाबेव कालान्या इति ।

7. 'नीलादेषधौ' इति वार्तिकबलादोषेधित्वव्याप्तजाति विशिष्टार्थं बोधकान्ङीष् विधानेन' नीली' इत्यस्य नीलत्वं विशिष्टा (लोके नील इतिख्याता) ग्रोषधिरित्यर्थः । एतेन 'नीली' इत्यस्य नील्या रक्ता च्छादनभिन्न गवादिरर्थः इत्यपास्तम् । 'नीलान्या' इति ग्रौषधि वाचक नीलशब्दस्य नित्यस्त्रीत्वेन तत्रङीषो नित्यतया ग्राच्छादनार्थस्या सम्मवेन च नीलान्येत्यसङ्गतमतम् तथा च नीलान्येत्यस्य नील्या रक्तेत्यर्थे निष्पन्ननीलशब्दस्यान्प्रत्ययान्तस्यापि 'ग्रनाच्छादने' इत्यस्याभाव ग्रहणेन नील्या रक्ता शाटीत्यर्थे ग्राच्छादन भूतायां शाट्यां ङीषवारणाय' ग्रनाच्छादने' इति भट्टोजिदीक्षितेनोक्तम् ।

भट्टनागेशस्तु ग्रनाच्छादने इत्यस्याभावेऽपि' प्रतिपदोक्तपरिभाषया ग्रन्प्रत्यनिष्पन्न नीलशब्दस्य लाक्षणिकत्वे नाग्रहणात् तदर्थे ङीषो प्राप्त्या 'ग्रनाच्छादने' इति व्यर्थमेव स्यात् । किञ्च नील्या रक्तार्थकस्य नीलशब्दस्योषेधि वाचकत्वाभावेन 'नीलादोषधौ' इति वार्तिकविरोधस्तस्य शाट्यादि बोधकत्वेनौषधिवाचकत्वाभावात् ।

नच रक्तार्थे विशेषणीभूतौषधिवाचकत्वमादायौषधिवाचकत्वं प्रधानाप्रधानन्यायेन विशेष्यतमौषधिवाचकत्वस्यैव वार्तिके ग्रहणात् तस्माल्लक्षणया नीलवर्णं विशिष्टवोधकात्प्रतिपदोक्तमत् नीलशब्दात् नीलवर्णवती शाटीइत्यर्थे ङीष् वारणाय 'ग्रयाच्छादने' इति । वैयाकरण सिद्धान्तकोमुदी भूलन्तु वृत्यानुसारेणेत्याहुः । तथा च ग्रनाच्छादनेऽपि नील्या रक्ता गौरित्याद्यर्थे 'नीला' इत्येव ग्रन्नन्तस्य लाक्षणिकत्वेन ङीषो प्राप्तेरिति भट्ठनागेशोक्तम् ।

'प्राणिनिच' इति वार्तिकेन नील्या रक्ता गौरित्यस्पष्टत्वात् । 'नीलादौषधौ' 'नीली' इत्यस्य लोके नीलपदवाच्याग्रौषधिरित्यर्थः इति वार्तिकार्थः ।

उदाहरणं नीली इत्यस्य नीली ग्रौषधिः । नतु नील्या रक्तेत्यर्थः ।

'संज्ञायां बा' सङ्केतसम्बन्धेन नीलपदत्वाविवक्षायां वा ङीष् । 'नीली' 'नीला' संकेत सम्बन्धेन नीलपदवतीत्यर्थः ।

क्रमशः

'कामुकी'[1] 'कबरी'[2] इतीमानि चास्योदाहरणानि ।

ङीष् प्रत्यय विधायकं नवमं सूत्रम्—

'दीर्घजिह्वीचच्छन्दसि' (4·1·59) इति । दीर्घजिह्वीति-निपात्यते छन्दसी' ति सूत्रार्थः । स्त्रियां 'स्वाङ्गाच्चोपसर्जनात्' (4 1·54) इत्यत्र असंयोगोपधादि' त्युक्तेः ङीष् प्रतिषेधात् अप्राप्तोङीषि् छन्दसिदीर्घ-जिह्वशब्दात् निपातितः । ङीष-प्रत्ययास्य 'दीर्घ-जिह्वीयज्ञवान्' ।

ङीष्प्रत्यय विधायकं दशमं सूत्रम्—

'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' (4·1·55) इति । अत्र 'अस्वाङ्गपूर्वपदाद्वा' (4·1·53) इत्यतो वेति, 'अन्यतो ङीष्' (4 1·40) इत्यतो ङीषि' ति पूर्व सूत्रादुपसर्जनादिति चानुवर्तते, स्त्रियामित्यधिकृतम् । तथाच-- 'उपसर्जनभूत नासिकोदरौष्ठजङ्घादन्त कर्ण शृङ्गनशब्देभ्यो वाङीष्स्यात्स्त्रियाः'

---

8. 'फाला' इत्यर्थः । फलाय = शस्यायहितम्, यद्वा फलयते = विदार्यते भूमिरनेनेति फाला 'त्रिफला विशरणे' इत्यतः करणेघञि निष्पन्नः फला शब्दः तथाच अयोविकारेर्थेकुशब्दात् ङीषिअकार-लोपे-स्वादि-कार्येषुकृतेषुरूपम् । अन्यर्थेतु 'कुशा' इत्येव ।

साहि 'प्रस्तोतातुकुशाः कारयेद् यज्ञिकपस्यवृक्षस्यखदिरस्य-दीर्घसत्रेष्वेकेप्रादेशमात्रीः कुशपृष्ठास्त्वक्तस्समामज्जते' इतिच्छान्दोग्ये प्रसिद्धा ।

1. 'कमुकान्तौ' (भ्वा0अ0से0 444) इत्यतः 'लषपतपदस्था (3·2·154) इत्युक्तम् । या पुमांसं रत्यर्थं कामयते = इच्छति सा कामुकी' । मैथुनेच्छायागम्यमानायाकामुकशब्नात् स्त्रियां ङीषि अकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम् । धनादीच्छावस्थां तु 'कामुका' इति टाबेव ।

2. केशानां सन्निवेशविशेषे गम्यमाने कवरशब्दात् ङीषि अकारलोपेस्वा-दिकार्येषु कृतेषु रूपमिदम् । 'चित्रा' इत्यर्थेतु 'कवरा' इति टाबेव ।

1. अष्टा0 4·1·54

2. दीर्घ-जिह्व् शब्दात् स्त्रियां छन्दसि ङीषि अकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम् ।

मिति सुत्रार्थः । 'तुङ्गनासिकी[1]', तुङ्गनासिका[2],' 'कुम्भोदरी[3], कुम्भोदरा[4],' बिम्बोष्ठी,[5] बिम्बोष्ठा,[6] सुजङ्घी,[7] सुजङ्घा,[8] शुभ्रदन्ती,[9] शुभ्रदन्ता,[10]' 'सुकर्णी,[11] सुकर्णा,[12]'
'सुशृङ्गी,[1] सुशृङ्गा'[2]—इत्यादीनि चास्योदाहरणानि सन्ति ।

ननु 'स्वाङ्गाच्चो0' (4·1·54) इति पूर्व सूत्रेणैव 'तुङ्गनासिकी' इत्यादौ ङीषः सिद्धतया सूत्रमिदं व्यर्थ-मिति चेन्मैवम् । यतो नासिकोदरयोर्विषय' न क्रोडादिबह्वचः' (4·1·56) इति निषेधः प्राप्तः, तं बाधितुं ङीष् विकल्पविधिरयं चरितार्थः । नच बह्वज्लक्षणनिषेधस्यनिरवकाशत्वं,वक्तव्यम् । यतो सौ 'सुजघना' इत्यादौ सावकाशः । नच 'सहनासिका, अनासिका, सहोदरा, अनुदरा'—इत्यत्र 'सहनञ् विद्यमानपूर्वाच्च' (4·1·57) इति निषेधोऽप्यनेन बाध्येत, 'सहनञ् 0' (4·1·57) इति हि सकेशा, अकेशा, इत्यादौ सावकाश इति शङ्कनीयम् । यतः

---

1. तुङ्गानासिकायस्या इति तदर्थः । 'नक्रोडादि बह्वचः' इति बह्वज लक्षण ङीप् निषेधं बाधित्वा तुङ्गनासिकाशब्दात् स्त्रियां वाङीषि अकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम ।
2. ङीषो भावपक्षे टापिरूपम् ।
3. कुम्भोदरशब्दाद् बह्वज्लक्षणङीष् निषेधं बाधित्वा बाङीषि रूपम् ।
4. ङीषो भावे टापिरूपम् । कुम्भ इव उदरोयस्या इति, अनयोरर्थः ।
5. स्त्रियां बिम्बोष्ठ-शब्दात् वाङीषि रूपम् ।
6. ङीषोऽभावे टापिरूपम् । 'बिम्बफलसदृशोष्ठवती' इति तयोरर्थः ।
7. स्त्रियां सजङ्घशब्दात् वाङीषिरूपम् ।
8. ङीषोऽभाव पक्षे टापि रूपम् । 'सुशोभने जङ्घ यस्या' इति तयोरर्थः ।
9. स्त्रियां शुभ्रदन्तशब्दात् बाङीषि रूपम् ।
10. ङीषोऽभावपक्षे टापि रूपम् । 'शुभ्रादन्ता यस्या' इतितयोरर्थः ।
11. स्त्रियां सुकर्णशब्दात् बाङीषि रूपम् ।
12. ङीषोऽभावे टापिरूपम् । 'सु = शोभनौ कर्णौ यस्या' इत्यनयोर्र्थ. ।

1. स्त्रियां सुशृङ्गशब्दात् बाङीषि रूपम् ।
2. ङीषोऽभावपक्षे टापिरूपम् । 'सु = शोभने शृङ्गेयस्या' इत्यनयोरर्थः ।

'पुरस्तादपवादा[3] अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'सहनञ्' इति निषेधो 'न क्रोडादि'[4] सूत्रेण व्यवहिततया 'नासिकोदर0' इत्यनेन बाधं नार्हति। श्रौष्ठादीनां पञ्चानां तु 'असंयोगोपधात्' इति पर्युदासेप्राप्ते सूत्रेऽस्मिन्नुपादानमावश्यकम्। नच 'असंयोगोपधात्' इति पर्युदासे प्राप्ते सूत्रेऽस्मिन्नुपादानमावश्यकम्। नच 'असंगोपधां दित्यस्यवैयर्थ्यं' शङ्कनीयम्, यतस्तस्य 'सुगुल्फा' इत्यादौचारितार्थ्यमस्ति। नच सहोष्ठा अनोष्ठा—इत्यादौ 'सहनञ्' इति निषेधोऽप्यनेन वैकल्पिकङीषाबाध्येतेति वक्तव्यम्। 'मध्येपवादाःपूर्वान्' विधीन्बाधन्तेनोत्तरान्' इति न्यायात्। अथ 'नासिकादेर0' (4.1.55) इत्ययं ङीब्विकल्पस्तुङ्गनासिका इत्यादौ सावकाशः 'सहनञ्0' (4.1 57) इति निषेधस्तु सकेशेत्यादौ चरितार्थः, 'सहनासिका' इत्यादौ तु उभयप्राप्तौ कस्यबाधः ? इतिचेदत्रोच्यते ङीप् विकल्प विधेरस्य परत्वात् सहनञ्लक्षणः प्रतिषेधोबाधक इति सिद्धान्तः।

अत्र—'स्वङ्गी,[1] स्वङ्गा'[2] 'सुगात्री,[3] सुगात्रा'[4] 'सुकण्ठी,[5] सुकण्ठा'[6] इत्यादीनां साधुत्वार्थं वृत्तिकारेण अङ्गगात्र कण्ठेभ्योवक्तव्यमित्युक्तम्। तत्र वाङीतिशेषः। संयोगोपधत्वाद्धि' स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (4·1·54) इति ङीष् न प्राप्नोतीति तदाशयः। केचित्तु 'नासिकोदरे' त्यादावुक्तेन अनुक्त समुच्चयार्थं न चकारेणपूर्वोक्तानां 'स्वङ्गी'त्यादीनां साधुत्वं मन्यन्ते। नैतेषां साधुत्वं भाष्यानुक्तत्वात्तेभ्यो ङीषः, तस्मातन्वङ्गी, सुगात्री कलकण्ठी इत्यादीनामप्यसाधुत्वमिति भट्टोजिदीक्षितः[7]।

---

3. परि0शे0परि0 61
4. परि0शे0परि0, 62
5. परि0शे0 परि0 60
1. स्त्रियां स्वङ्गशब्दात् वाङीषि रूपम्।
2. ङीषो भावपक्षे टापिरूपम्। 'सुशोभनानि अङ्गानियस्याः इत्यनयोः रर्थः।
3. स्त्रियां सुगात्र शब्दात् वाङीषि रूपम्।
4. ङीषोभावपक्षेटापि रूपम्। 'सु = शोभनानि गात्राणि यस्याः' इत्यनयोरर्थः।
5. स्त्रियां सुकण्ठशब्दात् वाङीषि रूपम्।
6. ङीषो भावपक्षेरूपम्। 'सु = शोभनः कण्ठो यस्या' इत्यनयोरर्थः।
7. वै0सि0कौ0 स्त्रीप्रत्यय प्र0पृ0 665

ङीष्प्रत्यय विधायकमेकादशं सूत्रम्

'नित्यंछन्दसि' (4·1.46) इति । अत्र—'बह्वादिभ्यश्चे'[1] ति सूत्रं ङीषिति चानुवर्तते, स्त्रियामित्यधिकृतम् । तथा च ''बह्वादिभ्यश्छन्दसि विषये नित्यं ङीष् स्यात् स्त्रिया'' मिति सूत्रार्थः ।

ननु सूत्रस्यास्यारम्भसामर्थ्यादिव नित्यत्वे सिद्धे, नित्यग्रहणं व्यर्थ-मिति चेन्न, 'भुवश्च' (4·1·47) इत्युत्तर सूत्रे अनुवृत्यर्थं तस्यावश्यकत्वात् । 'बह्वीषु हित्वा'[3] इति चास्योदाहरणम् ।

ङीष् प्रत्यय विधायकं द्वादशं सूत्रम्—

'पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च' (4·1·64) इति । अत्र स्त्रिया-मित्यधिकाराल्लभ्यते,[4] पूर्वसूत्रात्[5] ङीषोऽनुवृत्तिः 'जातेरस्त्रीविषयादयोपधा-दित्यतः[6] 'क्वचिदेकदेशोऽप्यनुवर्तते'[7] इत्युक्तेः केवलं जातिरित्यस्यानुवृत्तिः, नतु अस्त्री विषया' दित्यस्यापि, तथा च 'पाकादयुत्तरपदाज्जाति वाचिनः स्त्रीविषयादपि ङीष् स्या'दिति सूत्रार्थः । पूर्वसूत्रेण[1] नियतलिङगशब्देष्वेतेषु ङीष् न प्राप्नोतीति सूत्रमिदमारब्धम् । 'ओदनपाकी'[2] शङ्कुकर्णी[3], शालपर्णी[4], शङ्खपुष्पी[5],

---

1. अष्टा0, (4 1·45)
2. 'अन्यतो ङीष् (4·1·40) इत्यत इति शेषः ।
3. बहुशब्दात् छन्दसि स्त्रियां ङीषि यणि सुपि विभक्तौ सत्वे रूपमिदम् ।
4. अष्टा, (4·1·3)
5. 'अन्यतो ङीष्' (4·1·40)
6. अष्टा0 (4·1·63)
7. परि0शे0परि0 18

1. 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इत्यनेनैत्यर्थः ।
2. ओदनस्यपाक इव पाको यस्याः इत्यर्थः । पाकोत्तरपदात् ओदनपाक शब्दात् स्त्रियांङीष् ।

(क्रमश.........)

दासीकली[6], दर्भमूली[7], गोवाली[8]' इत्येतानि चास्योदासरणानि सन्ति । ओदयपाकादयोह् येते शब्दा औषधि विशेषे रूढा[9] इति जाति वाचकाः ।

अत्र जाते इत्यनुवृत्तेः 'बहुपुष्पा'[1] 'बहुफलाशाखा'[2] इत्यत्र न ङीष् नच अजात्यर्थमेवेदमस्तु इति वक्तव्यम् । यतः 'प्राक्पुष्पादिषु जाति वचनेषु नित्यस्त्रीलिङ्गेषु' सद्चकाण्ड0 इति निषेधो व्यर्थः स्यात् ।

ङीष् प्रत्यय विधायकं त्रयोदशं सूत्रम्—

'पुंयोगादाख्यायाम्' (4·1·48) इति । अत्र 'अन्यतो ङीष्' (4·1·40) इत्यतः ङीषोनुवृत्तिः पुंसोयोगः = सम्बन्धः पुंयोगस्तस्यात पुंयोगादिति । विभाषागुणे स्त्रियां (2·3·25) इत्यनेन हेतौ पञ्चमी । आख्यायाम् इति पंचस्याः सप्तम्यादेशः 'सुपां सुलुक् 0' (7·1·39) इति सूत्रे सुपां स्थाने सुपो भवन्तीति वक्तव्यम्, इति युक्तम् । आख्या शब्द आख्यायते = बोध्यते नयेत्यर्थे 'आतोश्चोप-

---

3. शङ्कुऽकर्णे स्या इत्यर्थ,ः सा च गर्धवी औषधिश्च, अत्र कर्णोन्तस्पदात् शङ्ककर्णशब्दात् स्त्रियां ङीष् ।

4. शालस्येवपर्णा अस्या इत्यर्थः, पर्णोत्तरपदात् शालपर्णशब्दात् स्त्रियां ङीष् ।

5. शङ्ख इव पुष्पमस्या इत्यर्थः, पुष्पोत्तरपदात् शङ्खपुष्पशब्दात् स्त्रियांङीष् ।

6. दासी = काकजङ्घा, तद्वत् फलं यस्याः इत्यर्थः, फलोत्तरपदात् दास फलशब्दात् स्त्रियां ङीष् ।

7. दर्भ इव मूलमस्या इत्यर्थः, मूलोत्तरपदात् दर्भमूलशब्दात् स्त्रियां ङीष् ।

8. गोवाल सदृशो वालो अस्य इति गोबालः, गोबालो यस्याः इत्यर्थः श्वेतदूर्वापर्यायः । बालोत्तरपदात् गोबालशब्दात्स्त्रियां ङीष् ।

9. व्युत्पत्ति रहिता इत्यर्थः ।

1. बहूनि पुष्पानि यस्याः इत्यर्थः ।

2. बहूनि फलानि यस्या सा इत्यर्थः ।

सर्गेकः' (3·2·3) इति निष्पन्नः आख्याशब्दः बोधकपरः। ज्ञानस्य विषयाकाङ्क्षायां 'पुंयोगात्' इत्यत्र योगे गुणीभूतोऽपि पुमानेव सम्बन्ध्यते न स्त्री स्त्रियां वर्तमानस्य स्त्रीवाचकत्वाव्यभिचारात्।

'सम्भवव्यभिचाराभ्यास्याद्विशेषणमर्थवत्' इति न्यायेन पुंवाचकः शब्दः स्त्रीसम्बन्धात् स्त्रीवाचकः इत्यवार्थो गौण्या वृत्या, तदुक्तं भाष्ये 'यथैवद्वयसाव कुर्वतीकिञ्चित्पापं भर्तृकृतान् बन्धनादिक्लेशान् लभते, एवं शब्दमपि लभते' इति। लोकेऽपि भर्तृनाम्ना स्त्रिया व्यवहारः, तथाच पुंस्येव यः प्रसिद्धः शब्दः पुंयोगाद्धेतोः पुंवाचक प्रवृत्तिनिमित्तारोपेण स्त्रियां वर्तमानस्त स्मात् स्त्रियां वर्तमानात् पुंबोधक प्रातिपदिकात् ङीषितदर्थः।

इत्थं 'या पुमाख्या पुंयोगात्स्त्रियां वर्तते, ततोङीष् स्यात्' इति सूत्रार्थः।

'गोपी' इति च अस्योदाहरणम्। गाः पातीत्यर्थे 'आतोनुपसर्गेकः' (3·2·3) इति क प्रत्यये उपपदसमासे 'गोप' इति तस्य स्त्रियां यदि लक्षणया गोपालनकर्तृत्वारोपेण वृत्तिस्तदाङीष् गोपी इति रूपम्। यदातु आरोपित गोपान कर्तृत्वेन स्त्रियां प्रयोगस्तदा न ङीष्, किन्तु टापि गोपा इत्येव।

ङीष् प्रत्यय विधायकं चतुर्दशं सूत्रम्—

'बह्वादिभ्यश्च' (4·1·45) इति। अत्र पूर्वसूत्राभ्यां ङीषः, क्रमशः वै 'त्यस्य चानुवृत्तिः, स्त्रियामित्यधिकृतम्। बहु-शब्दात् गुणवाचित्वादेव पूर्वेण सिद्धे 'नित्यं छन्दसि' (4·1·46) इत्युत्तरार्थं तद्ग्रहणमिति तत्वबोधिनी, बहुशब्दो गुणवचनएव तस्येह पाठ उत्तरार्थ इति काशिका च चिन्त्या, आकडारसूत्रभाष्ये संख्याभिन्नस्यैव गुणवचनस्योक्तेः, सत्वे निविशते' इत्यत्र उत्पाद्यप्वानुत्पाद्यत्व विशिष्टस्यैव गुणत्वोक्त्या बहुत्वस्य चापेक्षा बुद्धि जन्यत्वमात्रतयागुणत्वासम्भवात्। तस्माद् बहुग्रहणं विर्थ्यम्।

एतेन वस्तुतस्तु बहुशब्दो 'नित्यंछन्दसि (4·1·46) इत्युत्तरसूत्र चेति द्वयमपि व्यर्थमेव, सर्व-विकल्पानां छन्दसि व्यवस्थितत्वात्' इति मनोरमादिग्रन्थो निरस्तः। छन्दसि विकल्पस्य व्यवस्थितत्वेन 'नित्यं छन्दसि' इयस्य वैयर्थ्यं तु सम्यगेव।

'बह्वी'[1] 'बहुः'[2] 'रात्री'[3] 'रात्रिः'[4] 'शकटी'[5] 'शकटि'[6] इत्यादि चास्योदाहरणानि ।

ङीष् प्रत्यय विधायकं पञ्चदशं सूत्रम्—

'बहुव्रीहेरुधसो ङीष्' (4·1·25) इति । अत्र 'उधस' इति बहुव्रीहेर्विशेषणतया तदन्तपरम् । स्त्रियामित्यधिकारात्लभ्यते । तथा च—उधोऽन्ताद् बहुव्रीहेर्ङीष् स्त्रियां स्यादिति सूत्रार्थः । नच 'संख्याव्ययादे' (4 1·26) इति वक्ष्यमाणो ङीष्इहैव क्रियतां ङीष् ग्रहणमास्त्विति शङ्क्यम् । यतः ङीषः पित्वेनानुदात्तत्वा पत्या तद्वारणाय

---

1. 'बहि वृद्धौ' इत्यतः 'लघिवंह्योर्नलोपश्च' (उणा0 1/29/) इति कुप्रत्यये नलोपे च:'बहुः' इति ततोङीषि यणिरूपम् । श्राष्ठ्यघटित-पाठस्तु पृषोदरादित्वाद् बोध्यः । अत्रैकवचनान्तोदाहरणदानेनोदाहरणे बहुशब्दो वैपुल्यवाच्येव । संख्यावाचकन्तु 'बह्वयः' 'वहवः' इत्युदाहरणीयम् । विनिगमनाविरहादुभयोरत्र ग्रहणात् । यद्यपि वैपुल्य वाचि बहुशब्दात् । 'सत्वेनिविशते' इति गुणलक्षणा क्रान्ततया पूर्वेण ङीष् सिद्धस्तथापि विनिगमनाविरहेणोभयोरत्र ग्रहणमिति परत्वादनेनैव ङीष् ।

2. ङीषो भावपक्षेरूपम् ।

3. रातिसुखं ददातीत्यर्थे 'रादाने' (अ0प0अ0 1082) इति राधातोः 'राशदिभ्यांत्रिप्' (उणा0 4/67) इतिः त्रिपि 'रात्रि' इति निष्पद्यते ततस्त्रियां कृतोयऽइकारस्तदन्तात् प्रातिपदिकात् ङीष् वास्यात्, नतु क्तिन्नन्ता 'दित्यर्थकात्' कृदिकारादक्ति नः' (ग0सू0 50) इति ङीषि अकारलोपे रूपम् ।

4. ङीषोऽभावपक्षे रूपम् ।

5. अव्युत्पन्नात् शकटिशब्दात् 'स्त्रियां' कृदिकारान्तादकृदिकान्तादपि 'ङीष् वास्यादित्यर्थकात्, नतु क्तिन्नर्थ प्रत्ययान्तादित्यकात्' 'सर्वतो क्तिन्नर्था-दित्येके' (ग0सु0 51) इति ङीषिरूपम् ।

6. ङीषोऽभाव पक्षे रूपमिदम् ।

प्रत्ययस्वरेणोदात्तत्वार्थं ङीष्विधानस्यावश्यकम् । अस्योदाहरणम्—'कुण्डोध्नी'[1] इति । कुण्डोधो[2] धैनुक मित्यत्र ङीषो वारणायात्र स्त्रियामित्युक्तम् ।

'प्राप्तोधा,[1] इत्यत्र ङीषोवारणाय चेह बहुव्रीहे रित्युक्तम् ।

ङीष्प्रत्यय विधायकं षोडशं सूत्रम्—

'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52) इति । अत्र 'क्तादिति' 'अत' इति चानुवर्तते तदन्तविधि क्तन्तादित्यस्य क्तान्ततदाद्यन्तादित्यर्थः, तदादिविशेष्यक तदन्तविधेरपीष्टत्वात् ननु वहुव्रीहेः क्तान्तत्वंनसम्भवति प्रत्ययग्रहणपरिभाषया कृद्ग्रहणपरिभाषया[3] च कृदन्ते एव तत्सम्भवादिति चेन्न, अत्र सूत्रे 'क्तात्' इत्यस्यानुवृत्तिसामर्थ्यात्तयो : परिभाषयोरनुपस्थितेर्बहुव्रीहेः क्तान्तत्वस्य वक्तुं शक्यत्वात् ।

---

1. कुण्डोधस् शब्दात् 'ऊधसोनङ्' (5·4·131) इति ऊधसः सकारस्यानङादेशे नकाराकारस्योच्चारणार्थतया 'ऊध अन' इति दशायाम् 'अतोगुणे' (5·1·194) इति पररुपे 'कुण्डोधन इति जाते' डाबुभाभ्यामन्यतरस्याम्' (4.1·13) इति वैकल्पिके डापि'अन उपधालोपिनोऽन्यतरस्याम्' (4·1·28) इति वैकल्पिके ङीपि च प्राप्ते ङीपो ङीपश्चाभावे 'ऋन्नेभ्यो ङीप्' (4·1·5) इति प्राप्तस्य ङीपः अनोबहुव्रीहे (4·1·12) इति निषेधे च प्राप्ते ङीषि 'अल्लोपोनः' (6·4·134) इत्यल्लोपे स्वादिकार्ये च कृते रूपमिदं सिध्यति । 'कुण्डमिवऊधोयस्या' इति तदर्थः ।

2. अत्र धनूना समूहो धनुकम् 'अचिन्तहस्तिधेनोष्ठन्' (4·2·47) इति धेनु शब्दात् ठकि आदिवृद्धिः 'इसुसुकान्तात्कः (4·3·51) इति ठस्य कादेशे नपुंसकेरुपम् । ऊधस् शब्दोऽपि ऊधस्तु क्लीब मापीनम् (अम02/9/73) इत्युक्तेः धेनुक मत्स्यस्य विशेषणतया च नपुंसकत्वात् ततो ङीष् न भवति स्त्रीत्वाभावात् अनङ्गापत्ति न, तद् विधौ स्त्रियाम् इत्युपसंख्यानात् । अत्र 'कुण्डोधः' शब्दस्य 'कुण्डमिव ऊधो यस्ये' त्यर्थः, नपुंसत्वस्फोरणाय धैनुक' मिति विशेष्यम् ।

1. 'ऊधःप्राप्ता' इति विग्रहे 'प्राप्तापन्ने च द्वितीयया' (2·2·4) इति तत्पुरुष समासः तेन बहुव्रीहित्वाभावान्नङीष् ।

2. 'प्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्' परि0शे0परि0 23 ।

3. 'कृद्ग्रणे गतिकारकपूर्वस्यापि ग्रहणम' परि0शे0परि ।

स्वाङ्गपूर्वपदो वहुव्रीहि रेवात्रोदाहियते, अस्वाङ्गपूर्वपदात् बहुव्रीहेर्विकल्पेन ङीषो वक्ष्यमाणत्वात्। 'ऊरु भिन्नी'[4] इतिचास्योदाहरणम्।

ङीष् प्रत्यय विधायकं सप्तदशं सूत्रम्—

'भुवश्च' (4·1·47) इति। अत्र पूर्वसूत्रात्[1] ङीष्, छन्दसीति[2] चानुवर्तते, स्त्रियामित्यधिकृतम्। तथाच "भूशब्दात् छन्दसिस्त्रियां ङीषिस्यादिति" सूत्रार्थः। 'विभ्वी'[3] 'प्रभ्वी'[4] इति चास्योदाहरणंस्तः। नच स्वयंभूरित्यत्रापि स्त्रियां ङीष् शङ्क्यः योऽत्र 'विप्रसम्भ्य': (3·2·180) इति डुप्रत्ययान्तयनुकृत्य पञ्चम्य क वचेन) 'भूव': इति निर्देशः। डुप्रत्ययान्तानुकरणे मान चात्रं 'वोतोगुणवचनात्' (4 1·44 इत्यतः उतोनुवृत्तिः। नापि च डुप्रत्ययान्तानुकरणे 'घेर्ङिति' (7·3.111) इति गुणे कृते इति निर्देशः प्राप्नोति इति शङ्क्यं यतः सौत्रोऽत्र उवङ्गादेशो भवति।

ङीष् प्रत्यय विधायकं अष्टादशं सूत्रम्—

'वाहः' (4·1·61) इति। अत्र 'अन्यतोङीष्' इत्यतङीष एवानुवृत्तिः 'दिक्पूर्वपदात्' इतिपूर्वसूत्रेसन्निहितस्यापि ङीपस्तुनानुवृत्तिः, अस्वरितत्वात्। तयोर्हि स्वरेभेदः। स्त्रियामित्यर्थंकृतम् प्रातिपदिकात्' इति च। 'बाहः' इति पञ्चम्यन्तम्, अधिकृतस्य' प्रातिपदिकात्' इत्यस्य विशेषण-तया तदन्तविधिः। तथाच—'वाहन्तात् प्रातिपदिकान्ङीष् स्त्रियांस्यात्' इति सूत्रार्थः। वहेरयम् 'वहश्च' (3·2·64) इति ण्विप्रत्ययान्तस्यण्यन्तात् क्विपि वा 'वाहः' इति निर्देशः। छन्दसि कर्मण्युपपदे वहेर्ण्विविधानात् केवलस्य वाहोऽसम्भवेन तदन्तस्यैव ग्रहणम्।

---

4. 'ऊरुभिन्नशब्दात्ङीषि अकारलोपेस्वादिकार्येषुकृतेपुरुपमिदम्। 'ऊरु भिन्नौ असंयुक्तौयस्या' इत्यर्थः। 'निष्ठा' (3 2·1·2) इति भिन्न-शब्दस्य तथाच—'बहुव्रीहेः क्तान्तादन्तोदात्तादन्तात् स्त्रियांङीष् स्या' दितिसूत्रार्थः। पूर्व·निषातस्तु नेहभवति, यतः 'जातिकालसुखा-दिभ्यःपरा निष्ठा (वा0 2·2·36) इत्युक्तम्। अन्तोदात्तोऽयं शब्दः 'जातिकालसुखादिभ्यः 0' (वा0 2·2·36) इत्यनेन।

1. 'अन्यतोङीष्' (4.1·4) इत्यत इति शेषः।
2. 'नित्यं छन्दसि' (4·1·36) इत्यत इति शेषः।
3. विभुशब्दात् स्त्रियां छन्दसि नित्यं ङीषि यणि स्वादिकार्षेषु कृतेषु रूपमिदम्।
4. प्रभुशब्दात् स्त्रियां छन्दसि नित्यं ङीषि यणि स्वादिकार्येषु कृतेषु रूपमिदम्।

अस्य उदाहरणम्—"दित्यौही"[1] इति ।

ङीष् विधायकम् एकोन-विंशतितमं सूत्रम्—

'वोतोगुणवचनात्' (4·1·44) इति । अत्र प्रातिपादिकादित्यनुवृत्तम्, स्त्रियामित्यधिकृतम्, 'अन्यतो ङीष्' (4·1.40) इत्यतो ङीष् इति चानुवर्तते । वा उत इतिच्छेद, । उतोगुणवचनस्य प्रातिपदिकस्य विशेषणात् तदन्तविधिः । तथाच "उदन्तात् गुणवाचिनः प्रातिपदिकात् स्त्रियां वाङीष् "स्यादिति सूत्रार्थः । अत्र गुणपदेन न पारिभाषितः पाणिनिः न न्यायवैशेषिकालङ्कार[2,3] शास्त्रोक्तो गृह्यते, किन्तु विशेषपदार्थ भिन्नो जातिभिन्नः क्रियाभिन्नोद्रव्यभिन्नः समवेतः पदार्थः गृह्यते । तदुक्तम्—विशेषपदार्थ-भिन्नत्वेसति जातिभिन्नत्वेसति क्रियाभिन्नत्वेसति द्रव्याभिन्न-त्वेसति समवतत्वं गुणलक्षणमिति अत्र विशेषपदार्थजाति समवेतत्व सत्वेऽपि गुण-त्ववारणाय क्रमशः विशेष भिन्नत्वे सतीति च निवेशितम् । समवेतत्वमित्युक्तेश्च अभाव निराशः । तदुक्तम् —

'सत्वे निविशते पैति पृथग्जातिषु[4] दृश्यते ।
आधेयाश्चाक्रियाजश्च सो सत्वप्रकृतिर्गुणः ॥' इति ।

---

1. दित्यं = दिव्षात्मकं, सार्धवर्षात्मकं वा वयो वहतीत्यर्थे छन्दसिसह 'वशश्च' (3·2·64) इति ण्वि प्रत्यये णस्येत्संज्ञया लोपेन वेः 'वेरपृक्तस्य' (6.1.67) इति लोपेनापहारे उपधावृद्धौ उपपदसमासे दित्यवाह् शब्दान् ङीषि 'वाहऊठ्' (6 4·133) इत्यूठि ऊठः संम्प्रसारणसंज्ञाकत्वेन 'दित्य ऊ आह ई' इति दशायाम् 'सम्प्रसार-णाच्च' (6.1.1.8) इति पूर्वरूपे 'दित्यउह्' 'ई' इति जाते 'एत्येधत्यूठ्सु' (6·1·89) इति वृद्धौ स्वादिकार्येषु कृतेषुरुपमिदम् । ण्विप्रत्ययस्यछन्दोमात्रविषयत्वाद् 'दित्यवाटचमेदित्यौही च मे' इति वेदवाक्यमुदाहृतं वै0सि0कौ0 भट्टोजिदीक्षितेन । लोके तु वाहयतेः क्विपि वार् शब्दात् ङीषि 'दित्यौही' इत्येव रूपं भवतीति सूचयितुं वैदिकप्रक्रियायामुपन्यसनीयमप्येतत् सूत्रं दीक्षितेन स्त्रिप्रत्ययप्रकरणे समुपन्यस्तम् ।

1. 'अदेङ् गुणः' (1·1·2) इति परिभाषितः ।
2. गुणपदशक्यतावच्छेदकत्यं गुणत्वोति सिद्धान्तात्-रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग- परत्वा-परत्व-गुरत्व-द्रव्यत्वे-स्नेह-शब्दबुद्धिःसुख-दुःखेच्छा-द्वेष प्रयत्न धर्मा धर्म संस्काराश्च चतुर्विंशतिर्गणाः ।
3. ओजः प्रसादोमाधुर्यमितीतिशेषः ।
4. म. भा. 4/1/44.

अत्र सत्वे द्रव्यं समवायिकारणं तत्रैव निविशेते समवैति यः स गुण इत्यन्वयः 'द्रव्यमात्र समवेतः' इति तदर्थः । द्रव्यगुणक्रियावृत्तित्वात् सत्वजातेः मात्रपदेन व्यवच्छेदो भवति । 'अपैति' इत्यस्य 'कतिपयद्रव्येभ्योपगच्छती'त्यर्थः । द्रव्यत्वस्य सर्वद्रव्यवृत्तित्वात् नातिव्याप्तिः । 'पृथक् जातिषु दृश्यते' इत्यस्य पृथक् भिन्नाः जातयः येषां ते पृथक् जातयः । तथा च भिन्नजातिरित्ति तदर्थः । गोत्वस्य गोजातीयेष्वेव सत्वात् भिन्न जातीयेषु अश्वादिषु असत्वात् नातिव्याप्तिः 'आधेयश्च क्रियायश्चे' त्यस्ये आधीयते = उत्पाद्यते इत्याधेयः उत्पाद्यः अक्रियाजः = अनुत्पाद्य इति चार्थः । गुणो नित्यानित्य भेदेन द्विविधो भवतीति तत्रानित्यगतेगुणे उत्पाद्यत्वनित्यस् अनुत्पाद्यत्वं चास्ति । क्रियायाश्च सर्वस्याः उत्पाद्यत्वात् नाति ध्याप्तिः । 'असत्व प्रकृतिरित्यस्य' अद्रव्यस्वभाव इत्यर्थः । तेन द्रव्ये अवयवद्रव्य समवेतत्वेऽपि असमवायिकारण संयोगनाशेततो पानात् विजातीय पार्थिवाद्ययतेषु सत्वेऽपि नित्यानित्यभेद सत्वेऽपि द्रव्याभिन्नत्वा भावानात्तिव्याप्तिः । इत्थं क्रमशोऽत्र-मात्र पदेन सत्ता जातेः, अपैतीत्यनेन द्रव्यत्वस्य, पृथग्जातिषु दृश्यते 'इत्यनेन गोत्वादि जातेः,' 'आधेजश्चक्रियायश्च' इत्यनेन क्रियायाः असत्व प्रकृतिः इत्यनेन च द्रव्यस्यागुणत्वाभावः तत्तदनायस्य च मृद्वादेः गुणत्वं सिद्धतीतित्यवधेयम्।

एतावता समास—कृदन्ततद्धितान्ताव्ययःसर्वनाम-जाति-संख्या संज्ञाशब्द व्यतिरिक्तमर्थ वच्छब्दस्वरूपं यदस्ति तदेव गुणवचनमिति सिद्धयति । तदुक्तम् । "आकडारादेकासंज्ञा' इति सूत्रे भाष्ये समासकृदन्त तद्धितान्ताव्यय-सर्वनाम—जाति संख्या-संज्ञा-शब्द व्यतिरिक्तमर्थवच्छब्दरूपं गुणवचनं संज्ञं भवती' ति । 'आकडारसूत्रस्थ भाष्ये संख्याभिन्नत्वमप्युपातमिति तदप्यत्रगुणलक्षणे निवेशनीयम् । तथाच विशेषपदार्थ-भिन्नत्वे सति जातिभिन्नत्वेसति क्रियाभिन्नत्वेसति द्रव्यभिन्नत्वेसति संख्याभिन्नत्वेसति समवेतत्वमिति गुणलक्षणफलितम् ।

नचैवमपि मृदुपट्वादि शब्दानां गुणविशिष्टद्रव्य वाचित्वात् गुणवचनत्वा भाव इति वाच्यम । गुणवचनेत्यन्वर्थसंज्ञया गुणोपसर्जन द्रव्यवाचित्वस्यैव विवक्षितत्वात् । एवञ्च रूप शब्दस्य न गुण वचनता, तस्य प्राधान्येन रूपवाचितयारूपवतिप्रयोगा भावात् । रूपादि शब्दस्यापिगुणवचनशब्देन ग्रहणे 'गुणवचनेभ्यामतुपोलुगिष्टः 'इत्यत्रापि रूपादिशब्दानां ग्रहणापत्तौ 'रूपो घटः' इत्यादि प्रयोगापत्तेः । सर्वचेदं तथ्यम्—अरुणाधिकरणे वासुदेव दीक्षितेन ऊध्वरमीमांसाकुतूहलवृत्तौ स्पष्टीकृतमिति विशेष जिज्ञासु-भिः ततः एवैतददनुसन्धेयम् ।

अत्र—

"सत्वे निविशते पैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सो सत्वप्रकृतिर्गुणः ॥"

इति गुणलक्षणत्वे एकदेशयुक्तिर्बहुविशेषणानां वैयर्थ्यात् भाष्यकृता व्याख्या नाच्चैत्युक्तं भट्टनागेशेन । तदाशयस्तु 'निविशते' इति व्यर्थम्'अक्रियान,' इत्यनेनैव क्रियाव्यावृत्तेः, क्रियायाः क्रियाजन्यत्वाभावात् एवम् 'अक्रियाज' इत्यनेन द्रव्यव्यावृत्तावसत्व प्रक्तिररिति व्यर्थ-मिति । मतमिदं भट्टनागेशस्य न युक्तं प्रतिभाति । यतः सर्वेषामपि विशेपणानां साफल्यमेवात्रविद्यते, तथाहि 'सत्वेनिविशतेपैतीत्या-द्यस्य विशेषणस्यानुक्तौ द्रव्याधिकरणकोत्पाद विनाशसालित्वमित्यस्यालाभे अभावस्यापि-गुणत्वापत्तिः एवं नित्यैकमात्र वृत्याकाशत्वादेर्गत्वापत्तिः । अत्रापि विशेषणे उत्पत्ति-मात्रोऽक्तौ ध्वंसेऽतिव्याप्तिः नाशमात्रोक्तौ-प्रागभावेऽति व्याप्तिः । 'पृथग्जातिषु इत्यस्य च 'जातिभ्यः' पृथगित्यर्थः, अस्यानुक्ताबुत्पादविनाशशालिन्या तत्तद्व्यक्ति वृत्तित्व विशिष्ट ब्राह्मणत्वादिजातेरपि गुणत्वापत्तिः, उत्पादविनाशौ चास्याः संस्कारपातीत्यमद्यशेवनादिना तत्तद्व्यक्तिवृत्तित्व विशिष्ट ब्राह्मणत्वा-दिजाते रूपादविनाशयोः सकलानुभवसिद्धतयोऽस्थेयौ । 'आधेय' इत्यस्य सर्वाधारता नियामक सम्बन्धेतर सम्बन्धिन द्रव्यवृत्तित्वमित्यर्थमितिमते तदनुक्तौ घटादिनां गुणत्वापत्तिः । गुणस्यापि कालिकेन द्रव्याधिकरणतया 'आधेय' एवेतस्या सङ्गति-रतः सर्वाधारता नियामकतेरत्वं सम्बन्धविशेषणम् । क्रियाव्यावृत्तये अक्रियायश्चेति 'आधेयश्चाक्रियाजश्च' इत्येकं तृतीयं विशेषणम् 'नित्यानित्यं वृत्तिजातिमत्व' मिति तदर्थं इति भैरवमिश्र व्याख्यानेतक्रियाव्यावृत्तयेतत् । एवं द्रव्यभिन्नत्वस्यानुक्तौ घटादि द्रव्ये अतिव्याप्तिरिति न कस्यापि विशेषणस्यवैयर्थ्यं दरीदृश्यते प्रकृत सूत्रस्थ गुणलक्षणे इत्थम् अन्यत्राकडारसूत्रस्थ भाष्यस्य व्यवस्थापकत्वेऽपि प्रकृत सूत्रस्थत्वेन'सत्वेनिविशते', इत्यादि लक्षणस्यैव प्रकृते व्यवस्थापकत्वं स्वीकार्यम् । प्राक् च मया आकडारसूत्रस्थ भाष्योक्तमपिलक्षणमपि प्रकृत सूत्रस्थगुणलक्षण प्रति-कूलं नास्तीति च प्रतिपादित्यलम् ।

अत्र सूत्रे 'शुचिः'[1] इत्यत्रङीषो भावाय उतः इत्युक्तम् ।

---

1. शुक्ला इति तदर्थः । उदन्तत्वाभावात् नात्रङीष् । नच शुचधातोः 'इगुपधात्' इति उणादि ई प्रत्यये व्युत्पन्नस्य शुचिशब्दस्य आकडा-रसूत्रे गुणवचनत्वपर्युदासादेवात्र ङीष् न भविष्यतीति वाच्यम् उणादिणा अव्युत्पन्न पक्षानाश्रयणात् । नागेशोक्त शुक्लोति प्रत्यु-दाहरण (खस्संयो0 नेति ।

'आखूः'[1] इत्यत्र च ङीषो भावाय गुण इत्युक्तम्, 'उत' इति तपरकरणं तु 'वधूः'[2] 'कासूः'[3] इत्यादौ ङीषो भावाय इत्यवधेयम्। 'मृद्वी'[4] 'मृदुः'[5] 'पट्वी' 'पटुः'[7] इत्यादीनि चास्योदाहरणानि सन्ति।

ङीष्‌प्रत्यय विधायकं विंशतितमं सूत्रम्—

'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (4·1·54) इति। अत्रप्रातिपदिका[1]' दिति 'स्त्रिया'[2] मितिचाधिकृते, 'अस्वाङ्गपूर्वपदात्'0 (4·1·53) इत्यतो 'वे' ति, 'अन्यतोङीष्' (4·1·40) इत्यतोङी षिति, अजाद्यंतष्टाप्' चानुवर्तन्ते। अत 'अतः' इतिइत्य 'उपसर्जना' दिति, असंयोगोपधा 'दितिस्वाङ्ग' दित्यत्रान्वेति। 'स्वाङ्गा' दित्येतत् 'अत' इत्यनुवृत्त 'च' प्रातिपदिकादित्यनुवृत्तस्य विशेषणम्, विशेषणाच्च तदन्‌विधिः। तथाच—'असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादन्तात्‌प्रातिप-

---

1. मुशकेति तदर्थः आखोस्तु जातिविशिष्ट द्रव्यवचनत्वादुक्तगुणवचनत्वाभावात् न ङीष्।

2. 'वधूर्णुप्राणवोढास्त्री इत्युक्तेः नवोढात्वस्यप्रवृत्तिनिमित्त त्वेन खरु शब्दवत् गुणवचनत्वात् प्राप्तो ङीष् उद्वितत्परकरणात् बधूशब्दान्न भवति।

3. कासूविकलेवाचिस्यादित्युक्तेः विकलवपकयत्वस्य प्रवृत्ति निमित्तत्वेन खरु शब्दवत् प्राप्तो ङीष् उदितत्परकरणात् न भवति।

4. मृदुशब्दात् गुणवचनात् स्त्रियां ङीषि अलोपे स्वादिकार्येषु रूपमिदम्।

5. ङीषोऽभावपक्षे रूपमिदम्।

6. गुणवचनात् पटशब्दात् ङीषियणि स्वादिकार्येषु कृतेषु रूपमिदम्।

7. ङीषोऽभावेरूपमिदम्।

1. अष्टा04/1/1।

2. अष्टा0 4–1–3।

3. येन विधिस्तदन्तस्य इत्युक्तेः।

दिकाद्वाङीष्स्यादिति सूत्रार्थः। 'अतिकेशी'[4] 'अतिकेशा'[5] 'चन्द्रमुखी'[6] 'चन्द्रमुखा'[7] इत्यादीनिचास्य ङीषः सन्त्युदाहरणानि। 'सुगुल्फा' इत्यत्रङीषोऽभावाय 'असंयोगोपधा' दिति, 'शिखा[2]' इत्यत्रङीषोऽभावाय च 'उपसर्जना' दिति चेहो-

---

4. 'केशानतिक्रान्ता' इत्यर्थे अत्यादयःक्रान्ताद्यर्थे-द्वितीयया (वा0) इति द्वितीयातत्पुरुषः। अतिकेशशब्दात् स्वाङ्गत्वात् ङीषिरूपम् अत्र बहुव्रीहित्वाभावे षिङीषर्थमुपसर्जनग्रहणमावश्यकमिति भावः 'बहुव्रीहे' रित्यनुवृत्यैवोपसर्जनत्वे सिद्धेत्रोपसर्जनग्रसरणव्यर्थमित्यपास्तम्। केशस्यह्यत्र एक विभक्तिचापूर्व-निपाते इत्युपसर्जनत्वम्।

5. ङीषोऽभावपक्षे रूपमिदम्।

6. चन्द्र इव मुखं यस्या इत्यर्थः। स्वाङ्गान्ता न् ङीषि रूपमिदम्।

7. ङीषोऽभावपक्षे रूपमिदम्।

1. 'सुशोभनौ गुल्फौ यस्या' इति तदर्थः। चरणग्रंथिवाचक गुल्फ शब्दस्यात्र स्वाङ्गांतत्वेऽपि संयोगोपधत्वा न ङीष् किन्तु टापि सवर्ण दीर्घ-रूप-मिदम्।

2. 'शीङःखो ह्रस्वश्च' (उणा05 पा0सू0) इति ख प्रत्यये ह्रस्वे च निष्पन्न शिखशब्दात् स्त्रियां ङीषोभावे टापिरूपमिदम्। 'शिखा' इत्येवात्रप्रत्युदाहरणं युक्तम्। शोभना शिखा 'सुशिखा' इति तु प्रक्षिप्तम्, समासात्प्रागेवान्तरङ्गत्वात् टापि अदन्तत्वाभावादेवङीषो प्राप्तेः। यद्यपि 'अशिखा' इत्येव प्रत्युदाहृतं तथापि तस्याप्येकदेशे एवतात्पर्यम् न पूर्वे 'सहनञ्' (4·1·57) इति निषेधेन प्राप्त्याभावात्। प्रत्यदाहरणपर भाष्यदर्शनेन क्रोडादिषु शिखाशब्दस्य पाठ इत्यपास्तमितिभट्टनागेशाः।

अन्येतु 'सुशिखा' इत्येव प्रत्युदाहरणं युक्तम्, भाष्ये 'कल्याणपाणिपादा' इत्यत्रङीष् वारणाय 'अस्वाङ्ग पूर्वपदात्' (4·1·53) इत्यनुवर्त्य अस्वाङ्गात् पूर्वपदात्परं यत्स्वाङ्गमुपसर्जन तदन्तादन्तात्प्रातिपदिकान् ङीष् इत्यर्थ आक्षितः। तथा च 'शिखा' इत्यत्र अस्वाङ्गपूर्वपदात्परशिखाशब्दाभावादेव ङीषोऽप्राप्तिः। अतएव

(क्रमशः.................)

पात्तम् । अन्यथा' सुगल्फशब्दात्, शिखशब्दाच्च ङीषः स्वाङ्गान्तत्वादापत्तिः स्यात् ।

---

भाष्ये 'अशिखा' इत्येव प्रत्युदाहृतम् । 'सहनञ्' (4 1·57) इति निषेधस्तु न शङ्क्य. ।

'अस्यशिखा, इति षष्ठीसमासे नमो भावात् । नच बहिरङ्गसमासात्प्रागेवान्नन्तत्वात् टापि अदन्तत्वाभावान् ङीषोऽप्राप्ति, "उपसंजनिष्यमाणनिमित्तो प्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते' न्यायेन पूर्वमपि टापोऽप्राप्तेः स्त्रीत्वविवक्षयां शिखाशब्दस्योणादि निष्पन्नत्वेन गतिकारकेति परिभाषया सुबुत्पत्तेः प्रागेव समासेन ङीष एव पूर्वं प्राप्तेश्चेत्याहुः ।

वस्तुतस्तु 'उपसंजानिष्यमाण' न्यायेनोत्सर्गशास्त्रीयोद्देश्ये विशेष्य विशेषण भावापन्नापवादशास्त्रीयोद्देश्यतावच्छेदकपर्यादयधिकरणातिरिक्तत्वेनैव संकोचो न त्वपवाद शास्त्रीयोद्देश्य घटकातिरिक्तत्वेन । अन्यथा 'व्याघ्री' इत्यादौ जातिवाचक व्याघ्रशब्दघटकध्र शब्दातिरिक्तत्वेन 'अजाद्यतः' इत्युत्सर्गशास्त्रे संकोचे टापोऽप्राप्त्या 'गतिकारक' इति परिभाषा फलदानपरभाष्यासंगतिः, 'अजये इन्द्रम् खट्वाक्रीती' इत्यादौ गुणटापोरनापत्तिश्च स्यात् । नित्य स्त्रीलिङ्गे शिखादौ सुशिखेति समासतः प्राक् स्त्रीत्वविवक्षायां न मानम् । अतः 'अशिखा' 'सुशिखा' इत्याबन्तङ्गत्वात् समासतः पूर्वमेव टापि अदन्तत्वाभावादेव ङीषोऽप्राप्तिरिति शिखा इत्येव प्रत्युदाहरणमुचितमिति भट्टनागेशानुयायिनो वदन्ति ।

ननु 'अस्वाङ्गपूर्वपदात्' (4 1·53) इत्यनुवृत्या 'कल्याणपाणिपादा' इत्यादौ ङीष् वारणपरभाष्यविरोधस्त्वन्मते 'शिखा' इत्यस्य अस्वाङ्ग पूर्वपदात्परत्वस्याभावेन 'अस्वाङ्पूर्वपदात्' (4·1·53) इत्यस्या ननुवृत्तेरिति चेन्न, वक्ष्यमाणदिशा भाष्यविरोधाभावात् । तथाहि—बहुव्रीहिपदानुवृत्त्यैव शिखा इत्यादौ ङीष् व्यावृत्तिं मनसि निधाय उपसर्जनग्रहणं यानप्रातिपदिकान् ङीष चिकीर्षितस्तन्निरूपितोपसर्जनत्वविशिष्ट स्वाङ्गवाचकान्तात् प्राति-

(क्रमशः……… ….)

अत्र यदि स्वस्य = अवयीभूतस्य अङ्गं स्वाङ्गत्युच्यते तर्हि 'सुमुखा-शाला' इत्यत्रातिव्याप्तिः; मुखशब्दार्थोयत्र प्रथमभागः अवयवीभूतशालाङ्गम्। किंच'सुकेशीरथ्या' इत्यत्राव्याप्तिः, नहि केशारथ्याङ्गानि । अतोऽत्रसूत्रे —'अद्रवं-मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् अतत्स्थं तत्र दृष्टं च, तेन चेत्त तथायुतम्' इति भाष्ये त्रिधानिरुक्तं पारिभाषिकं स्वाङ्गं गृह्यते । तत्र —'अद्रवंमूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्' इति प्रथमेस्वाङ्गलक्षणे ।

अत्र 'अद्रवमित्यस्य'—

द्रवणं द्रवः 'द्रु गतौ' इत्यस्यादप्प्रत्यये द्रवः, नास्तिद्रवोयस्येत्यर्थः । यद्वा द्रववतीति—द्रवम् पचाद्यच् न द्रवमद्रवम् = स्पन्दरहितम्, इत्यर्थः । तेन शोभनः स्वेदो यस्याः सा 'सुखेदा' अत्र न ङीष् स्वेदो धर्मनो जल प्रसवः 'मूर्तिम' दितत्यस्य मूर्तिः = अवयव संयोगः सोऽस्यास्तीत्यर्थः । यद्वा स्पर्शवन्ति यानि द्रव्याणि पृथि-व्यप्ते जीवायुरुपाणि, तेषां यत्परिच्छिन्न परिमाणं सा मूर्तिः सा अस्य स्तीत्यर्थः ।

---

पदिकान् ङीषित्यर्थसम्पादन द्वारा 'कल्याणपाणिपादा' इत्यत्र पादरूप स्वाङ्गस्योपसर्जनत्वाभावेन (पाणिपाद समुदायस्योपसर्जनत्वेऽपि स्वाङ्गवाचकत्वाभावेन च ङीष् व्यावृत्तिरूपं फलमुपसर्जनग्रहणस्या-भिधायपुनः स्वङ्गपूर्वपदादित्यस्यानुवृत्या तत्फलं निरस्य निष्केशी-यूका, अतिकेशीमाला, इति उपसर्जनग्रहणस्य फलमुक्तम् । तत्फलस्य 'बहुव्रीहेः इत्यस्यानुवृत्यैव सिद्धया उपसर्जनात् किं ? शिखा इत्युक्तं भाष्ये ।

तथा च बहुव्रीहेरित्यस्यानुवृत्तिपक्षे 'कल्याण पाणिपादा' इत्यादौ दोषवारणाय स्वाङ्गपूर्वपदादित्यस्यानुवृत्ति भाष्यकारा-भिमता । अनुवृत्तौ तु यानप्रातिपदिकान् ङीष् चिकीर्षित इत्याद्यु-क्तार्थसंपादनेनैवोपसर्जनग्रहणस्य चारितार्थ्यंभाष्याभिमतम् ।

नचैवमुपसर्जनग्रहणस्य प्रत्युदाहरणं 'कल्याणपाणिपादा' इत्येव वक्तुमुचितं न शिखेति वाच्यम्, 'उपसर्जनात् किं 'शिखा' इत्यस्यैव भाष्ये प्रथमोपात्ततया तदनुरोधेनैव वैयाकरणसिद्धान्तकौमु-द्याम्उपसर्जनात् किं शिखा इत्युक्तेः । यद्यपि कर्णनासिकादिविशिष्टे शिर आदौ स्वाङ्गत्व व्यवहारो लोकसिद्धस्तथापि स्वाङ्गत्वव्याप्य-करत्वपादत्वादिरूपेण शक्तस्यैव स्वाङ्गवाचक शब्देनात्र ग्रहणं भाष्यभिमतामिति न कोऽपि दोषः ।

तेन 'सुज्ञाना' इत्यत्र न ङीष् ज्ञाने वयवसंयोगाभावात्। प्राणिस्थ 'मित्यस्य प्राणवति 'समुखा' शालेति द्वारदेशरूपावयवस्य प्राणिस्थत्वाभावान्न ङीष्। अविकारज मित्यस्य रोगादि विकाराजन्येमित्यर्थः। अतः शोभनः शोफो यस्या सा सुशोफे' त्यत्र न ङीष्। शोफस्तु श्वयथुः शोथ' इत्युक्तः तस्य वायवादिविकारजन्मत्वात्।

द्वितीयं स्वाङ्गलक्षणम्—'अतस्थं तत्र दृष्टं चे' ति। अत्र तत्पदेन प्राणीपरामृश्यते। अतत्स्थम् = अप्राणिस्थं तत्र = प्राणिनि दृष्टं यत् तदपि प्राणिनी ङ्गम्। एतेन तेन 'सुकेशी, 'सुकेशा' रथ्या अप्राणिस्थत्वेऽपि प्राणिनि दृष्टत्वात्स्वाङ्ग प्रयुक्तं कार्यं भवति।

तृतीयं स्वाङ्गलक्षणम्—'तेन चेत्तत्तथायुतम्' इति। अत्र भाष्ये स्वाङ्-ग प्राणिनोऽपि' इति शेषः पूरितः। चेदिति यद्यर्थे। तेन प्राणिस्थेन स्तनाद्यङ्गाकृतिकावयव विशेषेण तत् अप्रमाणिद्रव्यं प्रतिमादि तथा प्राणिद्रव्यवत् युतं सम्बद्धं यदि, तदा [तत् स्तनाद्याकृतिकम् अप्राणिनोऽपि स्वाङ्ग-मिति लक्षणार्थः। तेन सुशोभनौ स्तनो स्तनाकृती अवयवौ यस्या इत्यर्थे 'सुस्तनी, सुस्तना वा प्रतिमा' इत्यत्र स्वाङ्गान्तत्वाद् वैकल्पिको ङीष् सिद्धयति। प्रतिमागतयोः स्तनाकृतिकावयवयोः कदाचिदपि प्राणिस्थत्वाभावात् प्राण्यन्तरे अदृष्टत्वाच्च पूर्वलक्षणद्वयं हि नात्र संघटत इति तृतीयमपि लक्षणमावश्यकमेव।

अनेन कल्याणपाणि पादेति बहुव्रीहावपि ङीषापत्तिस्तु न शङ्कया, यतः 'अस्वाङ्गपूर्वपदाद्वा' इतीहाप्यनुवर्तते। अत्रहि पाणिपादेति समुदायो न स्वाङ्गम्, किन्तु स्वाङ्गसमुदाय एव। यत्तु स्वाङ्गं पादेति, न तु तत् अस्वाङ्गपूर्वपदात्परम्, पाणिपदेन व्यवधानात्। तथाच—स्वाङ्गस्य पादस्य अस्वाङ्गात्पूर्वपदात् कल्याण शब्दात् परत्वाभावान्न ङीषित्यवधेयम्।

ङीष् प्रत्यय विधायकमेकविंशतितमं सूत्रम्—

"शोणात्प्राचाम्" (4·1·44) इति।

"शोणः कोकनदच्छविः" इत्यमरात् शोणः रक्तोत्पलवर्णः। इति वर्ण वाचित्वात् "वर्णानां तण" इत्याद्युदात्तत्वेनानुदात्तत्वात् तोपधभिन्नत्वाच्च "अन्यतोङीष्" (4·1·40) इति नित्य ङीषि प्राप्ते विकल्पार्थमिदं सूत्रम्। प्राचां मते स्त्रियां शोण शब्दान् ङीष् स्यादिति सूत्रार्थः। "शोणी" इत्युदाहरणमस्य अन्यमते टाबेवेति 'शोणा' इति।

ङीष् प्रत्यय विधायकं द्वाविंशतितमं सूत्रम्—
'षिद्गोरादिभ्यश्च' (4·1·41) इति।

अत्र अनुपसर्जनादिति, प्रातिपदिकादिति स्त्रियामिति चाधिक्रियते ङीषिति चानुवर्तते। ष इद्येषां ते षितः गौर आदिर्येषां ते गौरादयः। षितश्च गौरादयश्चेतीतरेतरद्वन्द्वः। तथा च—'अनुपर्जनेभ्यः षिद्भ्यो गौरादिभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीषिति सूत्रार्थः।

'नर्तकी'[1] 'गौरी'[2] इत्यादीनिचास्योदहरणानि।

1. 'नृती गात्रविक्षेपे इत्यतः शिल्पिनिष्वुन' (3·2·145) इति ष्वुन प्रत्यये 'षः प्रत्ययस्य' (1·3·6) इति षस्येत्वे लोपे च 'युवोरनाकौ' (7·1·1) इति वु शब्दस्याकादेशे लघूपधगुणे 'नर्तक' इत्यतः ङीषि अलोपे 'नर्तकी' इति रूपं सिध्यति।

2. 'अवदातः सितौ गौरः (अम. 1·5.13) इति कोशाद गौर शब्दस्य वर्णवाचित्वे तोपधभिन्नत्वेऽपि फिट सूत्रेणान्तोदान्ततया 'अन्य था ङीष्' इति। ङीषोऽप्राप्तौ गौर शब्दस्य गणे पाठः, गौरशब्दात् ङीषिरूपमिदम्। उमाकात्यायनीगौरी, इत्यमरात् 'पञ्चवर्षा-भवेदगौरी' इति स्मृतेश्च पावर्तती, पञ्चवर्ष वयस्का कन्या वा तदर्थः।

ङीष् प्रत्यय विधायकं प्रथमं—वार्तिकम्[1]—'अर्यक्षत्रियाभ्यां वा स्वार्थे' (4·1·49) इति। अत्र स्वार्थे इत्यस्य 'प्रातिपदिकार्थे' इत्यर्थः। प्रातिपदिकार्थोऽत्र जातिविशिष्टा व्यक्तिः।

तथा च—जातिविशिष्टायांव्यक्तौ अर्यशब्दात् क्षत्रिशब्दाच्च स्त्रियां ङीष् प्रत्ययः तत्सन्नियोगशिष्टः आनुगागमश्चस्त्रियां वा भवतीति वार्तिकार्थः।

---

1. अम० 1 का० 5 व० 13 श्लो०

1. 'इन्द्र वरुणभव शर्वरूद्र मृडहिमारण्य यवयवन मातुलाचार्याणामानुका' (4·1·49) इति सूत्रस्थमित्यर्थमिति शेषः।

'अर्य्याणी'[2] 'अर्य्या'[3] 'क्षत्रियाणी'[4] 'क्षत्रिया'[5] इति चास्योदाहरणानि सन्ति। पुंयोग 'अर्यी'[1] 'क्षत्त्रियी'[2] इत्यत्र वा ङीषः तत्सन्नियोगशिष्टस्य आनुगागमस्य चाभावायस्वार्थे इत्युक्तम्।

ङीष् प्रत्यय विधायकं—द्वितीयं—वार्तिकम्[3]—'आचार्यादणत्वञ्च' (4·1·49) इति।

'इन्द्रवरुणभवशर्वरुद्रमृड्हिमारण्ययवयवनमातुलाचार्याणामानुक्' (4·1·49) इति सूत्रे विहितः अनुगागमः ङीष् अणत्वञ्च, आचार्य शब्दात् पुंयोगे स्यादिति वार्तिकार्थः। यतोऽत्र 'च' शब्दो ङीषः आनुकश्च अनुकर्षणार्थकः।

---

2. 'ऋगतौ' (ज.प.अ. 1123) इत्यतः 'अर्यः स्वामिवैश्ययोः (3·1·103) इति ण्यतो पवादो यत् गुणश्च तथा च अर्यशब्दः स्वामिवैश्ययो रूढ़। ततोस्त्रियां वा ङीषि आनुगागमेणत्वे स्वादिकार्ये च कृते रूपमिदम्। 'स्वामिनी' 'वैश्या' वा तदर्थः।

3. स्वार्थे ङीषः आनुगागमस्यश्चाभावे रूपमिदम्। स्वामिनी वैश्यावा-तदर्थः।

4. क्षत्रस्यापत्यं जातिः इत्यर्थे 'क्षत्राद्घः' (4·1·138) इति घ प्रत्यये इयादेशे अलोपे तस्मात् स्वार्थे स्त्रियां ङीषि तत्सन्नियोग शिष्टे आनुगागमेणत्वे स्वादि कार्ये च कृते रूपसिदम्। 'क्षत्रियत्व जाति विशिष्टा' इति तदर्थः।

5. स्वार्थे ङीषः आनुगागमस्य चाभावे रूप मिदम् 'क्षत्रियत्व जाति विशिष्टे'ति तदर्थः।

1. अर्य शब्दात् अर्यस्य स्त्री इत्यर्थे 'पुंयोगादाख्यायाम् (4·1·48) इति स्त्रियां ङीष् अलोपे स्वादिकार्ये च कृते रूपमिदम्। 'वैश्यस्य स्वामिनो वा स्त्री' इति तदर्थः।

2. क्षत्रियस्य स्त्री इति तदर्थः पुंयोगे क्षत्रिय शब्दात् 'पुंयोगादाख्यायां' (4·1·49) इति ङीषि अलोपे स्वादिकार्ये च कृते रूपमिदम्।

3. 'इन्द्रवरुण भवशर्वरुद्रेत्यादि सूत्रस्थमिति शेषः।

'आचार्यानी'[1] इति चास्योदाहरणम्, 'आचार्या'[2] इति चास्य प्रत्युदाहरणम्।

ङीष् विधायकं तृतीयं— वार्तिकम्[3]— 'उपमानात्पक्षाच्चपुच्छाच्च' (वा. 4·1·55) इति उपमानवाचकात् परः यः पक्ष शब्दः पुच्छ शब्दो वा तदन्तात् स्त्रियां नित्यं ङीषिति वार्तिकार्थः। पक्षांशे नित्यविधिः 'पुच्छांशे' 'पुच्छाच्च' इत्यस्य बाधक मिदम्। 'उलूकपक्षी[1] शाला उलूकपुच्छी[2] सेना' इति चास्योदाहरणे स्तः।

---

1. 'आङ् पूर्वकात् चरेः 'चरेराङि·चागुरौ' (वा. 3·1·100) इति वार्तिकेन गुरौ मतौ निषेधात् आङ्युपपदे चरेर्गुरौ 'ऋहलोर्ण्यत्' (3·1·124) इति ण्यति 'अतउपधायाः' (7·2·116) इति वृद्धौ आचार्य शब्दः निष्पद्यते तस्य च गुरुरित्यर्थः। यतः—

   'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।
   सकल्पं (यज्ञविद्या) सरहस्यं (उपनिषत्) च तमाचार्य्यं प्रचक्षते ॥
   एकदेश तु वेदस्य वेदाङ्गान्यपि वा पुनः।
   योऽध्यापयति वृत्यर्थमुपाध्यायः स उच्यते ॥
   निषेकादीनि कर्माणि यः करोति यथाविधि। मनु. 2/141 श्लोकः
   सम्भावयति चान्नेन स विप्रो गुरुरूच्यते ॥ इति श्रूयते।
   (मनु. स्मृ. 2/140/42. ततः आचार्य शब्दात् पुंयोगे ङीषि
   आनुगागमे अणत्वे स्वादिकार्ये च कृते रूपमिदम्।
   आचार्यस्य स्त्री इति तदर्थः।

2. वार्तिकमिदं स्वार्थे पुंयोगे एव प्रवर्तते अतः पुंयोगाभावे दन्तत्वात् टापि रूपमिदम्। स्वयं व्याख्यात्रीतितदर्थः।
   व्याख्यात्रीत्यस्य धर्मोपदष्ट्रीत्यर्थः। तथा च स्मृतिः
   'यस्माद्धर्मानाचिनोति सोऽपि आचार्यः इति।

3. 'नासिकोदरौष्ठ जङ्घादन्तर्ण शृङ्गाच्च' (4·1·55) सूत्रस्थ मिति शेषः।

1. उलूकपुच्छ शब्दात् ङीषि अकार लोपे रूपमिदम्। अत्रहि उलूक पदम्, उलूक पक्ष सदृशे लाक्षणिकम्। तथा च उलूक पक्षाविव पक्षौ पार्श्वे यस्याः सेति तदर्थः।

(क्रमशः..............)

ङीष् विधायकं चतुर्थं—वार्तिकम्[3]—'कबरमणिविषशरेभ्योनित्यम्' (वा. 4·1·55) 'कबर, मणि, विष, शर, शब्देभ्यो व्यवहित परो यः पुच्छशब्दः तदन्तात्प्रातिपदिकात् स्त्रियांनित्यं ङीषिति वक्त व्यमिति वार्तिकार्थः। 'पुच्छाच्च' इति विकल्पस्यापवादः वार्तिकमिदम्।

'कबरपुच्छी'[1] 'मणिपुच्छी'[2] 'विषपुच्छी'[3] 'शरपुच्छी'[4] इत्यादीनि चास्योदाहरणानिसन्ति।

ङीष् विधायकं पञ्चमं वार्तिकम्[5]—'जातिपूर्वादिति वक्तव्यम्' (वा. 4·1·52) इति।

---

'सप्तम्युपमान पूर्वपदस्यबहुव्रीहिर्वाच्य, उत्तरपदलोपश्च' इति समासः। तथाचोक्तम्—

'पक्षोमासार्धकेपार्श्वे ग्रहे साध्य विरोधयोः।
केशादेः परतो वृन्दे बले सखिसहाययोः।
चुल्लीरन्ध्रे पतत्रे च राजकुजन पार्श्वयोः'॥ इति।
(मेदिनीकोशे षान्तवर्गः श्लोकः 18-19 पृ. 166)

2. उलूक पुच्छशब्दात् नित्यं ङीषि अकार लोपे रूपमिदम्।
उलूके पूच्छमिव पुच्छः पश्चिमान्त भागो यस्या सति तदर्थः। सेनायां हि पुच्छ शब्देन तस्याश्चान्त भागोगृह्यते सच पुच्छाकारः।

3. 'नासिकोदरौष्ठजङ्घा दन्तकर्णशृङ्गाच्च' (4·1·55) इति सूत्रस्थमितिशेषः।

1. कबरपुच्छ शब्दात् नित्यं ङीषि रूपमिदम्। कबरश्चित्रं पुच्छं यस्याः सेति तदर्थः अर्थान् मयूरी।

2. मणिपुच्छ शब्दात् ङीषि अकार लोपे रूपमिदम्। मणिःपुच्छे यस्याः सेति तदर्थः मणिपुच्छ शब्दात् ङीष् अकार लोपे रूपमिदम्।

3. विष पुच्छ शब्दात् ङीषि अकार लोपे रूपमिदम्।
विष पुच्छे यस्याः सेति तदर्थः।

4. शरपुच्छ शब्दात् ङीषि अकार लोपे रूपमिदम्।
शरः पुच्छे यस्याः सेति तदर्थः।

5. 'बहुव्रीहेश्चान्तोदात्तात् (4·1·52) सूत्रस्थमितिशेषः।

'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52) इत्यनेन बहुव्रीहेः क्तान्ता दन्तोदात्तादन्तात्स्त्रियां ङीष् विहितः, सच ङीष् जातिपूर्वादिब भवतीति वार्तिकार्थः। 'ऊरुभिन्नी'[6] चास्योदाहरणम्। यतोऽत्र वार्तिके जातिपदेन 'आकृतिग्रहणाजातिः' इति लक्षणलक्षिता जातिर्गृह्यते, सा च जातिः ऊर्व्यां विद्यते। अतोऽत्र जातिपूर्वत्वात् ङीष् सिध्यति। अस्य वार्तिकस्य प्रत्युदाहरणम्, बहुक्रीता[1], 'अक्रीता'[2], 'सुक्रीता'[3], 'मासयाता'[4], 'सुखयाता'[5], दुःखयाता'[6] इति। अत्र क्रमशः 'जातिकालसुखादिभ्यो नाच्छादनात् क्तो कृतमितप्रतिपन्नाः' (6·2·170) इति बहोर्नञ्वदुत्तरं पदभूम्नि (6·2·175) इत्येतेभ्यः क्तान्त बहुव्रीहेः अन्तोदात्तत्वं विहित मिति जातिपूर्वादिति 'वार्तिकस्याभावे 'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52) इतिविहितो ङीष् दुर्वारः स्यात्। वार्तिकारम्भेतु जातिपूर्वत्वाभावात् बहुनञ्सुकाल सुखादिपूर्वेभ्यः एभ्य, स्त्रियां ङीषोऽभावतः सिध्यति।

ङीष् प्रत्यय विधायकं षष्ठं—वार्तिकम्[1]—'नीलादोषधौ' (वा. 4·1·42) इति। 'जानपदकुण्डगोणस्थलभाजनागकाल नीलकुशकामुककबराद् वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' (4·1·42) इति सूत्रेणाच्छादनेऽपि नील शब्दात् विहितोङीष् औषधिरूपेऽर्थे स्त्रियां भवति न सर्वत्रेति वार्तिकार्थः।

---

6. उरुभिन्नो असंयुक्तोयस्याः सेत्यर्थः। अत्र 'निष्ठा' (2·2·36) इति भिन्न शब्दस्य पूर्वनिपातस्तु न शङ्क्यः। यतः 'जातिकाल सुखादिभ्यः परानिष्ठा वाच्या' (वा. 2.2.36) इत्युक्तम्।

1. बहवः क्रीताः यया सेत्यर्थः। जातिपूर्वत्वाभाबात् ङीषोऽभावे बहुपूर्वात् क्रीत शब्दात् टाबेव भवति।

2. न क्रीतः यया सेत्यर्थः। जातिपूर्वत्वाभावात् ङीषोऽभावे अक्रीत शब्दात् स्त्रियां टाबेव भवति।

3. सुक्रीतः यया सेत्यर्थः। जातिपूर्वत्वा भावात् ङीषोऽभावे सुपूर्वात् सुक्रीत शब्दात् टाबेव भवति।

4. मासः यातो यस्याः सेत्यर्थः। जातिपूर्वत्वाभावात् ङीषोऽभावे काल पूर्वात् स्त्रियां टाबेव भवति।

5. सुख यातं यस्याः सेत्यर्थः, जातिपूर्वत्वाभावात् ङीषोऽभावे सुखपूर्वात् यात शब्दात् टाबेव भवति।

(क्रमशः....... ....)

'नीली'[2] इति च तदुदाहरणम् ।

ङीष् प्रत्यय विधायकं सप्तमं—वार्तिकम्[3]—'पाणिगृहीतीभार्यायाम्' (वा. 4·1·52) इति । 'विधिवदूढा भार्या' तस्यां विद्यमानादेव पाणि गृहीत ङीषिति वार्तिकार्थः। 'पाणिगृहीती' इति चास्योदाहरणम् । अत्र भार्यायामित्युक्तिः विधि-वेनदनूढा पाणिगृहीता इत्यत्र ङीषोऽभावाय ।

ङीष् प्रत्यय विधायकं अष्टमं वार्तिकम्[1]—'पुच्छाच्च' (वा. 4·1·55) इति । उपसर्जनीभूत पुच्छ शब्दात् स्त्रियां वा ङीषिति वक्तव्यमिति वार्तिकार्थः । 'सुपुच्छी'[2], 'सुपुच्छा'[3] इति चास्योदाहरणेस्तः ।

---

6. दुखं यातं यस्या सेत्यर्थः, जातिपूर्वत्वा भावात् ङीषोऽभावे दुखपूर्वात् यात शब्दात् टाबेव भवति ।

1. 'जानपदकुण्डेत्यादि सूत्रस्थमिति शेषः ।

2. औषधि विशेषवाचकात् नील शब्दात् ङीष् । नीली औषधिः, लोके नील पद वाच्येत्यर्थ-, नतु 'नील्यारक्ता शाटी' इत्यर्थः ।

   'नीला रक्ता शाटी इत्यर्थे तु न ङीष् आच्छादनत्वात् अनोषधिक त्वाच्च । तस्मात् शाटी इत्यर्थे न नील शब्दात् ङीष् किन्तु टाबेवेति नीलाइत्येव प्रयोक्तव्यम् ।

3. 'बहुव्रीहेश्चान्तोदात्तात्' (4·1·52) इति सूत्रस्थमितिशेषः ।

4. विवाह काले विधिवत् पाणिगृहीतो यस्या इति विग्रहः, 'भार्या' इति चार्थः ।

5. यथाकथञ्चित् पाणिगृहीतो यस्या इति विग्रहः, दासी इति च तदर्थः ।

1. 'नासिकोदरोष्ठ जङ्घादन्तकर्ण शृङ्गाच्च' (4·1·55) इति सूत्रस्थ मिति शेषः ।

2. पुच्छ शब्दान्तात् सुपुच्छ शब्दात् ङीपिरूपम् । शोभनं पुच्छं यस्याः सेति तदर्थः ।

3. ङीषो भाव पक्षे 'सुपुच्छा' इति टापि सवर्णदीर्घे रूपम् ।

ङीष् प्रत्यय विधायकं नवमं—वार्तिकम्[4]—'प्राणिनि च' (4.1.42) इति ।

'जानपद कुण्ड गोणस्थलभाजनागकाल नील कुश कामुक कबराद् वृत्यमत्ता वपनाकृत्रिमाश्राणास्थौल्य वर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' । (4.1.42) इत्यनेन विहितोङीष् श्रौषधौ प्राणिनि चैव स्यात् नतु अन्यत्रेति वार्तिकार्थः । 'नीलीगौः'[5] इत्युदाहरणम् । नीला कुण्डीति च प्रत्युदाहरणम् ।

ङीष् प्रत्यय विधायकं दशमं वार्तिकम्[6]—'मातुलोपाध्याययोरानुगवा' (वा0 4.1.49) इति । मातुलोपाध्यायाभ्यां पुंयोगे योङीष् विहितम् तत्सन्नियोगेनानयोर्वानुगागमे । भवतीति वक्तव्यमिपि वार्तिकार्थः ।

उपाध्यायस्य अप्राप्तौ ङीषानुगागमे मातुलस्य तु 'इन्द्रवरूणभवशर्वरूद्रमृड हिमारण्य यवयनमातुलाचार्याणा मानुक्' (4·1·49) इति सूत्रेण नित्यं प्राप्त आनुगमोवाविधीयते, ङीष् तु सूत्रेणैव सिद्ध इत्यवधेयम् । 'मातुलानी'[1] 'मातुली'[2] 'उपाध्यायानी'[3] 'उपाध्यायी'[4] इति चास्योदाहरणानि सन्ति । यातु वृत्यर्थं स्वयमध्यापयति, तस्याः कृते 'उपाध्याया' उपाध्यायी, इत्यभयं साध्विति वक्ष्यते ।

---

4. 'जानपदकुण्डेत्यादिसूत्रस्थमिति शेषः ।
5. प्राण्यर्थे नील शब्दात् ङीष् ।
6. प्राणित्वाभावादत्र न ङीष् किन्तु टाव ।
7. 'इन्द्र वरुणेति सूत्रस्थ' मिति शेषः ।

1. 'मातुर्भ्राता मातुलः तस्य स्त्री 'इत्यर्थे मातुल शब्दात् पुयोगे ङीषि वा आनुगागमे अकारलोपे स्वादिकार्ये च कृते रूपमिदम् ।
2. मातुल शब्दात् पुंयोगे ङीषि आनुगागमाभावे रूपमिदम । मातुलस्य स्त्री-पुत्री वा तदर्थः । यतः पुंयोग इत्येनेन जन्यजनक भाव सम्बन्धोऽपि विवक्षितः, नतु दाम्पत्य लक्षण एवेति ।
3. 'उपाध्यायानी' 'उपाध्याया' भृतकाध्यापकः उपाध्यायःतस्य स्त्रीत्यर्थः तदुक्तम्—

   'एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
   योध्यापयति वृत्यर्थमुपाध्यः स उच्यते ।। इति ।
   (मनु स्मृ 2/41) स्त्रियामपाध्यायत् ङीषि वा आनुगागमे स्वादिकार्ये च कृते रूपमिदम् ।

4. उपाध्याय शब्दात् पुंयोगे ङीषि अनुगागम भावपक्षे रूपमिदम् ।

ङीष् प्रत्यय विधायकमेकादशं वार्तिकम्[5] 'मुद्गलाच्छन्दसि' (वा0 4·1·49) इति । अत्र चकारेण ङीषानुकोः समुच्चयः । तथा च ''मुदगलशब्दात् स्त्रियां ङीष् प्रत्ययः तस्य आनुगागमः लित्वं च छन्दसिस्या''दितिवार्तिकार्थः । 'रथीरभून्[1] मृद्गलानी' इति चास्योदाहरणम् ।

ङीष् प्रत्यय विधायकं द्वादशं वार्तिकम्-'यवनाल्लिप्याम्' (वा0 4·1·49) इति । 'इन्द्रवरूणेति यवन शब्दाद् विहितः आनुगागमः ङीष् च लिप्यर्थे भवतीति वार्तिकार्थः । 'यवनानी इति चास्योदा हरणम् ।

ङीष् प्रत्यय विधायकं त्रयोदशं वार्तिकम्[4] 'यवाद्दोषे' (वा0 4·1·49) इति । यव शब्दात् 'इन्द्रवरूणेत्यादिना विहितः आनुगागमः ङीष् दोषेऽर्थे भवतीति वार्तिकार्थः । 'यवानी'[5] इति चास्योदाहरणम् ।

---

5. 'इन्द्रवरुण भवशर्वरूद्रमृऽहिमारण्ययवयवनमातुलाचार्याणामानुक्' (4·1·49) इति सूत्रस्थमिति सेषः ।

1. मृद्गल शब्दात् ङीषि आनुगागमे सवर्णदीर्घे स्वादिकार्येषु कृतेषु आनुकोलित्वात् 'लिति' (6·1·293) इति आनुगाकारस्योदात्तत्वे च रूपमिदम् ।

2. 'इन्द्रवरूणभवशर्वरुद्रमृडहिमारण्य यवयवनमातुलाचार्याणामानुक्' (4·1·49) इति सूत्रस्थमिति शेषः ।

3. युधातोः नन्द्यादित्वात् 'नन्दि्ग्रहिपचादिभ्योल्युणिन्यचः (3·1·134) इति ल्यु प्रत्ययेयोरकादेशे यवन शब्दः । म्लेक्षः लशुनप्रियः यवनदेश वासीनो वा तदर्थः । यवनानालिपिरित्यर्थे 'तस्येदम्' (4 3·130) इत्यणे बाधका पवनशब्दान् ङीषि आनुगागमे सवर्णदीर्घे स्वादिकार्ये च कृते रूपमिदम् । यवनानां लिपिरिति तदर्थः ।

4. 'इन्द्र वरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (4·1·49) सूत्रस्थमिति शेषः ।

5. यव शब्दात् यवत्वजात्यन्तरवाचकात् यव शब्दात् दोषऽर्थे ङीषि, आनुगागमे च कृते रूपमिदम्, 'दुष्टो ववः इति तदर्थः ।

'जयी' इति लोके प्रसिद्ध । अत्रायमेव दोषयद् यवत्वजातेर-भावेऽपि तदाकारानुकृतिः ।

ङीष् प्रत्यय विधायकं चतुर्दशं वार्तिकम्[1]-'यातु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः' (4·1·49) इति। वार्तिकार्थस्फुटः। उपाध्याय शब्दस्य पुंयोगे ङीष् आनुगागमश्च प्रागुक्तौ। पुंयोगाभावपक्षे टाबेव स्यादिति भ्रमवारणाय वार्तिक मिदमारब्धम्। 'उपाध्यायी'[2] 'उपाध्याया'[3] इति चास्योदाहरणस्तः।

ननु 'स्त्री शूद्रौ ना धीयेताम्' इत्यादयुक्तेः स्त्रीयाऽऽध्ययने एवाधिकारो नास्ति, अध्यापनतु दूरापास्तमिति चेत् न।

'पुरायुगेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां साविती वचनं तथा॥ इति

स्मृत्यानुसारेण यातु स्वयमेवाध्यापिका इत्युक्तेः। किञ्चाधिकाराभावेऽपि यदि काचन अध्यापयेत् तदा कीदृशः प्रयोगः प्रयोक्तव्यः इत्यभिप्रायेण 'यातु स्वयमेवे युक्तिः संगच्छते। यदि तु 'स्त्रीशूद्रौ नाधीयेताम्' इति ''यथेमा' वाच कल्याणी-मावेदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शुद्रायाचार्याय च' (यजु॰ अ॰ 26,2) इत्यत्र च न जनपदं द्विजपर चेति प्रोच्यते तदाध्ययने तयोरनाधिकारः सिद्ध्येत् किन्तु पूर्वोक्त श्रुतौ न दृढं मानम्। अन्ते जनपदं मनुष्यमात्रपरम्। तथा च स्वयमेवा ध्यापन कर्तृत्व वाचकात् उपाध्याय शब्दात् ङीषिरुपमिदम्। ङीषो भावेरूप-मिदम्।

ङीष् प्रत्यय विधायकपञ्चदशं वार्तिकम्[1]-'योपधप्रतिषेधह्यगवय मृन्कय-मनुष्य मत्स्यानामप्रतिषेधः' (वा0 4·1·63) इति। अत्र योपधप्रतिषेधे इति सति

---

1. 'इङ्श्च' (3·3·21) इति सूत्रस्थ भाष्यस्थ वार्तिकमिदम्।

2. 'इङ्श्चेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वाङीष् इति तदेवार्थं दीक्षितः पठति या स्वयमेवाध्यापिका तत्र वा ङीषि इति। उपेत्यऽधीयतेऽस्याः 'उपाध्यायी' उपाध्याया' असत्यस्मिन् वार्तिके 'इङश्च' (3.3.21) इति विहिता घञ्पुरस्तादपवादन्यायेन 'एरच्' (3.3.56) इतिविहितस्याच एवापवादः स्यात्, स्त्रियां तु क्तिन स्या-दिति क्तिनो बाधनायेदं वार्तिकम्। तथा च स्वयमेवाध्यापन कतु त्वाबाचकात् उपाध्यायशब्दात् ङीषिरूपमिदम्।

3. ङीषोऽभावपक्षे टापि रूपमिदम्।

1. 'जातेरस्त्रीविषयादयोपधात्' (वा॰ 4·1·63) सूत्रस्थमितिशेषः।

सप्तमी, 'संख्यायतेकार्य्यमनेनेतिसंख्यान सूत्रं तस्य समीपे इत्यव्ययीभावः । ह्यगवेति पञ्चम्यर्थे षष्ठी । तथा च-सूत्रसमीपे 'ह्यगवयमुकयमनुष्येभ्योङीष् भवतीति वक्तव्य-मिति वार्तिकार्थः । इदं च 'अयोपधादित्यस्य' बाधकम् । एतत् फलितार्थमाह वैया-करण सिद्धान्तकौमुद्यां "योपधप्रतिषेधे ह्यगवयमुकयमनुष्य मत्स्यानाम्प्रतिषेधः ।। इति ।

'हयी'[2] गवयी[3]

मुकयी'[1], 'मनुषी'[2], 'मत्सी'[3] इति चास्योदाहरणानि ।

---

2. 'हि गति वृद्धयोः'(भ्वा. प. अ. 961) इति हि धातो हिनोति शीघ्र-तयागच्छतीत्यर्थे 'नन्दिग्रहिपचादिभ्योल्युणिन्यच' (3·1·134) इत्यचि 'हय' इति ततोस्त्रियां ङीषि 'यस्येति च' (6·4·142) इति अकार लोपः स्वादिकार्यम् । अश्वा इति तदर्थः : तदुक्तं च—

'घोटकेवीतितुरग तुरङगाश्वतुरङ्गमाः ।।
वाजिवाहार्वगन्धर्व ह्यसैन्धवसप्तयः' ।। इति ।
(अ0को0 2/8/43)

3. 'गुङ् गतौ' (भ्वा0आ0अ0 974) इति गुधातोः औणादिके यच् प्रत्यये 'गवय' इति—गो सदशा गलकम्बलरहितोवन्यः पशु विशेषः तदुक्तम् । 'गन्धर्वः शरभौरामः समरोगवयः शशः 'इति (अं0को0 2/5/11) इति । गवय शब्दात् स्त्रियां चतुष्पादजाति विशेषवा-चकात् स्त्रियां ङीष् ।

1. मुकय शब्दात् चतुष्पाज् जाति विशेष वाचकात् ङीष् ।

2. मनुः कश्यपस्य पत्नी तस्या पत्यमित्यर्थे मनु शब्दात् 'मनोर्जाताव यतौषुक् च' (4·1·61) इति यत् प्रत्यये षुगागमे च मनुष्य शब्दः सिध्यति । ततः स्त्रियां ङीषि 'यस्येति च' (6.4.48) इति अकार लोपे 'हलस्तद्धितस्य' (6·4150) इति यकार लोपे स्वादिकार्ये रूपमिदम् ।

3. यद्यपि जलेन हृष्यतीत्यर्थे 'मदी हर्षे' (भ्या0प0से0 817) इति । मद्धातोः 'ऋतन्यञ्जिवन्य च' (उणा04पा02 सू0) निपातनात् यन् प्रत्यये मत्स्य शब्दः ततोङीषि 'मत्स्यस्यङ्या च इति यलोपे स्वा-दिकार्ये रूपमिदम् ।

ङीष् प्रत्यय विधायकं षोडशं वार्तिकम्[4] —'संज्ञायां वा' (वा0 4·1·42) इति। सङ्केत सम्बन्धेन नीलपदवत्वविवक्षायां नील शब्दात् वाङीष् भवतीति वार्तिकार्थः। 'नीली'[5] 'नीला'[6] च तदुदाहरणे। सङ्केतसम्बन्धेन नील वद्वतीत्यर्थः।

ङीष् प्रत्यय विधायकं सप्तदशं—वार्तिकम्[1]—'हिमारण्ययोर्महत्वे' (वा0 4·1·49) इति। हिम शब्दात् अरण्य शब्दाच्च महत्वेऽर्थे ङीष् आनुक् च भवतः इति वार्तिकार्थः। इन्द्रवरूणेति ताभ्यांविहितौ ङीष् आनुक् च पुंयोग एव भवतः इति महत्वे प्राप्तयोस्तयोः विधानार्थं वार्तिकमिदमारब्धम्। 'हिमानी' अरण्यानी इति चास्योदा हरणेस्तः।

ङीष् प्रत्यय निषेधकं प्रथम सूत्रम्—'नक्रोडादिबह्वचः' (4.1·56) इति। क्रोडा आदिर्यस्य, बह्वो चो यस्य क्रोडादिश्च बह्वच्चेति समाहार द्वन्द्वः। तस्मात् अत्र 'द्वन्द्वाच्चुद' (5·4·106) इति टचो भावः समासान्त विधेरनित्यत्वात्। अतएव 'प्रतेरंश्वादयस्तत्पुरुषे' (6.2.196) इति, 'प्रतिराजा' इत्यत्र अश्वादि गणेपाठेनान्तोदातत्वविधानं संगच्छते। अन्यथा 'राजाहः' (4·5·91) इति टचि 'चितः' (6·1·63) इत्यन्तोदात्तत्वसिद्धौ गणे पाठोव्यर्थं एव स्यात्। तथा च 'क्रोडादिरूप' बह्वच् च

---

4. 'जानपदकुण्डगोणस्थल भाजनाग काल नील कुश कामुक कबराद् वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छा केशवेशेषु' (4·1·42) इति सूत्रस्थमितिशेषः।

5. नीलशब्दात् ङीष् सङ्केत सम्बन्धेन नीलपद वतीतितदर्थः।

6. ङीषो भावपेक्ष संज्ञायां नील शब्दात् टाप्।
संङ्केत सम्बन्धेन नीलपद वतीतितदर्थः।

1. 'इन्द्रवरूणभवशर्वरूद्र मृड हिमारण्य यवयवन मातुलाचार्याणामानुक' (4.4.49) सूत्रस्थमितिशेषः।

2. हिम शब्दात् महत्वेऽर्थे ङीषि आनुकि च रूपमिदम्, महत्वयोगेन स्त्रीत्वम् तदभावे तु नपुंसकत्मेव। महद्धिममितितदर्थः। अरण्य शब्दात् महत्वेऽर्थेङीषि आनुकि च रूपमिदम्, महत्वयोगे चास्य।

3. स्त्रीत्वम्, तदभावेनपुंसकत्मेव। महदरण्यमिति तदर्थः।

यत्स्वाङ्गं तदन्तान्ङीष् न स्यादिति सूत्रार्थः । 'कल्याणक्रीड़ा'[4] 'सुजधना'[5] इति चास्योदाहरणेस्तः ।

ङीष् प्रत्यय निषेधकं द्वितीयं सूत्रम्—'नखमुखात्संज्ञायाम्' (4·1·59) इति । अत्र नखमुखरूपस्वाङ्गवाचकान्तात्प्रातिपदिकात् संज्ञायां गम्यमानायां ङीष् नेत्यर्थः । 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (4·1·54) इति प्राप्तस्य ङीषो निषेधः स्यादिति सूत्रार्थः । 'शूर्पणखा'[1] गौरमुखा'[2] 'ताम्रमुखी कन्या' इति चास्योदाहरणानि सन्ति ।

ङीष् प्रत्यय निषेधकं तृतीयं सूत्रम्—'सहनञ्विद्यमानपूर्वाच्च' (4·1·57) इति । अत्र त्रिकपूर्वकात् स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (4·1·24) 'नासिकोदरौष्ठजङ्घादन्त कर्ण शृङ्गाच्च' (4·1·55) इति प्राप्तो ङीष् प्रतिषेधः स्यादिति सूत्रार्थः ।

---

4. कल्याणीक्राडा यस्याः सा कल्याणक्रीड. 'स्त्रीयाः पुवत्' इति पूर्वपदस्य पुंवत्वे उपर्जन ह्रस्वत्वे 'स्वाङ्गाच्चोपसर्जनात्' इति प्राप्तोङीष् निषिध्यते । टापि स्वादि कार्ये च कृते रूपमिदम् ।

5. शोभनं जधनं यस्याः सा 'सुजघना' अत्रबहुवचक क स्वाङ्गात् न ङीष् 'हन्तेशरीरावयवे द्वे च' (उणा0 50 पा032) इत्यप्रत्यये धातोर्द्वित्वे भ्यासकार्ये टापि सुजधना इति ।

1. शूर्पइव नखोयस्या इत्यर्थे बहुव्रीहिः, शूर्पणखा = रावणस्वसा । यत्तु शूर्पाणीव कररूहा यस्याः इत्यस्वपद विग्रहः संज्ञात्वेन नित्य समासत्वादिति, बालमनोरमायामुक्तं तन्न संज्ञयायां नित्यबहुव्रीहे विधायकाभावात् वाक्येन संज्ञाया अप्रतीति मात्रम् ।
'पूर्वपदात्संज्ञायामागमः' (8·4 3) इतिणत्वम् टापि स्वादि कार्ये रूपमिदम् ।

2. गौरंमुखं यस्या इति विग्रहः कस्याश्चिन्नाम । असंज्ञायां गौरमुखी 'गौरमुखा' 'स्वाङ्गाच्चोपसर्जनात्' (4·1·54) इति । वा ङीष् ।

3. ताम्रं मुखं यस्या इति यौगिकोऽयम् । ननु 'नान्दीमुख्योमातरः' इत्य सङ्एत्वात् 'नखमुखात् संज्ञापदेन ऐश्वर सङ्केतातिरिक्तस्य पौरप्रेयस्यैव सङ्केतस्यग्रहणात् । मातृषु च नान्दी मुख शब्दस्य ऐश्वर सङ्केतस्यैव ऐत्वातु, यद्वा नान्दी = कर्मसमृद्धिः सा मुखं प्रदेयंमस्या स्तामातर इत्यर्थेन यौगिकतया संज्ञात्वा भावाच्च ।

'सकेशा'[1] 'अकेशा'[2] 'विद्यमान'[3] नासिका इति चास्योदाहहणानि सन्ति।

ङीष् प्रत्यय निषेधकं प्रथमं वार्तिकम्[4]—खरूसंयोगोपधान्न (वा04.1.44) इति। 'वोतोगुणवचनात्' (4.1.44) इति उदन्तात् "गुणवाचिनो विहितो ङीष् खरूशब्दात् संयोगोपधाच्च शब्दात् न स्यादिति वार्तिकार्थः।

वार्तिकस्यास्य 'खरूः'[1] पाण्डुः[2] इत्युदाहरणेस्तः।

---

1. सहऽशब्दो विद्यमानार्थकः, सह केशा यस्याः सा 'सकेशा' बहुव्रीहौ 'वोपसर्जनस्य' (6·3 82) इति सादेशो न। सादेश वैकल्पिकत्वात् ,सहकेशा' इत्युदाहर्तुमुचितम्। स शब्दे सहत्वारोपे गौरवात्। ङीषः प्रतिषेधे टापि सवर्ण दीर्घे रूपम्।
2. अविद्यमानाः केशा यस्या सेत्यर्थः। स्वाङ्गाच्चेति प्राप्तस्य निषेधः नासिकोदरोष्ठ इति प्राप्तो प्यनेन निषिध्यत इत्युक्तम्। अतोङीषो-निषेधे रूपमिदम्।
3. विद्यमाना नासिका यस्या इत्यर्थे बहुव्रीहिः। ङीषो निषेधे अत्रेदम वधयेम् टापिरूपमिदम्।

   'सहनञ् विद्यमानात्। इत्युच्यमान 'तस्मादित्युन्तरस्य' (1·1·67) इति परिभाषया सहाध्व्यवहितोन्तरं यत्स्वाङ्ग तदन्तान् ङीष् इत्यर्थः। तथासति विद्यमानमुखमस्य विद्यमानमुखः। कल्याणो विद्यमान मुखो यस्या इत्यर्थे कल्याण विद्यमानमुखी-त्यत्र प्रतिषेध आपद्येत, विद्यमान कल्याणमुखेतीष्टश्च न सिध्येत्। पूर्वग्रहण सत्वेतु तस्य समासाद्यवयवे रूढत्वेनोभयं सिध्य-यतीति।
4, 'वोतोगुणवचनात्' (4.1.44) इति सूत्रस्थमितिशेषः।

1. 'खनु धत्तोः' (भ्वा0उ0से09·3) 'खरू शङ,कु' (उणा01/36) इत्यनेन कुप्रत्ययो नस्य रादेशे च कृते निष्पन्नोऽयं खरु शब्द:उकारान्त गुणवाची चास्तीति 'वोतोगुणवचनात्' (4·1·44) इत्यनेन प्राप्तस्य ङीषः निषेधे स्वादिकार्ये च कृतेरूपमिदम्।

   'खरु, इत्यस्त पतिम्बरा कन्येत्यर्थः। तदुक्तम्-निघण्टौ-'पाणि-ग्रहणोत्कण्ठावऽभिधायित्वाद गुणोपसर्जन द्रव्यवाचित्वम्'। किन्तु उत्कन्ठा इच्छेति गुणत्वम्।
2. 'पाड गतो' (भ्वा0अ0से0282) इत्यतः 'मृगय्वादयश्च' (उणा0 (1/37) इत्यनेन कु प्रत्ययस्य वृद्धेश्च नियातनात् इदित्वानुमि इतिप्राप्तस्य ङीषः संयोगोपधत्वात् ङीष् निषेधे स्वादिकार्ये च कृते रूपमिदम्।

ङीष् प्रत्यय निषेधकं द्वितीयं—वार्तिकम्[3]—'जातान्तान्न' (वा04·1·52) इति । जातान्तात् बहुव्रीहेः ङीष् न स्यादिति वार्तिकार्थः ।

'दन्तजाता'[1] इति चाऽस्योदाहरणम् ।

ङीष् प्रत्यय निषेधकं तृतीयं वार्तिकम्[1]—'पालकान्तान्न' (वा04.1.48) इति । पुंयोगेस्त्रियां विहितस्य ङीषः पालकान्तात् निषेधायामारब्धमिदं वार्तिकम् । "पुंसम्बन्धज्ञान प्रयो ज्यस्त्रियां वर्तमाना त्पालकान्तात् न ङीष्" इति वार्किार्थः । 'गोपालिका'[2] इति चास्योदाहरणम् ।

---

3. 'बहुव्रीहेश्चान्तोदात्तात्' (3·1·52) इति सूत्रस्थमितिशेषः ।
4. जातादन्तयस्या सेत्यर्थः । जातान्तात दन्तजातशब्दात् स्त्रिया ङीषो-ऽभावे टपि सवर्णदीर्घे रूपमिदम् । अत्र जातान्तोन्नेति निषेधसामर्थ्यादिव 'निष्ठा' (3·1·2) इति बाधित्वा जात शब्दस्य पूर्वनिपानः ।
1. 'पुंयोगादाख्यायाम्' (4·1·48) इति सूत्रस्थमितिशेषः ।
2. गाः पालयतीत्यर्थे' कर्मन्यण्' (3.2.1) इति कर्मण्युपपदे कर्तरि अण् गोपालकशब्दः निष्पद्यते । गोपालकस्य स्त्रीत्यर्थे गोपालक शब्दात् 'पुंयोगादाख्यायाम्' (4.1.48) इति प्राप्तस्य ङीषः पालकान्तत्वात् निषेधे टापि सवर्णदीर्घे इत्वेस्वादिकार्ये च कृते रूपमिदम् ।

# पंचमोऽध्याय:

(क) ऊकाररूप: स्त्रीप्रत्यय:

अयं च ङकारानुबन्धक: प्रत्यय: एकएवेति—

यथा—सूत्रवार्तिकाक्षरक्रमप्राप्त: ऊङ् प्रत्ययो निरूप्यते । तत्र ऊङ् प्रत्ययविधायकानि सप्त सूत्राणि, चत्वारि वार्तिकानि च सन्ति ।

**ऊङ्प्रत्यय विधायकानि सूत्राणि**

यथा—

(1) ऊङुत:' (4.1.66)

(2) ऊरुत्तरपदादौपम्ये' (4.1.69)

(3) 'कद्रुकमण्डल्वोश्छन्दसि' (4.1.71)

(4) 'पङ्गोश्च' (4.1.68)

(5) 'बाह्वन्तात्संज्ञायाम्' (4.1.68)

(6) 'संज्ञायाम्' (4.1.42)

(7) संहितशफलक्षणवामादेश्च' (4.1.70)

**ऊङ्प्रत्यय विधायकानि वार्तिकानि**

यथा—

(3) 'अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्' (वा0 4.1.66)

(2) 'गुग्गुलुमधुजतु पतयालूनामिति वक्तव्यम्' (वा0 4.1.71)

(3) श्वशुरस्योकाराकारलोपश्च' (4.1.68)

(4) सहितसहाभ्यांचेति वक्तव्यम्' (वा0 4.1.70)

तत्र ऊङ्प्रत्यय विधायकं प्रथमं सूत्रम्—'ऊङुत:' (4.1.66) इति । अत्र 'जातेरस्त्रीविषयादयोपधात्' (4.1.63) इत्यत: 'अयोपधा' दिति,' इतो मनुष्य-जातेरिति, इत्यतोमनुष्यजातेरिति चानुवर्तते, 'उत' इत तद्विशेषगतयातदन्तपरम् ।

तैथाच' – उकारान्तादयोपधान् मनुष्यजातिवाचिनः स्त्रियामूङ् प्रत्ययः स्या' दिति सूत्रार्थः 'कुरु[1]' इति वास्योदाहरणम् ।

अत्र सूत्रे 'अयोपधा' दित्यस्यानुवृत्तिः, 'अध्वर्युः[2] ब्राह्मणी' इत्यत्र ऊङो भावायकृता । तदनुवृत्यभावे तु उकारान्तत्वान्मनुष्यजातिवाचकत्वाच्चात्राप्यूङ् आपद्येत । न च 'अयोपधा' दित्यस्य' अध्वर्युः

ब्राह्मणी' इति प्रत्युदाहरणमसङ्गतं वेदाध्ययने स्त्रिया अधिकार एव नास्तीति शङ्क्यम् । यतस्तस्य' अध्वर्युशाखाध्यायि वंशोदभवा' इत्यर्थः प्रागेवोक्तः' । अथवा; पुरायुगेषुनारीणां मौजी बन्धनमिष्यते । अध्यापनं च वेदानां सावित्रीवचनं तथा ॥' इति यमादि स्मृतिवचनमनुस्मृत्य' अध्वर्युशाखा ध्यायिनीतिदर्थ; चरणत्वाज्जातित्व'मित्युक्तं हि वासुदेवदीक्षितेन । उभयथा नेदं प्रत्युदाहरणमसङ गतमिति निश्चप्रचम् ।

ऊङोङकारानुबन्धः' नोङ धातो'' इत्यत्र विशेषणार्थः । तत्र ङकारानच्चारणेहि' यवाग्वा' इत्यत्रापि स निषेधो दुर्वारः स्यात् । तदुक्तं भाष्ये—''किमर्थोङकारः' ? विशेषणार्थ' । क्व ? विशेषणार्थः ? 'नोङधात्वो' रिति । नो धात्वो' रित्युच्यमाने' यवाग्वा, यवाग्वै' इत्यत्रापि प्रसज्येत' इत्युक्तम् । तथ्यमिदं प्रदीपे स्पष्टीकृतम् ।

'ऊङोदीर्घोच्चारणंतुश्वश्रुशब्दार्थम् । अन्यथा श्वश्रुरशब्दादुङ' श्वंशुरस्योकाराकारलोपश्च' (वा0 4.1.68) इतिविहितः, तत्र ह्स्वे सति'श्वश्रूः, इति दीर्घान्तो न सिद्धेयदित्याहभट्टोजिदीक्षितः ।

---

1. 'कृगोरूच्च' (उ0उ3 1/24) इत्युप्रत्यये अकारस्य उकारादेशे च 'कुरु' इतिशब्दोनिष्पद्यते, अथ कुरोः तपत्यं स्त्रीत्यर्थे कुरु- शब्दात्' ''तस्यापत्यम्'' इत्यणमपवादत्वाद् बाधित्वा ''कुरुनादिभ्योण्यः'' (4.1.170) इति ण्य प्रत्यये' स्त्रियामवन्ति कुरुभ्यश्च' (4.1.176) इति ण्यप्रत्ययस्य लुकि 'गोत्रं च चरणैः सह' इति जातित्वात् ऊङ प्रत्यये सवर्णदीर्घेच कृते निष्पन्नस्य' इत्यस्य प्रत्ययान्तत्वेन अप्रातिपदिकत्वेपि' प्रातिपदिक ग्रपणे लिङगविशिष्टस्यापिग्रहणम्' (परि0शे0परि0 37) इत्युक्तेः सौ रुत्वे विसर्गेचास्यप्रयोगस्यसिद्धिः ।

2. 'अध्वर्युशब्दोहि योपधः । 'अध्वरं यज्ञं याति' इत्यर्थे मृगय्वादयश्च' (उणा0 1/37) इति कुप्रत्यये बाहुलकात् अध्वरशब्दस्य अन्त्यलोपे आलोपेच कृते प्रयोगस्यास्यसिद्धिः । अध्वर्युशाखाध्यायि वंशोद्भवा, अध्वर्युशाखाध्यायिनी वेति तदर्थः ।

अत्र नागेशः यद्यपि "ऊङ्प्रत्ययान्तः श्वश्रूशब्दो भाष्यविरुद्धः। तथाहि— 'ङ्याप्प्रातिपदिकात्' इति सूत्रे ङ्याब्ग्रहणं किमर्थम्? 'प्रातिपदिकात्' इत्येवसिद्धम्? इति प्रश्ने' अप्रत्ययः इति प्रातिपादिके संज्ञा प्रतिषेधः प्रप्नोति, इति समाधाने एवं सति ऊङ्ग्रहणं कर्तव्यम्? इति पुनः प्रश्ने ति प्रत्ययस्य तद्धितत्वात्सिद्धम् इत्युक्तम्। शश्रू शब्दोयद्युङन्तः स्यात्तदात-दर्थमूङ ग्रहणस्यावस्यकत्वेन भाष्ये तदनुक्तत्वेन नूनतापत्तिभाष्यस्यादतो व्युत्पन्नएवश्वश्रू शब्द इति कल्पयते", इत्याह, तथापि दीर्घोच्चारणमत्र प्रश्लेषेण ओकाद्वयविधानद्वारा 'ब्रह्मबन्धुर्यस्ये' ति बहुव्रीहौ' ब्रह्मबन्धू' रित्यत्र परत्वात् प्राप्तस्य कपोनिवृत्यर्थमावश्यकम्, तदुक्तं भाष्ये।

"अथ दीर्घोच्चारणं किमर्थं 'उङतः' इत्येवोच्येत? "का रूप सिद्धिः? "ब्रह्मबन्धूः। धीव बन्धूः[1]। सवर्णदीर्घत्वेन सिद्धम्" न सिध्यति। 'गोस्त्रियोरुपसर्जनस्ये'ति ह्स्वत्व प्रसज्येत। इह च ब्रह्मबन्धू छत्रम्। ब्रह्मबन्धूच्छत्रम्। 'षत्वतुकारसिद्ध' इत्येकादेशस्यासिद्धत्वान्नित्यस्तुक् प्रसज्येत। इह च ब्रह्मबन्धूः। धीव बन्धूरिति। 'नद्दृतश्चे' ति क प्रसज्येत' नैवदोषः— यत्तावदुच्यते' ब्रह्मबन्धूः' धीवबन्धूरिति" 'गोस्त्रियोरूपसर्जनस्येति' ह्स्वत्वंप्रसज्येतेति। उभयत आश्रयणे नान्तादिवत्। यदप्युच्यते-'इह च ब्रह्म बन्धूछत्रं, ब्रह्मबन्धूच्छत्रं षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वान्दित्यस्त क्प्रसज्येते' ति। पदान्त पदाद्यो रेकादेशो सिद्धो नचैष पदान्त पदाद्योरेकादेशः" यदप्युच्यते-ब्रह्मबन्धूः धीव बन्धूरिति न धृतश्चेति-कत्प्रसज्येतेति नद्यन्तानां यो बहुव्रीहि रित्येवं तत् न चैष नद्यन्तानां बहुव्रीहिः शेषलक्षणस्तर्हि क प्प्राप्नोति तस्मादीर्घोच्चारणं कर्तव्यम् इत्युक्तम्। (म0भा0 4.1.66)

ऊङ प्रत्यय विधायकं द्वितीयं सूत्रम्—

'अरूत्तरपदादौपम्ये' (4.1.69) इति। अत्र उरुः उत्तरपदं यस्ये'ति बहुव्रीहिः। 'प्रातिपदिका'दित्यनुवर्तते, उत्तरपदेत्यनेन पूर्वपदमाक्षिप्तम्, 'औपम्ये' इति तत्रान्वेति। उपमीयते अनया' इत्युपमा, उपमानमिति तदर्थः, उपमैव औपम्यम्, स्वार्थे ष्यञ्, स्त्रियामित्यधिकृतम्। तथाच-'उपमानवाचिपूर्वपदमूरुत्तरपदं च यत् प्रातिपदिकं तस्मादूङ स्यात् स्त्रियाःमितिसूत्रार्थ. करभोरुत्वस्याजातित्वात् पूर्वेण ऊङ अप्राप्तौ सूत्रमिदमारब्धम्। 'करभोरुः,' इति चास्योदाहरणम्।

---

1. 'णिबन्धाद्याकनिष्ठं करस्य करभो बहिः' इत्यमरोक्तेः पाणिप्रकोष्ठसन्धिर्मणिबन्धः तमारभ्य कनिष्ठा पर्यन्तं करस्य मांसलो बहिर्भागः करभ इत्युच्यते। करभाविवोरुर्यस्या इत्दर्थे बहु-

क्रमशः....

'सुन्दरोरुः' 'वृत्रोरुः' इत्यादौ ऊङोऽभावायात्र 'औपम्ये' इत्युक्तम् । उत्तरपद ग्रहणं तु पूर्वपदस्याक्षेपार्थं, हस्तिनइव स्वाम्यूरुर्यस्या सा 'हस्तिस्वाम्यूरुः इत्यत्रोङो ऽभावार्थं च । अत्र हि स्वाम्यूरुशब्दस्यैवोत्तरपदत्वं नोरुशब्दस्य ।

ऊङ् प्रत्यय विधायकं तृतीयं सूत्रम्—

'कद्रुकमण्डल्वोश्छन्दसि' (4·1·71) इति । अत्र 'ऊङुतः' (4·1·66) इत्यतः ऊङित्यनुच्च स्त्रियामूङ्स्यात् छन्दसीति सूत्रार्थः । 'कद्रूश्चवैकमण्डलूः' इतीमे च अस्य ऊङ्प्रत्ययस्योदाहरणेस्तः ।

ऊङ् प्रत्यय विधायकं चतुर्थः सूत्रम्—

'पङ्गोश्च (4·1·68) इति । अत्रापि स्त्रियामित्यधिकृतम्' ऊङ्श्चानुवृत्तिः । तथा च 'पङ्गू शब्दात् स्त्रियामूङ्स्या'दिति सूत्रार्थः । 'पङ्गूः' इति चोदाहरणम् ।

ऊङ् प्रत्यय विधायकं पञ्चमं सूत्रम्—

'बाह्वन्तात् संज्ञायां' (4·4·64) इति । अत्र 'स्त्रिया' मित्यधिकृतम् पूर्वसूत्रात् 'ऊङ' इति चानुवर्तते । तथाच—संज्ञायां बाह्वन्तात् स्त्रियामूङ् स्यादिति

---

व्रीहिः । ततः 'करभोरु शब्दात् स्त्रियामूङि स्वादि कार्ये कृते रूपमिदं । अत्र—"करभोरुत्वस्य जातित्वाभावाद् ऊरुत्वस्याकृति ग्रहणत्वेपि करभोरुत्वस्याकृतिग्रहणत्वाभावात्सर्वलिङ्गत्वाच्च । करभोपमोरुरित्यत्रतु न उङ् करभस्योर्वन्तसमासीयपूर्वपदत्वाभावात् करभावस्यसामानाधिकरण्येनोरुपदार्थेन्वयादुपमान् वाचकत्वाभावाच्च । अप्राणिजातेश्च रज्वादीनामुपसंख्यानम् इत्यूङा प्राप्तौ विध्यर्थमिदं सूत्रमित्यवधेयम् ।"

ननु करभोरुरित्यत्र करभ शब्दस्योपमान वाचित्वाभावादुपमयाः कथं प्रतीतिरिवादि शब्दसत्वे एव तत् प्रतीतेरिति चेन्न, सादृश्यान्तर्भावेण वृत्तिस्वीकारादुपमायाः प्रतीतेः । करभोपमोरुरित्यत्र सादृश्याएव समासवाच्यत्वात् प्रतीतिरिति भेदः । उर्वन्तात् इत्येव वक्तव्ये उत्तरपदग्रहणेनपूर्वपदस्याक्षेपाद्यत्रपूर्वपदस्योपमान वाचित्वं तत्रैवास्य प्रवृत्तिश्तचैव च सादृश्यान्तर्भावेण वृत्तिश्चेति सिद्धांतः ।

1. कद्रुशब्दात् स्त्रियामूङि सवर्णदीर्घे स्वादिकार्येषु च कृतेषु रूपमिदं ।
2. कमण्डलु शब्दात् स्त्रियामूङि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपमिदं ।

सूत्रार्थः । उदाहरणम्—भद्रबाहूः[2] । सूत्रे संज्ञायामिति किमर्थमिति न वाच्यम्, वृत्तौ[3] बाहू यस्या इत्यर्थे वृत्तबाहूरित्यत्रातिव्याप्तेः । यौगिकोऽयं शब्दः नेयं कस्याश्चनसंज्ञेति ऊङोऽभावायात्र सूत्रे 'संज्ञाया' मित्युक्तिरिति भावः ।

ऊङ् प्रत्यय विधायकं षष्ठं सूत्रम्—

'संज्ञायाम्' (4·1·72) इति । अत्र 'कद्रुकमण्डल्वोश्छन्दसि' (4.1·71) इत्यतः 'कद्रुकमण्डल्वोरिति ऊङिति चानुवर्तते, 'प्रातिपदिका' दिति, स्त्रियामिति 'कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ्स्या' दिति सूत्रार्थः । 'कद्रुः'[1] कमण्लुः[2] इतीमेचास्योदाहरणेस्तः । पूर्व सूत्रे छन्दसि इत्युक्तेः लोके संज्ञायां तद प्रवृत्तेः कन्द्रूः कमण्डलूः इत्यनयोः लोकेऽपि संज्ञायां साधुत्व बोधनार्थसूत्रमिदमारब्धम् ।

---

1. अत्र भग्नपादत्वं पङ्गत्वं न जातिः, आसीने शयाने चाकृत्या दुर्ग्रहत्वात्, एकस्यां व्यक्तौ 'विकल्पादोऽयं पङ्गु' रित्युप-देशेऽपि व्यक्त्यन्तरे आशवनशयनाद्यवस्थेषु तस्य दुर्ग्रहत्वात्, अवयव दोषरोगादि जन्मत्वाच्च, किन्तु गुणः । खञ्जति गतिविकलो भवतीत्यर्थे 'खरुशङ्कुपीयुनीलङ्गुलिगु' (उणा. । पा. 36 सू.) इति सूत्रेण क प्रत्यये खञ्जेः पङ्गादेशे पङ्गुः इति तत ऊङ्प्रत्यये पङ्गूरिति सिध्यति ।

2. इयं कस्याश्चित् संज्ञा ।

3. वृत्तो बाहू यस्याइत्यर्थः ।

1. कन्द्रूशब्दात् स्त्रियां संज्ञायामूङि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपमिदम् । कन्द्रूः नागमातुः संज्ञा । तदुक्तम् कद्रुस्तूषु नागानां मातरिस्त्रियां (अम॰ का. 1 व. 5 टिप्पनी सुधा व्याख्या)
यद्यपि कडारः कपिलः पिङ्ग पिङ्गौ कद्रुपिङ्गलौत्युक्तेः (अ. को॰ 1/5/16) वर्णवाचकोऽपि कद्रुशब्दः तथापि ततो न ऊङ्प्रत्ययः, 'यतः कमण्डलुश्चतुषपाजातिविशेषे प्रयुज्यते इति तत् साहचर्य्यात् प्राणिवाचकस्य पन्नगभातृवाचकस्यैवात्रमुङ्प्रत्ययविधायके संज्ञायामिति सूत्रेस्मिनग्रहणं भवति। अतएव 'चतुष्पाद्भ्योढञ्' (4·1·135) इत्यत्र कामण्डलेयः इत्युदाहृतम् ।

2. कमण्डलुशब्दात् स्त्रियामुङिसवर्णदीर्घे स्वादिकार्येषु च कृतेषु रूपमिदम् । कमण्डलुमृगविशेषस्य संज्ञा । पात्रपर्यायस्य कमण्डलुशब्दस्य स्त्रियामप्रयोगात् न तत ऊङ प्रत्ययः ।

ऊङ्प्रत्यय विधायकं सप्तमं सूत्रम् –

'संहित शफलक्षणवामादेश्च' (4·1·70) इति। अत्र स्त्रियामित्यधिकृतम्, ऊङ्श्चानुवृत्ति तथा च संहित शफ लक्षण वाम एतत्पूर्वपदादप्यूरूत्तरपदायूङ् प्रत्ययः स्यात् इति सूत्रार्थः। यत्रेवार्थो न प्रयुज्यते तदर्थमिदं सूत्रमारब्धम् – तदुक्तं भट्टोजिदीक्षितेन अनौपम्यार्थं[1] सूत्रमिति। 'संहितोरुः'[2] 'शफोरुः'[3] 'लक्षणोरुः'[4] 'वामोरुः'[5] इतीमानि चास्योदाहरणानि सन्ति।

ऊङ् विधायकं प्रथमं वार्तिकम्[1] –

'अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्' (वा: 4·1·66) इति। अत्र 'अप्राणिजाते' रित्यन्तरं वाचकानामितिशेषः। तथा च 'रज्ज्वादिभिन्नानामप्राणिवाचकानामपि ऊङ् उपसंख्यान'मिति वार्तिकार्थः। नचाऽत्र 'उतः इति सम्बध्यते नवा, ? नाद्यःपक्षः 'अलाबूः' इति भाष्योदाहरण विरोधात्। अलाबूशब्दोहि दीर्घोकारान्तः। न द्वितीयः पक्षः, अदन्तादप्यप्राणिजातितो घटादि शब्दात् स्त्रियांमूङापत्तिः स्यात् इति शङ्का कार्या। यतः अत्र 'उतः' इत्यस्य सम्बन्धो नास्त्येव। नचैवं सति' नञिवयुक्तमन्यसदृशाधिकरणेतथाह् यर्थगतिः इति न्यायेन रज्ज्वादिसदृशानामुवर्णान्तानामेव ग्रहणं भवति। 'अलाब्वा' 'कर्कन्ध्वा' इत्यादीनि चास्योदाहरणानि सन्ति।

---

1. वै. सि. कौ. स्त्री प्रत्यय., प्र. पृ. 680 बालमनोरमा टीका।
2. संहितोरु शब्दात् स्त्रियामूङि स्वादिकार्येषु कृतेषु रूपमिदम् संहितौ = संश्लिष्टौ ऊरु यस्या इति तदर्थः।
3. शफो खुरौताविव ऊरुयस्याः इति तदर्थः।
4. लक्षणोरु शब्दात् स्त्रियामूङि स्वादिकार्येषु कृतेषु रूपमिदम्। लक्षण शब्दोऽत्र अर्शआद्यजन्तः तथा चात्र लक्षण शब्दस्य लक्षणयुक्तइत्यर्थः। लक्षणौ लक्षणयुक्तौ ऊरुयस्याः इति तदर्थः।
5. वामोरु शब्दात् स्त्रियामूङिरूपं वामौ सुन्दरौ ऊरुयस्याः इति तदर्थः।

1. 'ऊङुतः' (4·1·66) इति सूत्रस्थमिति शेषः।
2. (परि. शे. परि. 76)
3. जलेनावलम्बते नाथः पततीत्यर्थे 'लविस्रसने' इति 'ल' धातोः नञि

(क्रमशः.........)

यद्यपि 'अलाबू' 'कर्कन्धू'[1] शब्दौ दीर्घोकारान्तौस्तः, ततः ऊङि न कश्चन रूप भेदः, तथापि 'नोङ्धात्वोः (6·1 175) इति विभक्त्युदात्तत्व प्रतिषेधार्थं स्त्रीलिङ्गाभ्यायाम्यामुभाभ्यां ऊङो विधानमावश्यकम्। सच प्रतिषेधः शसादावेव प्रवर्ततेतः प्रथमान्तं द्वितीयान्तं वा विहाय तृतीयान्तावेवोदाह्रीयेते। 'अप्राणि जातेः इत्युक्तिस्तु 'कृकवाकुः'[2] इत्यादौ ऊङो भावाय। रज्ज्वादि वर्युदासस्य 'रज्जुः'[3] 'हनुः'[4] इत्यादौ ऊङोभावप्रयोजनम्।

---

उपपदे 'नञि लम्बेर्नलोपे' (उण. 1/9) इति ऊ प्रत्यये तस्य णित्वात् वृद्धौ नञो नकारलोपे 'अलाबुशब्दः सिध्यति। ततः ऊङि टायां 'नोङ्धात्वोः' इति उदात्तत्वनिषेधः। नोङ् धात्वोरित्यस्य च ऊङः स्थाने यो यण् धात्ववयवस्थाने च यो यण् ततः परे शसादयः उदात्ता नस्यु' रित्यर्थः।

4. कर्कं कण्टकं दधातीत्यर्थे 'धा धातोः' 'अन्दूदृम्भूजम्बु' (उणा. 1/93) इति कूप्रत्यये उपपदस्य निपातनान्नुमि 'कर्कन्धू' शब्दो निष्पद्यते। ततः स्त्रियां ऊङि सवर्णदीर्घे टापो यणि 'कर्कन्ध्वा' इति रूपम्। अत्रापि 'नोङ्धात्वोः' (6·1·1·175) इति उदात्तत्वप्रतिषेधः ऊङः फलम्।

1. 'कर्कन्धूर्बदरी कोलिः' (अ. को. 2/4/36) इति त्रयं बदर्य्या नाम।

2. कृकेन गलेन वक्तीत्यर्थे कृक शब्देउपपदे 'वचेर्धातोः' 'कृकेव चः कश्च' (उणा. 1/6) इति मुण् प्रत्यये कश्चान्तादेशे स्वादिकार्ये रूपमिदं। अयं प्राणिजातिः। तथाचोक्त–
"कृकवाकुर्मयूरे च सरटे चरणायुधे" इति मेदिनी कान्तवर्गप्रथमः (क चपुष्कम्, श्लो. 183 पृ. 15)

3. सृजतीत्यर्थे सृज धातोः 'सृजेरसुम् च' (उ. उउ. 1/15) इत्युप्रत्ययः स च कित् असुमागमः 'सृ अ सज् उ' इति दशायां सस्य लोपे ऋकारस्य यणि आगमसस्य श्चुत्वेनशः, जश्त्वेन नश्च, स्वादिकार्यम् ततोरूपसिद्धिः।

4. हन्यतेऽनेनेत्यर्थे हन् धातोः 'शृस्वृस्निहि' (उणा. 1/10) इत्युप्रत्ययः सच 'नित्' इति हनु शब्दः सिध्यति ततः स्वादिकार्यम्। तदुक्तम् –
– अधस्ताच्चिबुकं गण्डौ कपोलौ तत्पराहनुः। (अ. को. 2/6/00)।

ऊङ् प्रत्यय विधायकं द्वितीयं वार्तिकम्[1] –

'गुग्गुलमधुजतुपतयालुनामिति वक्तव्यम्' (वा0 4.1.71)

इति । 'एभ्यः स्त्रियामूङ् प्रत्ययः स्या'दिति वार्तिकार्थः । गुग्गुलुप्रभृतीनां चतुर्णां छन्दसि व्यत्ययेन स्त्रीत्वम् । ऊङ् प्रत्ययस्यास्य गुग्गुलूः,[2] मधूः,[3] जतूः[4] पतयालूः[5] इतीमानिचास्यो दाहरणानि सन्ति ।

**ऊङ. प्रत्यय विधायकं तृतीय वार्तिकम्[1]—**

श्वशुरस्योकाराकारलोपश्च' (वा0 4.1.68) इति । श्वशुरस्य स्त्रीत्यर्थे पुंयोगलक्षणे ङीषि प्राप्ते तदपवादस्य ऊङ् विधायकस्यारम्भः 'श्वशुर शब्दात् स्त्रियामूङ् प्रत्ययः, श्वशुर शब्दघटकस्य उकारस्य द्वितीयस्य अकारस्य च लोपस्यादिति वार्तिकार्थः । नचात्र प्रथमस्य श्व शब्द घटकारस्यापि लोपः शङ्क्यः । यतः 'श्वशुरः श्वश्रवा' (1.2.71) इति निर्देशोनोपपद्येत 'श्वश्रूः[2] इति । चास्थोदाहरणम् ।

नागेशस्तु श्वश्रू शब्दोऽव्युत्पन्नएय । यतः उङ् प्रत्ययान्तः श्वश्रूशब्दः भाष्य-विरूद्धः । 'ङ्याप्प्रातिपदिकात्' (4.1.1) इति सूत्रे भाष्येहि ङ्याब् ग्रहणं किमर्थम्' न 'प्रातिपदिका' दित्येवसिद्धम्' इति प्रश्ने 'अप्रत्ययः' इति प्रातिपदिकसंज्ञा प्रतिषेधः प्राप्नोति, इति समाधाने 'एवं सति' 'त्यूङ' ग्रहणं कर्तव्यम्, इति पुनः प्रश्ने 'तिप्रत्ययान्ते तद्विधतान्तत्वात् प्रातिपदिकत्वं' सिद्धम्' इति समाधाय 'ऊङन्तादपि पूर्वान्त-

---

1. कद्रू-कमण्डल्वोश्छन्दसि' (4,1.71) इति सूत्रस्थमित्यर्थः ।
2. गुग्गुल शब्दात् छन्दसि व्यत्येन स्त्रीत्वे ऊङि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपमिदम् ।
3. मधु शब्दात् छन्दसि व्यत्ययेन स्त्रीत्वे ऊङि सवर्णदीर्घेस्वादिकार्येषु कृतेषु रूपमिदम् ।
4. जतुशब्दात् छन्दसि स्त्रियामूङि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपदिम् ।
5. स्पृहिगृहि' इत्यादिना आलजन्तात् पतयालुशब्दात् छन्दसि व्यत्ययेन स्त्रीत्वे ऊङि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपमिदम् ।

---

1 'पङ्गोश्च' (4.1.68) इति सूत्रस्थमितिशेषः ।
2. श्वशूरस्य स्त्रीत्यर्थे श्वशुरशब्दात् । स्त्रियामूङ् प्रत्यये श्वशुर शब्दघटक शकारोत्तरोकार-रेफा कारयोः लोपे लिङ्ग विशिष्टपरिभाषया स्वादिकार्येषु च कृतेषु रूपमिदम् । श्वशुर शब्दस्य दम्पत्योः पितेत्यर्थः । तदुक्तम् –
'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तुपिता तयोः' अम. का. 2 व 6/31

त्वेन सिद्धम्' इत्युक्तम् । श्वश्रूशब्दो यद्यङन्तः स्यात्तदातदर्थं मूङ् ग्रहणस्यावश्यकत्वेन भाष्ये तदनुक्तत्वेन न्यूनतापत्तिर्भाष्यस्य स्यादिति मनुते । इत्थं नागेशमते वार्तिकमिदमनावश्यकम् ।

ऊङ प्रत्यय विधायकं चतुर्थं वार्तिकम्[3] – 'सहितसहाभ्यांचेति वक्तव्यम्' (वा0 4.1.70) इति । 'सहित, सह-इत्येताभ्यां परः यः ग्ररूशब्दः तस्मादपि ऊङ प्रत्ययः स्यादितिवक्तव्य'मिति वार्तिकार्थः । 'सहितोरूः'[1] 'सहोरूः'[2] । इतीमेचास्योदाणेस्तः ।

नच 'हिततयोः परतः समोवालोप इत्यर्थकेन 'समोवा हित-ततयः' इत्यनेन हितः परस्य समोमकारस्य लोपोवाभवतीति सहित सब्दो निष्पद्यते, मलोपाभावपक्षे च संहित शब्द इति वस्तुतिस्थितिः तथा च संहित ग्रहणेन 'एकदेशविकृतमनन्यव'[3] दित्युक्तेः सहित शब्दस्यापि ग्रहणेन 'सहितोरूः' इत्यत्र 'सहितशफलक्षणवामादेश्च' (4.1.70) इति सूत्रेणैवे ऊङ् प्रत्ययस्य सुलभतयावार्तिके स्मिन् सहित ग्रहणं व्यर्थमितिशङ्क्यम । यतः 'सहितोरूः' इत्यत्र हितेन सेहति विग्रहे 'तेन सह' (2.2.28) इति बहुव्रीहौ 'वोपसजंनस्य' इति सभावे कृते निष्पन्नः सहितशब्दः ग्रयुक्तो विद्यते नतु मकारलुप्तः सहितशब्दः । इत्थं वार्तिकेऽस्मिन् सहितशब्दस्य न वैयर्थ्यं मिति निश्चीयते ।

**(ख) तद्धिताधिकार विहिताः स्त्रीप्रत्ययाः**

तद्धिताधिकार विहिताः स्त्रीप्रत्ययाः 'ति' 'ष्फ' ष्यङ्' इत्येते त्रयः सन्तिः । यथा क्षरक्रमं क्रमः ते निरूप्यन्ते । तत्र ति प्रत्ययः । 'ति' प्रत्यय विधायकम् एकमेव–

---

3. संहितसफ लक्षणवामादेश्च' (4.1.70) इति सूत्रस्थ मित्यर्थः ।

1. सहितोरूशब्दात्स्त्रियामू ङि स्वादिकार्येषु कृतेषु रूपमिदम् । 'हितेन सह सहितौ ऊरू यस्याः सा 'इति च प्रयोगार्थः ।

2. सहोरू शब्दात् स्त्रियामूङि स्वादिकार्येषु कृतेषु रूपमिदम् नच सहशब्दस्य विद्यमानवचनत्वे 'सहोरूः' इत्यत्र सह शब्द प्रयोगो व्यर्थमिति शङ्क्यम् । यतः 'सहोरूः' इत्यस्य 'सहेते रतिकालिकर्म नमिति सहौ, सहौऊरू यस्याः सा इति तदर्थं ग्रथवा विद्यमानवचनत्वेऽपि सहशब्दस्य नात्रवैयर्थ्यम्, ग्रतिशयेन विद्यमानत्वं हि विवक्षितम् । तदाह भट्टोजि दीक्षितः – यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशय प्रतिपादनाय प्रयोगः' इति ।

3. परि. शे. परि. 37 ।

सूत्रम्— 'यूनस्तिः' (4.1.77) इति । अत्र स्त्रियामिति[1] तद्धित[2] इति चाधिकाराल्लभ्यते[3] तथाच – 'युवनशब्दा ति प्रत्ययः स्त्रियां स्यात् सच तद्धितः सूत्रार्थः । युवन् शब्दात् 'स्त्रियाम् 'ऋन्नेभ्यः' (4.1.4) इति ङीपि प्राप्ते सूत्रमिदमारब्धमिति ङीपोऽपवादोऽयं 'ति' प्रत्ययः । 'युवतिः'[4] इति चास्योदाहरणम् ।

नच बह्वोयुवानो यस्यांसा बहुयुवेत्यत्र[5] 'ति' प्रत्ययः कुतोनेति शङ्क्यम् । यतः 'अनुपसर्जनात्' (4.1.14) इत्यत्राप्यनु वर्तते । अत्रहि युवन् शब्दः उपसर्जनः नत्वनुपसर्जनः इति प्रत्ययः प्रप्नोत्येव न ।

नच युवतीभिः परीवृतः इत्यादे कथं युवती शब्दः ईकारान्तः प्रयुक्त इति शङ्का कार्या । यतोऽत्र 'युमिश्रणे' (अ.प.से. 3251) इत्यास्माल्लटः[6] शतरि,[7] शपोलुकि,[8] उवङि[9] उगित्वान्ङीपि[10] 'युवती' शब्दोऽपि साधुतामेति । अथवा यु धातोरौणादिके बाहुलकात् कति प्रत्यये, कित्वात् गुणाभावे उवङि, अगित्वात्[1] युवतिः शब्दः साधुतामेति ।

मत्तु कश्चित् ति प्रत्ययान्त युवती शब्दात् 'सर्वतोऽक्तिन्नार्थदि त्येके (4.1.45) इति बह्वादिगणसूत्रेण वैकल्पिके ङीषि युवती इत्यस्य साधुत्वम् । अतएव 'युवती-करनिर्मचितम्' इत्यादि प्रयोगाः समुपपद्यन्ते । नच 'ति' प्रत्ययेन स्त्रीत्वस्योक्त्या ङीष् न स्यादिति वाच्यम् । यतः स्त्री प्रत्यये 'उक्तार्थानामप्रयोगः 'इति न्यायो न प्रव-

---

1. 'स्त्रियाम्' (अष्टा. 4.1.3) ।
2. 'तद्धिताः' (अष्टा 4.1.76)
3. आपञ्चम समाप्तेरधिकारोयमिति स्त्रीप्रत्ययप्रकरण प्रारम्भे भट्टोजि-दीक्षितो क्तेरिति शेषः ।
4. युवन् शब्दात् स्त्रित्वविवक्षायां 'ति' प्रत्यये 'स्वादिष्वसर्वनामस्थाने' (1.4.17) इति पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' (8.2.7) इति नकारे लोपः स्वादिकार्य च ।
5. बहुयुवन् शब्दात् 'डाबुभाभ्यामन्यतरस्याम्' (4.1.13) इति डापि रूपमिदम् ।
6. अष्टा. 'वर्तमानेलट' (3.2.133) ।
7. 'लटः शतृशानचावप्रथमा समानाधि करणे' (3.2.12) इत्यनेने-तिशेषः ।
8. अदिप्रभृतिभ्यः शपः' (2.4.72) इत्यनेनेतिशेषः ।
9. 'अचिश्नुधातुभ्रुवांय्वोरियङ वङौ' (6.4.77) इत्यनेनेतिशेषः ।
10. 'उगितच' (4.1.6) इत्यनेनेतिशेषः ।

1. 'उगितश्च' (4.1.6) इत्यनेनेतिशेषः । (2) (4.1.45) गणसूत्रम् ।

तंते । अथवा वयोवाचकानां वैकल्पिकजातित्वस्य भाष्य सम्मततया 'इतोमनुष्यजातेः' (4.1.65) इति ति प्रत्ययन्ताःन्ङीषा युवती इत्यस्य साध्वत्वमिति ब्रूते, तन्नयुक्तम । यतः युवतीनां समूहो यौवतमिति न सिदधयेत् । किन्तु 'तस्य समूहः' (4.2.37) इत्यणि 'भस्याढ़ेतद्धिते' (वा0पा0सू0 6 3.35) इति पुंपद्भावे 'यौवनम्' इत्येव स्यात् । यु धातोः लटः शतरि उगित्वान्ङीषि युवती शब्दस्य साधुत्वस्वीकारेतु 'युवतीनां समूह' इत्यर्थे 'अनुदात्तादेरञ्' (4.2.44) इत्यत्रि योवतमिति, 'यूनस्तिः' (4.1.77) इति ति प्रत्ययान्तात् 'तस्यसमूहः' (4.2.37) इत्यणि 'भस्याढेतद्धिते' (वा. पा. सू. 6.3.35) इति पुंवद्भावेन ति प्रत्यय निवृत्तौ 'अन' (6.4.167) इति प्रकृतिभावेन टिलोपाभावे 'यौवन मिति च सिध्यति ।

ति प्रत्यय विधायकेस्मिन् 'तद्धिताः' (4.1.76) इत्यधिकारात् तद्धित इत्यस्यानुवृतिः उत्तरार्थाऽपि स्पष्टार्थमिहापि स्वीकृता । नच 'युवतिः' इत्यत्र 'कृत्तद्धितसमासाश्च' (1.2.46) इति प्रातिपदिकसंज्ञार्थं तदनुवृतिरावश्यकीतिवक्तम् । यतः प्रातिपदिकसंज्ञाया आभवेऽपि ति् पत्ययान्तात् लिङ विशिष्ट परिभाषया स्वाद्युत्पत्तिः सुलभा' नापि च लिङगविशिष्ट परिभाषाया अनित्यत्व ज्ञापनाय तद्धिताधिकारोऽत्राप्यावश्यकः इत्यपि, वक्तव्यम् शक्तिलाङगूलाङ्कुश' इति वार्तिकस्थ घट घटीग्रहणात् तस्या अनित्यत्वं ज्ञापित चरम् ।

तद्धिता इत्यधिकारस्थ ष्फ प्रत्यय विधायकानि त्रीणि सूत्राणिसन्ति, वार्तिकचैकमेव । तत्र सूत्राणि –

वथा –

1. 'कौरव्यमाण्डूकाभ्यांच' (4.1.19)
2. 'प्राचांष्फतद्धितः' (4.1.17)
3. 'सर्वलोहितकतन्तेभ्यः' (4.1.18)

वार्तिकं यथा –

1. आसुरेरूपसंख्यानम् (वा0 4.1.19)

तत्र –

ष्फ विधायकं प्रथमं सूत्रम् – 'कौरव्यमाण्डूकाभ्यांच' (4.1,19) इति । अत्र पूर्वसूत्रात् प्राचां पदं परित्यज्य ष्फ[1] इति, सर्वत्रैति[2] चानुवर्तते । स्त्रियां, तद्धितः इतिचाधिकाराल्लभ्यते । तथा च "कौरव्यमाण्डूकाभ्यां स्त्रियांनित्यं ष्फः स्यात् सच तद्धितः इति सूत्रार्थः । ष्फ विधिरयं टाप्

---

1. 'प्राचांष्फ तद्धितः' (4.1.17) इत्यत इति शेषः ।
2. 'सर्वं त्रलोहितादिकतन्तेयभ्यः' (4.1.18) इत्यत इति शेषः ।

ङीषोरपवाद:[1]। 'कौरव्यायणी'[2], 'माण्डूकायनी'[3] इति चास्योदाहरणेस्त:।

ष्फ प्रत्यय विधायकं द्वितीयं सूत्रम्—'प्राचांष्फ तद्धित:' (4·1·17) इति। अत्र 'प्रातिपदिकादिति'[4] 'स्त्रियां' मिति चाधिक्रते, 'य:'[5] इति 'अत:'[1] इति चानुवर्तते, अताप्रातिपदिकं विशेष्यते विशेषणात् तदन्तविधि[2]। ष्फेति लुप्तप्रथमाकम्, तथा च 'यञोयोऽकारस्तदन्तात् ष्फोवा स्यात् स्त्रिया'मितिसूत्रार्थ:।

---

1. कौरव्य शब्दात् टाप:, माण्डूक शब्दात् ङीषश्चापवाद: इत्यर्थ:।
2. करोति राज्यमित्यर्थे कृ धातो: 'कृग्रोरूच्च' (उणा. 1/24) इत्युप्रत्यये गुणैऽकारस्योकारादेशे कुरू शब्द: निष्पद्यते। चन्द्रवंशीयो राजेति तदर्थ:।

"हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे।
पञ्चालपूर्वभागेतु कुरुदेश: प्रकीर्तित:॥"

वाचस्पत्यम III भाग: पृ. 2123

इत्युक्तं देशोऽपि कुरु:, नववर्षात्मकस्य जम्बूद्वीपस्य वर्षभेदोऽपि कुरु:, वर्षोऽत्रांश:। तथा च कुरोराज्ञोऽपत्यं स्त्रीत्यर्थे 'कुर्वादिभ्योण्य:' (4·1·172) इति ण्य प्रत्यये णस्येत्वलोपयो: तद्धितान्तत्वेन प्रातिपदिकत्वे ङसोलुंकि 'ओर्गुण:' (6·4·146) इति गुणेऽवादेशे आदिवृद्धौ निष्पन्नात् कौरव्यशब्दात् 'गोत्रं च चरणै: सह' इति जातित्वेऽपि योपधत्वात् 'जातेरस्त्रीविषयादयोपधात्' (4·1·63) इति ङीषोऽभावे। टाप् प्राप्त: तं बाधित्वा ष्फे षकारस्य इत्वे आयनादेशे 'यस्येति च' (6·4·148) इति अकारलोपे स्वादि कार्ये च कृते रूपमिदम्।
3. मण्डूकोनाम ऋषि:, तस्यापत्यं स्त्रीत्यर्थे 'ढक् च मण्डूकात्' (4·1·119) इत्यणि आदिवृद्धौ 'यस्येति च' (6·4·148) इत्यकारलोपे 'गोत्रं च चरणै: सह' इति जातित्वात् ङीष् प्राप्त: तं बाधित्वा ष्फ षकारस्येत्संज्ञायां अकारलोपत्वान्ङीष् पुन:अकार लोपे स्वादिकार्येषुच कृतेषुरूपमिदम्।
4. 'ङ्याप्प्रातिपदिकात्' (4·1·1) इत्यत इति शेष:।
5. 'स्त्रियां' (4·1·3) इत्यत इति शेष:।

1. 'अजाद्यतष्टाप्' (4·1·4) इत्यत इति शेष:।
2. 'येनविधिस्तदन्तस्य' (1.1·72) इत्यत इति शेष:।

'गार्ग्यायणी'[3] इति चास्योदाहरणम् । अत्र अत इत्यनुवर्त्य यञोयोऽकारः इत्यर्थलाभ प्रयोजनम् 'वतण्डी' इत्यत्र ष्फ प्रत्ययाभावः । अन्यथा प्रत्यय लक्षणेन 'वतण्डाच्च' (4.1·108) इतिविहितस्य यञःलुक्यप्यतिदेशात् यञन्तात् ष्फोवेत्यर्थे ष्फप्रत्ययोऽत्र दुर्वारःस्यात् । स्वीकृते च यञोयोञोकारस्तदन्तात् ष्फोवेत्यर्थे, प्रत्यय लक्षणेन यञन्तत्वेऽपि ष्फ प्रत्ययापत्तिर्न भवति ।

तथाहि—वतण्डस्यापत्यं स्त्री (कन्या) इत्यर्थे 'वतण्डाच्च' (4·1·108) इति विहितस्य यः 'लुक्स्त्रियाम' (4·1·109) इति लुकि यञोऽकाराभावान्न ष्फ, किन्तु शाङ्गरवादिषु पाठात् ङीनेव ।

न चैवं यञोयोऽकार इत्यर्थाभावे शाङ्गरवादौ पाठसामर्थ्यात् 'प्राचांष्फ' इति बाधित्वा ङीनेवस्यादिति वाच्यम् 'उदीचा'मते 'प्राचांष्फ' इत्यस्याप्राप्त्या शाङ्गरवादिपाठस्य चारितार्थ्येन प्राचांमतेष्फस्यापत्तेः । न चैवमपि ष्फं परत्वाद् बाधित्वा ङीनेव स्यादिति यञोयोऽकार इत्यर्थोविफलएवेति वाच्यम्, उत्तरसूत्रे 'सर्वत्र' ग्रहणात्सर्वमते एव ष्फ प्रत्ययस्येष्टत्वात् । उत्तर सूत्रे 'सर्वत्र' ग्रहणाभावेऽपि सर्वप्रवृत्तौ बाधकाभावात् ।

नच 'प्राचाम्' इत्यस्य निवृत्त्यर्थं सर्वत्रग्रहणम् सूत्रारम्भसामर्थ्यादेव प्राचामित्यस्य निवृत्तिसिद्धेः । अन्यथा पूर्वेणैव लोहितादिभ्योऽपि ष्फे सिद्धे सूत्रवैयर्थ्यं स्पष्टमेव । अतएव 'आवट्यायनी' इति सर्वत्रग्रहणस्य फलप्रदर्शनपरं भाष्यं संगच्छते । अत्रहि प्राचांष्फ इतिष्फः ।

तदुक्तं भाष्ये 'सर्वत्रग्रहणं किमर्थम्'[1] प्राचामेवहि स्यात् । नैतदस्ति प्रयोजनं, सिद्धं प्राचां पूर्वेणैव, इदं तर्हि प्रयोजनम् । सर्वेषामेव यथा स्यात्, आवट्यायनी । चापं बाधित्वा ष्फो यथास्यात् इति । 'सर्वेषामित्यस्यापवाद विषयाणामप्यर्थः

---

3. गर्गस्यापत्यं स्त्री इत्यर्थे गर्ग शब्दात् 'गर्गादिभ्योयञ्' (4·1·105) इति यञ् आद्यचो वृद्धौ गार्ग्य शब्दात् ष्फ प्रत्यये षकारस्य 'षप्रत्ययस्य' (1·1.6) इति इत्संज्ञायां लोपे फकारस्य आयनादेशे 'यस्येतिच' (4·1·148) इति यकारादकारस्य लोपे षित्वात् 'गार्ग्यायन' शब्दात् स्त्रियां 'षिद्गौरादिभ्यश्च' (4·1 41) इति ङीषि णत्वे स्वादिकार्येषु च कृतेषु रूपमिदम् ।

1. म. भा. 4.2·4

इति कैयटः। नच चाब्विधायकस्य 'ग्रावट्याच्च' (4·1·75) इत्यस्य वैयर्थ्यम् 'उदीचा' मते तस्य चारिताथ्र्यात्, सर्वत्रेत्यस्यापवाद विषयेऽपीत्यर्थः। तेन 'वतण्डी' इत्यत्र परमपि ङीनं बाधित्वा ष्फ एव स्यादिति तन्निवृत्यर्थ यञोयोऽकार इत्यर्थ ग्रावश्यकः। प्रत्ययलक्षणेन यञोऽतिदेशेऽपि वर्णाश्रयेनास्तिप्रत्ययलक्षणमिति निषेधेनाकारातिदेशा सम्भवात्।

ष्फ प्रत्ययविधायकं तृतीयं सूत्रम्—'सर्वत्रलोहितादिकतन्तेभ्यः '4·1·18) इति। ग्रत्र लोहितादि, गर्गाद्यन्तर्गणः। लोहितः ग्रादिः येषामिति कतोऽन्तो येषामिति च विग्रहः, कतन्तेत्यत्र शकन्ध्वादित्वात् पररूपं यञश्च इत्यतो 'यञ्'[2] इत्यनुवृत्त बहुवचनान्ततया विपरिणम्यते 'प्राचां'ष्फ तद्धितः (4·1·17) इनि सूत्र प्राचां वर्यमिहानुवर्तते सर्वत्रेति सर्वेषु मतेषु इत्यर्थः, तेन 'नित्यम्'। इति लभ्यते स्त्रियामिति तद्धित इति च ग्रधिकाराल्लभ्यते। तथा च "लोहितादिभ्यः कतशब्दान्तेभ्यो-यञान्तेभ्योनित्यंस्त्रियां ष्फ स्यात् सच तद्धितः इति सूत्रार्थः। 'लौहित्यायनी'[1] 'कात्यायनी'[2] इति चास्योदाहृणेस्तः।

ष्फ प्रत्यय विधायकं—वार्तिकम्[3]—'ग्रासुरेरूप संख्यानम्' (वा. 4·1·19) इति यञन्तात् ग्रासुरि शब्दात् ष्फस्योपसंख्यान कर्तव्यमिति वार्तिकार्थः। 'ग्रासुरायणी' इति चास्योदाहरणम्।

---

2. 4·1·16।

1. लोहितोनाम कश्चन ऋषिः ङसन्तात् लोहितशब्दात् 'गर्गादिभ्योयञ्' (4·1·105) इति यञि प्रातिपदिकत्वात् ङसोलुकि ग्रादिवृद्धौ ग्रकारलोपे लौहित्य शब्दात् स्त्रियां ष्फ प्रत्यये षकारस्य इत्वे लोपे फकारस्यायन्नादेशे 'यस्येति च' (6.4.142) इति यकाराकारस्य लोपे षित्वान्ङीषि ग्रकारलोपे स्वादिकार्येषुकृतेषु रूपमिदम्।

2. कतःकश्चनऋषिः, कतस्यापत्यं स्त्रीत्यर्थे यञादिषु कृतेषु यञन्तात् ष्फे ग्रायनादशे सवर्णदीर्घे षित्वान् ङीषि पकारलोपादिकृतेषु लौहित्यायनीतिवत्रूपम्।

3. 'कौरव्यमाण्डूकाभ्यां च' (4·1·19) इति सूत्रस्थ इति शेषः।

क्रमशः...........

ष्यङ् प्रत्यय विधायके द्वे सूत्रे स्तः । यथा—

1. क्रौड्यादिभ्यश्च (4·1·80)
2. दैवयज्ञिशौचिवृक्षि सात्यमुग्रि काण्डेविद्धिभ्योऽन्यतरस्याम् (4·1.81)

तत्र—ष्यङ् प्रत्यय विधायकं प्रथमं सूत्रम्—'क्रौड्यादिभ्यश्च' (4·1·80) इति । अत्र स्त्रियामित्यधिकृतम्, पूर्वसूत्रात्[1] ष्यङिति चानुवर्तते । पञ्चमीनिर्देशात् ष्यङोऽत्र प्रत्ययत्वं तथा च 'क्रौड्यादिभ्यःष्यङ् प्रत्ययः स्यात् स्त्रियामिति सूत्रार्थः । 'क्रौड्या'[2] 'व्याड्या'[3] 'गौवक्ष्या'[4] इत्यादीनि चास्यष्यङ्प्रत्ययस्योदाहरणानि सन्ति ।

---

4. असुरस्यापत्यं स्त्रीत्यर्थे असुर शब्दात् 'अतइञ्' (4·1 95) इति-इञि आदिवृद्धौ अकारलोपे आसुरि शब्दात् ष्फ प्रत्ययेषकारस्येत्वे ष्फस्य आयन्नादेशे 'यस्येति च' (6·4·149) इति पुन्रकारलोपे षित्वात् ङीषि पुनरकारलोपे णत्वे स्वादि कार्येषु च कृतेषु रूपमिदम् ।

1. 'अणिञोरनार्षयोर्गुरूपोन्तमयोःष्यङ्गोत्रे' (4·1·78) इत्यत इति शेषः ।

2. 'क्रोडस्यापत्यं स्त्रीतिविग्रहे 'अतइञ्' (4·1·95) इति इञि आद्यचो वृद्धौ क्रौडि शब्दात् ष्यङि 'यङश्चाप्' (4·1.74) इति चापि स्वादिकार्येषु कृतेषु रूपमिदम् । इह 'त्रयादिनामन्त्यमुत्तमम्' इत्युक्तेः इञः गुरूपोत्त मत्वाभावात् षङादेशो 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे' (4·1.74) इत्यनेन न प्राप्नोतीति ष्यङ्प्रत्ययोऽत्र-विहितः ।

3. व्यडयापत्यं स्त्री इति विग्रहे व्यड शब्दात्, 'अतइञ्' (4·1.95) इति इञि आद्यचो वृद्धौ इयन्तात् व्याडि शब्दात् ष्यङ् प्रत्यये 'यङश्चाप्' (4·1·74) इति चापि स्वादिकार्येषु कृतेषु रूपमिदम् । अत्रापि इञः गुरूपोत्तमत्वाभावात् 'अणिञोरनार्षयोर्गुरूपोत्तमयोःष्यङ्गोत्रे (4·1·78) इति इञः ष्यङादेशो न प्राप्नोतीति ष्यङ् प्रत्ययो विहितः ।

4. गोकक्ष शब्दात् 'गर्गादिभ्योयञ्' (ग. सू. 4·1·105) इतियञ्

क्रमशः..........

नच 'क्रोड्या, व्याड्या' इत्युभयत्र क्रोडि व्याडि शब्दाभ्याम् इञः ष्यङा-देशे टापि रूपे चेष्टे सुलभेस्त इति सूत्रमिदं नारब्धव्यमिति शङ्क्यं, यतः इञोरत्र ष्यङादेशो न प्राप्नोतिगुरूपोत्तमत्वाभावात्,[1] गोक्ष्य इति यञन्ताच्च[2] यञः ष्यङा-देशो न प्राप्नोतीति सूत्रमिदमावश्यकम् ।

तदुक्तं भट्टोजिदीक्षितेन—'अगुरूपोन्तमार्थोऽनणिञर्थश्चारम्भः'[3] इति ।

सूत्रोक्तगणेस्मिन् 'सूतयुवत्याम्' (ग. सू. 4·1·80) 'भोजक्षत्रिये' (ग. सू. (4·1·80) इति सूत्रद्वयं दरीदृश्यते, तस्य च क्रमशः "सूत शब्दात् युवत्यां ष्यङ् प्रत्ययः स्यात् भोज शब्दाच्च क्षत्रिये स्त्रियांष्यङ् प्रत्ययः स्यात्" इति सूत्रयोरर्थः । क्रमशः 'सूत्यां'[4] 'भोज्या'[5] इति च तदुदाहरणम् । ष्यङो ङकारोनुबन्धः 'यङश्चाप्' (4·1·74) इत्यत्रास्यापि ग्रहणार्थः षकारोंनुबन्धः 'सामान्यग्रहणाभिधातार्थः अन्यथै-कानुबन्धकत्वादस्यैव ग्रहणं स्यात्' नतु ञ्यङः । नच टापासिद्धि, अन्तोदात्तत्वानापत्तेः ।

---

'यस्येति च' (6·4·148) इति अकारलोपे आद्यचोवृद्धौ गोकक्ष शब्दात् यञन्तात् यञः 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' (4·1·78) इति ष्यङादेशो प्राप्नोतीति यञः अण् इञ् भिन्नत्वादिति यञन्तात् ष्यङि यङश्चाप् (4·1·74) इति चापि स्वादिकार्येषु कृतेषु रूपमिदम् ।

1. त्र्यादिनामन्त्युमुत्तमम्, उत्तमस्य समीपम्, उपोत्तमम् गुरूउपोत्तमम् गुरूपोत्तमं तस्य भावः गुरूपोत्तत्वंतस्या भावादित्यर्थः ।

2. 'गर्गादिभ्योयञ्' (4·1·105) इति विहित यञन्तात् इत्यर्थः ।

3. वै. सि कौ. त. अ.प्र.पृ. 612

4. सूशब्दात् युवत्यां ष्यञि अकार लोपे 'यङश्चाप्' (4·1·74) इति चापि स्वादिकार्येषु च कृतेषुरूपमिदम् । प्राप्त यौवना इति तदर्थः । जातौ तु ङीषि सूतीत्येव रूपं भवति ।

5. भोज शब्दात् क्षत्रिय जातौ स्त्रियां ष्यङ प्रत्यये अकार लोपे 'यङश्चाप्' (4·1·74) इति चापि सवर्ण दीर्घे स्वादि-कार्येषु कृतेषु रूपमिदम् ।

ष्यङ् प्रत्यय विधायकं द्वितीयं सूत्रम्—'दैवयज्ञि शौचिवृक्षिसात्य मुग्रिकाण्डे विद्धि भ्योऽन्यतरस्याम्' (4·1 81) इति। अत्र स्त्रियामित्यधिकृतम्। तथा च 'दैवयज्ञि,[1] शौचिवृक्षि[2], सात्यमुग्रि[3], काण्डेविद्धि[4], इत्येतेभ्यः चतुर्भ्यः, इञन्तेभ्यः[5] स्त्रियां ष्यङ् प्रत्ययो वा स्या''दिति सूत्रार्थः। 'दैवयज्ञ्या'[6] 'दैवयज्ञी'[7] 'शौचिवृक्ष्या'[8] 'शौचिवृक्षि'[9] 'सात्यमुग्र्या' 'सात्यमुग्री'[11] 'काण्डेविद्ध्या'[12] 'काण्डे-

---

1. देवयज्ञा यष्टव्या यस्य स देवज्ञः तस्यापत्यमित्यर्थः।
2. शुचिवृक्षो यस्य स शुचिवृक्षः तस्यापत्यमित्यर्थः।
3. सात्यमुग्रं यस्य स सत्यमुग्रः निपातनात् पूर्वनिपातः मुगागमश्च, तस्यापत्य मित्यर्थः।
4. काण्डेन विद्धः काण्डेविद्धः 'कर्तृकरणेकृताबहुलम्' (2·1·32) इति समासः निपातनात् काण्ड शब्दस्यैकारः, तस्यापत्यमित्यर्थः।
5. 'अतइञ्' (4·1·95) इति विहितोतिशेषः।
6. दैवयज्ञि शब्दात्स्त्रियांष्यङ् प्रत्यये 'यस्येति च' (6·4·148) इति इकारलोपे ,यङश्चाप् (4·1·74) इति चापि सवर्णदीर्घे स्वादि कार्येषु कृतेषु रूपमिदम्।
7. ष्यङोऽभावे दैवयज्ञिशब्दात् स्त्रियां 'इतोमनुष्यजाते' (4·1·65) इति ङीषि इकारलोपे स्वादि कार्येषु कृतेषु रूपमिदम्
8. शुचिवृक्षिशब्दात् स्त्रियां ष्यङ् प्रत्यये 'यस्येति च' (4·1 48) इति इकारलोपे 'यङश्चाप' (4·1·74) इति चापि सवर्णदीर्घे स्वादि कार्येषु रूपमिदम्।
9. ष्यङोऽभावे शौचिवृक्षिशब्दात् स्त्रियाम् 'इतोमनुष्यजातेः' (4·1·65) इति ङीषि इकारलोपे स्वादिकार्येषु रूपमिदम्।
10. सात्यमुग्रिशब्दात् स्त्रियां ष्यङ् प्रत्यये यस्येति च' (6·4·142) इतीकार लोपे यङश्चाप्' (4·1·74) इति चापि सवर्णदीर्घे स्वादिकार्येषु कृतेषु रूपमिदम्।
11. ष्यङोऽभावे सात्यमुग्रिशब्दात् स्त्रियां 'इतोमनुष्यजातेः (4·1·65) इति ङीषि इकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम्।
12. काण्डेविद्धि शब्दात् स्त्रियां ष्यङप्रत्यये 'यस्येति च' (6·4·140) इति इकारलोपे 'यङश्चाप्' (4·1·74) इति चापि सवर्ण दीर्घे स्वादिकार्येषु कृतेषु रूपमिदम्।

विद्धवी'[1] इतीमानि चास्य ष्यङ्प्रत्ययस्योदाहरणानि सन्ति। अगोत्रार्थ[2] चेदं सूत्रमारब्धम्। गोत्रेऽपिपरत्वादिक प्रवर्तते। तथाचोभयत्रविभाषात्वमस्य सूत्रस्य।

इदमत्रावधेयम् 'अणिञोरनार्षयोगुरूपोत्तमयोःष्यङ्गोत्रे (4.1.78) इति सूत्रे यदि शास्त्रीयं गोत्रं गृह्यते[3] तदा अगोत्रार्थमिदम्, यदि लौकिकं गोत्रमेव तत्र गृह्यते तदा 'अणिञोः रीति नित्ये प्राप्ते विकल्पार्थं सूत्रमिति।

**(ग) स्त्रीप्रत्ययनां स्त्रीप्रत्ययान्तर्गत कतिपयादेशानां च स्त्रीत्वव्यतिरिक्ता अर्था :**

तथ्य मिदंनिम्नलिखितानुशासनेभ्यः स्फुटं ज्ञायन्ते। तथाहि 'शूद्राचामहत्पूर्वाजातिः' (वा. सं. 116) एतद् वार्तिकम् 'अजाद्यतष्टाप्' (4.1.4) इति सूत्रे पठितं विद्यते। जातिवाचकोऽमहत्पूर्वः शूद्रशब्दः स्त्रियां टापं लभते इतितदर्थः। अतः शूद्रात् स्वभाय्र्यायां विधिनाऊढाया मुत्पन्ना स्त्री शूद्रा इत्येव साधु, शूद्रस्य कन्या वा इत्यर्थे पुंयोगात् स्त्रियां वृतौ जातिवाचित्वाभावात् टाप् न भवति किन्तु 'पुयोगादाख्यायाम्' (4.1.48) इति सूत्रेण ङीषैवेति शूद्रीत्येव साधु भवति। पुयोगोदास्पत्यरूप एव इति न नियमः किन्तु जन्यजनक भावोपि तेन "वेश्या शूद्रयोस्तुराजन्य माहिष्योग्रो सुतौ स्मृतौ" इति स्मृतिः संगच्छते। महती चासौ शूद्री इत्यर्थे महाशूद्रीत्येवसाधु भवति। अत्रहिमहत्पूर्वत्वान्न टाप् भवति। अत्र पुंवत् कर्मधारय जातीय देशीयेषु (6.3.42) इति सूत्रेण महती शब्दस्यपुंवद्भावे आत्वे च सतिमहाशूद्रशब्दस्य महत्पूर्वकत्वात् टापो भावेन जातिलक्षणङीषेवजायते। तदुक्तम् अमरकोषकृता "आभीरी तु महाशूद्री जातिपुंयोगयोः समा"[2] इति। 'नृपाच्छूद्रायामुत्पन्ना कन्या उग्रा तस्यां ब्रह्माणादुत्पन्नः आभीरः जातिविशेषः स्त्रीचेत् 'महाशूदी' इत्युच्यते सा आभीरी भवति। अथपुंयोग विवक्षायां शूद्र शब्दस्य गौणत्वं तथा च 'गौणमुख्ययोः मुख्येकार्य[3] सम्प्रत्ययः' इत्यनया तत्र 'शूद्राचामहत्पूर्वाजातिः' इनि वार्तिकेन टापः

---

1. ष्यङोऽभावे काण्डविद्ध शब्दात् स्त्रियाम् 'इतोमनुष्यजातेः' (4.1.65) इति ङीषि इकारलोपे स्वादिकार्येषु कृतेषु रूपमिदम्।
2. अन्नतरापत्यार्थ मित्यर्थः।
3. 'अपत्यं पौत्र प्रभृति गौत्रम्' (4.1.162) इति पारिभाषिकमित्यर्थः।
4. लौकिकम् अपत्यमात्रम् इत्यर्थ। नतु पौत्र प्रभृति।

1. याज्ञ. स्मृतिः आचाराध्याये वर्णजाति विवेक प्रकरणे–श्लोक 92
2. आभीरी तु महाशूद्री जातिपुंयोगयोः समा। (अम. का. 2 व. 6 श्लो. 3)
3. (परि. शे. प. 15)

प्रसक्तिरेव नास्तीति वाच्यम्। सदृशलाक्षणिकस्यैव तत्र गौणत्व रूपतया विवक्षितत्वात्। अतः पतिकृत पापपुण्यादि भाववत्तया शूद्रादः पत्न्यां लक्षणायां सत्यामपि जातिः' इत्यंशाभावेस्यादेव टापः प्रसक्तिः अतः जातिरित्यँशस्य विद्यते एव सार्थक्यम्। किं च गौणमुख्य न्यायः पदकार्यविषये एव प्रवर्तते नतु प्रातिपदिककार्येऽपि पदकार्यत्वं च स्त्रीत्वनिमित्तकत्वेसतिविभक्त्यनिमित्तकत्वम्। अत्र टाप्कार्य स्त्रीत्वनिमित्तकत्वम् अतो न पदकार्यं किन्तु प्रातिपदिककार्यमेव। इदमेव जातिग्रहण गौणमुख्यन्यायस्य पदकार्यविषयत्वज्ञापकमिति। इत्थं सदृशलाक्षणिकानामेव गौणमुख्यन्याये गौण पदेन ग्रहणात् पुंयोगलाक्षणित्वे टाब्भावाय जातिरित्यस्य सार्थक्यं स्पष्टम्।

अत्रेदमवधेयम् 'शूद्राचामहत्पुर्वाजातिः' इत्यत्र शूद्राच इत्येकोऽंशः अहमत्पूर्वेतिद्वितीयोंऽशः, उभयत्राप्यंशे जातिश्चेति सम्बध्यते।

नच अस्यवार्तिकस्य अपवादत्वात् अदन्तत्व प्रयुक्तस्य टापः सामन्यस्य अप्राप्त्या शूद्रेति वार्तिक विहितस्य टापः एव प्रवृत्या अहमत्पूर्वेति निषेधस्यापि जातावेव प्रवृत्या तत्र जातिपदसम्बन्धे व्यर्थ इति वाच्यम्, जात्यन्तर निवृत्ति परत्वे नायं ब्राह्मणः क्षत्रियो वा किन्तु शूद्र इति जातिविवक्षायां महती चासौ शूंद्रा इत्यर्थे महाशूद्रेति टाबेवन्तु टापोनिषेध समुदितस्य जातिवाचकत्वाभावात्। महमत्पूर्वेत्यत्र जातिः इत्यस्य असम्बन्धे अनुपसर्जना धिकारेण प्रधानेन तदन्तविधि सत्वात् जातेरिति ङीष् स्यात्। शूद्र शब्दे जातिवाचकत्वस्य स्त्रीत्वे शूद्र शब्द समवेतत्वस्य च सत्ता निर्बाध एवास्तीति भाष्य प्रदीपोद्योत शब्देन्दु शेखरादिभिः प्रतीयते।

एवं च 'शूद्रशब्दादाप् स्यात् तदन्तेन जातिश्चेद्वाच्या अहमत्पूर्व शब्दष्टापं न लभते समुदायेन जातिश्चेद्वाच्येति वार्तिकार्थः। न च अहमत्पूर्व गृहणा भावेऽपि 'समासप्रत्ययविधौप्रतिषेधः' इति तदन्दविधिनिषेधाच्छुद्र शब्दाट्टापोऽप्राप्त्या तद्व्यर्थमिति वाच्यम् तत्सामर्थ्यादेव स्त्रीप्रत्यये तदन्तविधि ज्ञापने महाशूद्रीत्यत्र टाब्वारणाय तदावश्यकत्वात्। नच स्त्रियामित्यस्य 'पञ्चाजी'त्यत्र गृहयमाण पूर्वसिद्धान्तित तया महाशूद्रीत्यत्र शूद्र शब्दार्थ समवेतस्त्रीत्वा भावान्महाशूद्र निरूपित शक्तेः समुदाय निष्ठतया तद् घटक शूद्रमात्रस्यानर्थक्याच्च टापोऽप्राप्त्या ज्ञापितेपि कथं स्वांशे चरितार्थमिति वाच्यं तदन्तविधि ज्ञापकत्वं पर भाष्य प्रामाण्याच्छुद्र शब्दार्थगत स्त्रीत्वस्यापि महांशूद्रघटक शब्दे स्वीकारात् स्वांशे चारितार्थ्यात्।

अनुलोम संस्काराणामातृ जातिवृत्तित्वेन शूद्र जीबिकादि दर्शनान्महा शूद्रे शूद्रत्वस्यारोपच्छूद्रत्वस्य तत्र सत्वेन तत् सार्थकत्वाच्च। शूद्राभीरमित्यादौ सामान्य विशेषवाचित्वेन साहित्याभावाद्वन्द्वाभावमाशङ्क्य 'आभीराः' जात्यन्तराणीति भाष्यष्तु अनारोपाभिप्रायेण। निषेध कौटौ जातिरित्यस्य सम्बन्धात् ब्राह्मणादिजा-

त्यन्तर निवृत्तये जातिमात्र विवक्षायां महच्छब्दस्य शूद्र शब्देन कुक्कुटाण्डवत्समासे पुनः स्त्रीत्व विवक्षायां महाशूद्रेति समुदाये न कस्याश्चिदपि जातेरप्रतितेः जातिवाचकत्वा भावेन निषेधाप्रवृत्या शूद्रेति प्रथमांशेन तत्र टाप् सिद्धिः । अन्यथा महत्पूर्वत्वादापो निषेधे 'जातेरस्त्री'त्यत्र तदन्त विधौ ङीषापत्तिः स्यात् इति प्रतिफलति ।

परेतु पर्याप्त्या यत्र जातिवाचकत्वं स्त्रीत्वं च तत्रैव टाबित्यर्थः ।

एवं च महत्पूर्वके रूढे पर्याप्त्या तद भावान्महाशूद्रीत्यत्र टापः प्राप्तेरेवा भावाद् शूद्रशब्दे स्त्रीत्वजातिवाचकत्वयोः सत्वात् । तदन्तविधि ज्ञापन पर भाष्यन्तु अधिकार्थपरतया संगमनीयम् । अतएव कैयटेन गोरखरेन्द्र गोप-कृष्ण-सर्पवन्महाशूद्र शब्दो रूढ्या जात्यन्तरमाह । नच तत्र कथमपि शूद्र शब्दार्थ समवेत स्त्रीत्वं सम्भवतीत्युक्तम । अतएव आभीरा जात्यन्तराणीति भाष्यं स्वरसतउपपद्यते । अतएव प्रकृति सूत्रे भाष्ये 'शूद्राचामहत्पूर्वोयत्र महतीशूद्रे इत्यर्थे महाशूद्रेति प्रदर्श्य अहमत्पूर्वाजाते' सम्बन्धमुक्तम् । तदुदाहरणं नोपन्यस्तम् । अतोज्ञायते ज्ञापितेपि तदन्दविधौ स्वांशे चारितार्थः नास्तीति । एवं चामहत्पूर्वग्रहणं व्यर्थमेव भवति । अतः 'शूद्रा' इत्यत्र स्त्रीप्रत्यय टापास्त्रीत्वाव्यतिरिक्त जातिरूपस्याप्यवबोधः, 'शूद्री' इत्यत्र स्त्री प्रत्यय ङीषाच स्त्रीत्व व्यतिरिक्तस्य पुंयोगस्या प्यवबोधो भवतीति निश्चप्रचम् ।

(ख) 'पादोऽन्यतरस्याम्' (4.1.8) अन्तलोपात्मके समासान्ते कृते परिशिष्टः 'पाद' इत्याकारकः शब्दः इह गृहयते । पादः इति पञ्चम्यन्तेन प्रातिपदिकात् इत्यधिकृतस्य विशेषणात् पादः तदन्तविधौ पाच्छब्दाद् विकल्पेन ङीप् भवति । द्वौ पादौ यस्याः इति विग्रहे बहुव्रीहिसमासे 'संख्यासुपूर्वस्य' (5.4.140) इति सूत्रेण पाद शब्दस्याऽकारस्य लोपे प्रकृति सूत्रेण ङीषि भसंज्ञायां 'पादःपत्' (6.4.140) इति सूत्रेण पादः पदादेशे द्विपदी इति जायते रूपम् । ङीबभावेतु द्विपादिति रूपं भवति । किन्तु ऋचिवाच्यायां पादन्तात् प्रातिपदिकात् 'टावृचि' (4.1.9) इति सूत्रेण टाप् भवति । अतः द्वौ पादौ यस्यां ऋचि सा द्विपदा भवति, एकः पादः यस्या ऋचि सा ऋक् एकपदा भवति । एवं च 'द्विपदी' 'द्विपदा' इत्यत्र स्त्रीप्रत्यय ङीष् टाब्भ्याम् जायते अपरार्थस्य चापि बोधः ।

(ग) 'तारकाज्योतिषि' इत्यनेन वार्तिकेन ज्योतिषि वाच्ये तारकेति रूपं निर्दिश्यते । अर्थात् ज्योतिषि वाच्ये तारकेत्यत्र 'प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः' (7.3.44) इति सूत्रेण इत्वं न भवति । तरति इति तारका तृ धातोः प्लवनसंतरणार्थकात् 'कर्तरि ण्वुल्' प्रत्यये अकादेशेऽकारस्य वृद्धौ रपरत्वेटापि तारकेति रूपम् । अत्र ज्योतिः इत्यनेन अक्ष्णः कनीनिका विवक्षिताऽस्ति । तदुक्तम अमर कोशकृता – 'नक्षत्रमृक्षं भ' तारा तारकाप्युवास्त्रियाम् दाक्षायण्यो श्विनीत्या-

दितारा:[1] इति ।

'तारका क्षरण: कनीनिका'[2] इत्यादिना । तथा च ज्योतिषि नेत्रावयव ज्योतिषि वाच्ये तारिका भवति । नक्षत्रे तु तारका इत्येव ।

(घ) 'वर्णकातान्तवे' तान्तवे गम्ये इत्वं न भवति तत्र वर्तकेति रूपं जायते । तन्तूनांविकार: तान्तव तस्मिन् गम्ये वर्णका इति रूपं वर्णका प्रावरण विशेष: । चुरादे: वर्ण वर्णक्रिया विस्तार गुणवचनार्थकात् वर्णधातोर्ण्यंतात् ण्वुल् प्रत्यये अकादेशे णिलोपे टापि वर्णका इति जायते रूपम् । तान्तवात् अन्यत्र वाच्यार्थे वार्णिकेति रूपं भवति । अत: अत्र इत्वं भवति । अत: वर्णिका वर्णयति स्तौति सास्तोत्री वर्णिका भवति । ग्रन्थविशेषस्य संज्ञा वा वार्णिकेति भवति । 'वर्णका' इत्यत्र इत्वाभावो प्रावरण विशेषं गमयति ।

(ङ) 'वर्तका शकुनौ प्राचाम्' (वा. सं. 64) इदमपि वार्तिकम् विद्यते । शकुनि: पक्षी तत्र गम्ये प्राचांमते इत्वं न भवति अतोवर्तकेति रूपं जायते ।

उदीचांमते तु शकुनौ गम्ये इत्वं भवतीति वार्तिकेति जायते रूपम् । 'बर्तयते या सा वर्तका ण्यन्तात् 'वृतु' वर्तने इति धातो: ण्वुलि अकादेशे णिलोपे टापि वर्तकेति जायते रूपं तदुक्तम अमर कोषकृता - 'कौयष्टिकष्टि द्विभको वर्तको वर्तिकादय:'[1] – इति । (2 का. 5 वर्ग. 5 श्लोक.) अशकुन् तु वाच्यार्थे नित्यमेव इत्वं भवति । अतोऽत्र स्त्री प्रत्यय समानेऽपि इत्वद भावाभ्यामर्थ विशेष: प्रतीयेत ।

(च) 'अष्टकापितृदेवत्ये' (वा. स. 641) इदमपि वार्तिकं विद्यते । पितरश्च ता देवताश्च पितृदेवता: तदर्थे पितृदेवत्यम् । पितृ: देवतान्तात् तादर्थ्येयत्' (5.4.24) इति सूत्रेण यत् प्रत्ययो भवति । एवं च पितृदेवत्ये पित्रर्थ: कर्म भवति । तस्मिन् पित्रर्थे कर्मा वाच्ये अष्टकेति भवति भोजनार्थकात् 'अश्' धातो: 'इष्यशिभ्यांतकन्' (उणा. 3 पा. 148 सु) इति तकन प्रत्यये 'व्रश्च' इत्यादिना शस्य ष: तकारस्यइत्वेन टकारे अष्टक शब्दों निष्पद्यते । तस्माट्टापि अष्टका भवति । यथा पाणिने: अष्टध्यायी अष्टिका भवति । अष्टौ अध्याया: परिमाणकस्या सा अष्टिका पाणिने: अष्टाध्यायी तत्र अष्टक शब्दात् टापि सति प्रत्ययस्थादिति इत्वं भवत्येव । अष्टका इत्यके पितृदेवत्ये तु रत्वं न भवति ।

(छ) 'जानपदकुण्डगोणस्थल भाजनागकालनील कुशकामुक कबराद् वृत्य

---

1. नक्षत्रमृक्षं भं तारा तारकाप्युड वा स्त्रियाम् ।
 दाक्षायण्यो श्विनीत्यादि तारा अश्वयुगाश्विनी ॥
 (अ.म.का । व. 2 श्लो 21)
2. (अम. का. 2 व 6 श्लो. 9)

1. (अम. 2 का. 5 वर्ग 35 श्लो.)

मत्रावपनाकृत्रिमा श्राणास्थौल्य वर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' (4. 1.-42) अत्र जानपदेत्यादि कवरादित्यन्तम् एकपदमं। समाहार द्वन्द्वः। पञ्चम्यन्तं पदम्। अत्र एकादशभ्यः जानपदेत्यादि प्रातिपदिकेभ्यः क्रमाद् वृत्त्यादिष्वर्थेषु ङीष् भवति। जनपदे भवा जानपदी वृत्तिः = जीविका भवति अन्यत्र जानपदी समानमेव रूपं भवति। किन्तु स्वर भेदः। यतः तत्र उत्सादित्वातत्वेन 'टिड् ढाणम्द्वयसजदध्नञ् मात्रच् तयप्ठक् ठञ् कञ् क्वरपः' (4.1.15) इति सूत्रेण ङीपि आद्युदातः जानपदी शब्दो भवति, वृत्तौ अर्थे ङीषि जानपदी शब्दः अन्तोदात्तो भवति। वृत्तिः वर्तते अनया इति व्युत्पत्त्या वृत्तिर्जीविका भवति अन्या जानपदी स्त्री प्रभृति भवितुमर्हति इति स्वर भेदेन उच्चारण भेदः। अमत्रे = पात्र विशेषे कुण्डीति रूपं भवति। तदुक्तम् अमरकोशकृता भाजनम् इति।

– पिठरं स्थाल्युरवा कुण्ड[1] कलशस्तु त्रिषुदयोः

कुण्ड शब्दस्य स्त्रीत्वमपि ङीष् विधि सामर्थ्यादेव सिध्यति। तदुक्तं मेदिनी-कृता 'पिढरेतु न नाःकुण्डम" इत्यनेन पात्रातिरिक्ते अर्थे कुण्डा भवति। दहनीया तदर्थो भवति। तत्र दाहार्थकात् 'कुडि'[2] धातोः 'गुरोश्च हलः' (3.3.103) इति सूत्रेण 'अ' प्रत्येक कुण्ड शब्दो निष्पद्यते, ततः टापि कुण्डेति। यस्तु 'अमृते जारजः कुण्डो मृते (च्युते) भर्तरिगोलकः इति[3] अमरकोषेण मनुष्य जातिवाचकं तत्र ङीष् भवत्येव। अमत्रेहि स्त्री विषयत्वात् अप्राप्तो ङीष् विधीयते नतु नियम्यते। नच अमत्रेऽपि वाच्ये कुण्डशब्दात् जातिलक्षण ङीषि सिद्धे तद्वचनं व्यर्थं नचअं मत्र एव ङीषिति नियमार्थस्तदिति वाच्यम् एवं सति मनुष्य जातिविशेष वाचित्वे ङीषोऽनु-पत्ते।

अमत्रे कुण्ड शब्दोनित्यस्त्रीलिङ्गः 'पदान्तरं विना स्त्रियां वर्तमानत्वं नित्य-स्त्रीत्वमिति स्वीकारात्। तदुक्तं मेदिनीकोषकृता[4]—

"कुण्डी कमण्डलौ जारात् पतिपत्नीसुते पुमान' इत्यनेन च कुण्ड शब्दात् जातिलक्षण ङीष् प्रत्ययः प्राप्त एव विधीयते नतु नियम्यते। अतोमनुष्य जातिवा-चित्वेऽपि ङीष् प्रत्ययो निर्बाध एवेति मन्तव्यम्। ओप्यते निक्षिप्यते अस्मिन्नित्यर्थे

---

1. पिठरः स्थाल्युरवा कुण्डं कलशस्तु त्रिषुद्वयो। ..........
   (अम. का. 2 व. 9 श्लो. 31)
2. मेदिनी ठान्तवर्ग श्लो. 5
3. (तु. आ. अ.)
4. अम. का. 2 वः. 7 श्लोकः 46
5. मेदिनी शब्दकोशे उद्धिकम् (शब्दवर्ग) श्लोकः 4 पृ. 40

आङ् पूर्वाद्वपेल्युटि[1] आवपनं भवति तस्मिन् अर्थे गौणी भवति, कस्याश्चिदिदंनाम। यथा पाणिने र्मातुर्नाम गौणी आसीत् इति श्रूयते। अकृत्रिमायाम् अर्थे स्थली भवति, अन्यार्थे स्थला भवति। इदानीन्तनपुरुष परिष्कृता भूमिः कृत्रिमा, तद् भिन्ना अकृत्रिमा। अतः अकृत्रिमा भूमि स्थली भवति कृत्रिमा भूमि यजुर्वेद। भाषायामपि श्राद्धस्थलेत्यादि प्रयोगो दृश्यते एव। भाजीश्राणायामर्थे भवति। भज्यते सेव्यते इति भजेः[2] कर्मणि अर्थे घञ्ि भाजशब्दः सिद्ध्यति ततो ङीपि। भाजी इति भवति, श्राणातिरिक्ते अर्थे भाजा भवति अश्राणेत्यर्थः। तदुक्तम् **अमरुकोष कृता—''यवागूरुष्णिका श्राणा'**[3] इति। पाकार्थकात् **'श्रा'**[4] **धातोः 'क्त' प्रत्यये** निष्ठानत्वे, णत्वे च कृते श्राणेति सम्पद्यते। पक्वा इति तदर्थः। अतः श्राणायाः भाजी, अन्यत्र भाजा इति प्रयोगः। गजवाची नागशब्दः दैर्घ्यगुणयोगात् कस्यां च स्त्रियां स्थौल्य दर्शनात्, नागसादृश्यात् युक्तं नागी। अन्यत्र कृशायां स्त्रियां प्रयुक्तः 'नागा' प्रत्युदाहरणं भवति। वर्णः प्रवृत्तिनिमित्तं चेत् स्त्रियांकाली भवति। अतः काली वर्ण विशिष्टेति तदर्थः प्रतिफलति।

अन्यथा काल शब्दस्य 'गुणे शुक्लादयः पुंसि' इति पुंस्त्वमापद्येत। वर्ण शब्दः अर्श आद्यजन्तः ततःटापि काली भवति। सूत्रे वर्णा इति च्छेदः कर्तव्य। अन्याक्रोर्ययुक्ता स्थी काला भवति। संज्ञाशब्दों वा कालेति। बस्त्र भिन्नं गवादिकम् अनाच्छादनं तत्र नीली भवति, अन्या नीलाशाटी उच्यते। नच आच्छादनस्य विशेषयत्वे स्त्रीत्वानुपपतिः। पटीत्यस्य विशेष्यत्वे तु नील वर्णावती पटीत्यर्थे ङीषः अप्रसक्तिरेव, 'नीलादोषधौ' 'प्राणिनि च' इति नियमस्य वक्ष्यमाणत्वादिति वाच्यम् नील्या ओषध्या रागविशेषं प्राप्तेत्यर्थः। नच नीला कुण्डीत्यत्रापि अनाच्छादनत्वात् ङीष् स्यादिति वाच्यम् यतोनीलाद्अनाच्छादनेऽपि भवतः ङीष् प्रत्ययस्य नीलादोषधौ प्राणिनि च नियमात् कुण्डेऽर्थे न भवति ङीष्। एवं च नीलाकुण्डीत्यादौ न ङीष् भवतीति नन्तव्यम्। 'संज्ञगां वा' इत्यपि वार्तिकम्। संज्ञयामुक्त विषये तदन्यत्रापि ङीष् वा स्यात् इति तदर्थः। 'नीली' नीला' इति च जायेते रूपे। अयोविकारश्चे दिति फाला इति विशेषे प्रसिद्धेऽर्थे कुशी भवति, अन्यन्त्र कुशा भवति। छन्दोगसूत्रे '**प्रस्तोता तु कुशाः कारयेदयज्ञियस्य वृक्षस्य रवदिरस्य दीर्घं सत्रेष्वेके** प्रादेशमात्रीः कुशपृष्ठास्त्वक्तस्समामसज्जते' इति प्रसिद्धः। 'कामयते मैथुन मू'

---

1: (दि. आ. स.)

2. (चु. उ. से.)

3. अम. का. ब. 9 श्लो. 50

4. भ्वा. प.

इति कामुकी भवति। कमयितुं शीलमस्या इति विग्रहे **'कम्'**[1] **धातोः**, उक्' प्रत्यये कामुकीति रूपम्। मैथुनेच्छावती चेत् कामुकी। धनादीच्छावती कामुका भवतीति मन्तव्यम्। केशानां सन्निवेश कबरी भवति, अन्या कबरा भवति। चित्रेति तदर्थः।

(ज) 'हिमारण्ययोर्महत्वे' (वा. 4.1.49) महद्धिमं हिमानी भवति, महदरण्यम् अरण्यानी भवति महत्वयोगे स्त्रीत्वमित एवज्ञेयम्।

(झ) 'यवाद्दोषे' (वा. 4.1.49) दुष्टयवे वृत्तौ स्त्रीत्वम् अतएब ज्ञेयम्। अतः दुष्टो यवो यवानी, साधारणस्तु यवः एव।

(ञ) 'यवनाल्लिप्याम्' (वा. 2474) यवनानां लिपिः यवनानी फारसी लिपिः।

(ट) (पाणिहीगृतीभार्यायाम्) (वा0 4.1.52)

विधिवत् ऊढास्त्री भार्या तस्यां विद्यमानादेब पाणिगृहीत शब्दाद् ङीष् भवति। विवाह काले विधिवत् पाणिगृहीता या भार्या सा भार्या पाणिगृहीती। प्रेमिका दास्यादिस्तु पाणिगृहीता।

इत्थं शूद्रा, शूद्री, महाशूद्री, द्विपदी, तारका, तारिका, वर्णका, वर्णिका, वर्तका वर्तिका, अष्टका, अष्टिका, जानपदी, जानपदा, कुण्डी, कुण्डा, गोणी, गोणा, स्थली, स्थला, भाजी, भाजा, नागी, नागा, काली, काला, नीली, नीला, कुशी, कुशा, कामुकी, कामुका, कबरी, कबरा, यवानी, यवनानी, पाणिगृहीती, पाणिगृहीता इत्यादि शब्देषु स्त्री प्रत्यय सद्भावेपि स्त्रीत्वव्यतिरिक्ता अप्यर्थाः अष्टम् अव भासन्ते। अतः स्त्रीप्रत्ययस्थलेषुकेषुचित् स्त्रीत्वव्यतिरिक्ता अप्यर्थाः कारण विशेषत् प्रतीयमानाः सन्त्येवेति निश्चप्रचम्।

**(घ) टाबादि स्त्री प्रत्ययानुबन्धाः**

टाबादि स्त्री प्रत्यय पदेन "स्त्रियाम्" (पा. 4.1.3) इत्यधिकारे विहितास्तद्धित भिन्नाः प्रत्ययाः गृह्यन्ते। ति प्रत्ययः ष्यङ् प्रत्ययश्च" स्त्रियाम्" इत्यधिकारे विहितो। अतस्तयो व्यावृत्तय् तद्धित भिन्नाः इत्युक्तम्। ते च ङकार-चकारटकार-डकार-नकार-पकार-वकारानुबन्धैः ङित् चित् टित्-डित्-नित-पित् षिद् भेदेन सप्तधाः सन्ति।

**ङकारादिसप्तानुबन्धानां स प्रयोजनं निरूपणम्**

---

1. भ्वा. सं. भ्वा.

(1) तत्रङकार:—ऊङ्[1] ङीन्[2] ङीप्[3] ङीष्[4] इत्येते चत्वार- आसक्त ङकारानुन्धा: प्रत्यया:। तेषु प्रथमस्थङकारानुत्रन्ध: नोङधात्वो: (पा. 6.1.175) इत्यत्र वशेषरणार्थ:। तथाहि उङियदि ङकारो नानुबध्येत र्ताह नोङ्धात्वो: इत्यस्मिन्नपि सूत्रे ङकारो नावश्यक: स्यात्। यतो ङकारनुबन्धवान् उकार: कश्चनान्य: प्रत्ययो न दृश्यते। ततश्च 'नोघात्वो: इत्येव सूत्रं क्रियेत। तथासति "उदात्तयणोहल् पूर्वात् (पा. 6.1.174) इति विहितस्य "यवाग्वा यवाग्वे इत्यत्र तृतीयादेर्विभक्तेराद्युदात्तत्वस्य प्रनिषेधापत्ति: स्यात्।

अर्थवद्ग्रहणे नानर्थकस्य 'इति परिभाषया अर्थवानेव उकार: नो धात्वो:" इत्यत्र गृहीतो भवेत्। यवागू शब्दे च उकारो नार्थवान् किन्तु अगूच प्रत्यय एवार्थवान्। यतोयवागू शब्द: "सृयुवचिभ्यो न्युजागूज क्नुच:" (उणादि 361) इति अमूच् प्रत्ययान्तो विद्यते।

यवाग्वे इत्यत्र अनर्थकस्य उकारस्य स्थाने जायमानस्ययणो ग्रहणा भावात् तत्प्रवृत्तिर्न स्याद् अतोऽङकाराबन्धो न विशेषणार्थ:, इति वक्तु न शक्यते। यतो र्थवद्ग्रहणपरिभाषा वर्णग्रहणे न प्रवर्तते। अत्र ऊकाररूपस्यैव ग्रहणमिति न तय परिभाषया तयो: प्रयोगयोस्तेन सूत्रेण प्रसक्त उदात्तत्व प्रतिषेधो वारयितु शक्यते। यदि ऊङि ङकारानुबन्ध आसज्यते तदा "नोङधात्वो:" (पा. 6.1.175) इत्येवा सूत्रं क्रियते। तथासति तयो:प्रयोगयो: ऊङोऽभावात् न भवति तृतीयादेर्विभक्तेस्दात्तत्वप्रतिषेधप्रसक्ति:। ज्ञायते च तृतीयादेर्विभक्तेरूदात्तत्वप्रतिषेधा व्रह्मवन्ध्वा ब्रह्मबन्ध्वे इत्यादौ। यवस्वत्रवकाररूपो यण् "ऊंङ.त" (4.1.66) इति विहितस्य ऊङ: स्थाने जातोस्ति। अतोऽत्रङकारानुबन्धो विशेषणार्थ इति निश्चियते।

ङीन्-ङीप्-ङीषां ङकारानुबन्धानां तु ङ्याप्प्रातिपदिकात्" (पा. 4.1.11) इत्यादौ सामान्यग्रहण सम्पादनमेव प्रयोजनं विद्यते। यदि एषु अन्यतमेऽपि ङकाराबन्धो नासज्येत तर्हि यत्र ङकारो नानुबद्धस्तस्य तत्र सूत्रेषु ग्रहणं न स्यात्। सति तु एषु त्रिषु ङकारानुबन्धे द्वयनुबन्धकतया समेषां त्रयाणामेषां ग्रहणं सम्पद्यते। इत्थमेषु सामान्य ग्रहणार्थोङकारानुबन्धो इति विज्ञायते। सामान्यग्रहणादेव च वैदी (वेद + ङीन), कुमारी (कुमार-ङीप्, सारङ्ग + ङीष्) इत्यादौङयन्तत्वात् स्वाद्युत्पपि: सलोपश्च सिध्यति।

---

1. अष्टा0 4.1.6672
2. अष्टा0 4.1.73
3. अष्टा0 4.1.58, 15, 16-20-21-26-31-36-39-60
4. अष्टा0 4.1.32, 40-55-61-65

**2. तत्रचकारः--**

चाप् (4·1·64-74) इत्येक एव चकारानुबन्धानुबद्धष्टावादि प्रत्ययः। चकारानुबन्धस्यात्तसामान्यग्रहणाविधातः स्वरश्चेति द्वे प्रयोजने स्तः। तत्राद्य यथा—

ङ्याप्प्रातिपदिकात् (4·1·1) हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् 'पा. 6·1·68 औङ आपः (7·1·18) आङि चापः' (7·3·105), याडापः" (7·3·113)। सति चापि चकारानुबन्धे एषु 'एकानुबन्धग्रहणे न द्वयनुबन्धकस्य, इति परिभाषयास्यैव ग्रहणं स्यात् टाप् डापो ग्रहणं न स्यात्। यतः टाप् डापौद्वयनुबन्धकौ। सति चात्र चकारानुबन्धे–चाप् टाप् डापां त्रयाणामपि द्वयनुबन्धकस्यकस्यचनपोऽभावात् तत्तत्सूत्रारम्भ सामर्थ्येन त्रयाणामेषां ग्रहण सिध्यति। एष् सामान्यग्रहणाभावे हि अजा (अज + टाप्), सीमा (सीमन् + डाप्) इत्यादौ ङ्याप्प्रातिपदिकात् इति स्वाद्युत्पतिः, हल्ङ्याप् इति सुलोपः, अजे (अजा + औ) सीमे (सीमा + औ) इत्यादौ 'औङआप' इति औङः स्यादेशः, अजया (अज + टा) सीमया (सीमा + टा) इत्यादौ 'आङिचापः। इत्येत्वम् अजायै, अजायाः, अजायाम् (अजा + ङे, ङसि' ङस्. ङि) इत्यादौ, सीमायै सीमायाः, सीमायाः, सीमायाम् (सीमन् + ङे) ङसि, ङस् ङि) इत्यादौ याडापः इति याडागमश्च न सिध्येयुः। तेषु सामान्य ग्रहणे तु सर्वे विधयः सिध्यन्ति।

द्वितीयं यथा—कौसल्या। अत्रहि ,,चितः (6·1·163) इत्यनेन विहितमन्तोदात्तत्वं चापश्चकारानुबन्धः चित्वसम्पादनद्वारा सम्पादयति। यद्यप्यत्रचापः पित्वात्, अनुदात्तौसुप्पितौ पा. (3·1·4) इत्यनुदात्तत्वं प्राप्नोति। तथापि तन्न भवति। यतः पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिषावलेन परत्वात् चितः इत्येतदेव प्रवर्तते। यत्र पूर्वं पर चेति द्वेशास्त्रे युगत् प्राप्नुतः उभे च सावकाशतयातुल्यबले भवतस्तत्र "विप्रतिषेधेपरंकार्यम् (4·1·2) इति सूत्रेण परमेवेति नियम्यते। तेन पूर्वात्परं बलवदिति सिध्यति। प्रकृते अनुदात्तौसुप्पितौ" पूर्वशास्त्रं परञ्च चितः इति।

**3. तत्रटकारः**

टाप् (4·1·49) इत्येक एव टकारानुबन्धानुबद्धष्टाबादि प्रत्ययः। टकारानुबन्धस्य सामान्यग्रहणाविधात एवं प्रयोजनम्। यथा ङ्याप्प्रातिपदिकात् (4·1·1) 'हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल्' (6·1·68) 'औङआपः (7 1·18) आङिचापः (7·3·105) 'याडापः' (7 3·113) असति चाप टकारानुबन्धे एषु एकानुबन्ध

ग्रहणेनद्वयनुबन्धकस्य इति परिषयास्यैव ग्रहणं स्यात् चाब्डापोर्ग्रहणं न स्यात्। यतः चाब्डापौ द्वयनुबन्धकौ। सति चात्र टकारानुबन्धे टाप्-चाप्-डापांत्रयाणामपि द्वयनुबन्धकतया, एकानुबन्धकस्य कस्यचनापोऽभावात् तत्तत्सूत्रारम्भसामर्थ्येन त्रयाणामेषां ग्रहणं सम्पद्यते। एषु सामान्यग्रहणाभावेहि ,आम्बष्ठ्या' (आम्बष्ठ्य + चाप्) सीमा (सीमन् + डाप् (इत्यादौ—ङ्यापप्रातिपदिकात् इति स्वाद्युत्पतिः, हल्ङ्याब्भ्यः इति सुलोपः 'आम्बष्ठ्ये' (आम्बष्ठ्या + औ) सीमे (सीमन् + औ) इत्यादो औङआपः, इति आङ श्यादेशः आम्बष्ठ्यया (आम्बष्ड्या + टाप) सीमया (सीमन् + टाप्) इत्यादौ आङिचाप. इत्येत्वम् आम्बष्ठयायै, आम्बष्ठयायाः 2, आम्बष्ठ्यायाम्, (आम्बष्ठ्या + ङे, ङसि, ङस्, ङि) इत्यादौ सीमायौ सीमायाः 2, सीमायाम् (सीमन् + ङे, ङसि, ङस्, ङि) इत्यादौ याडापः इति याडागमश्च न भवेयुः। तेषु सामान्य ग्रहणेतु सर्वाणीमानि कार्याणि जायन्ते।

**4. तत्र-डकारः—**

टाबादि प्रत्ययेषु डकारानुबन्धानबद्ध डाप् (4·1·13) इत्येक एव प्रत्थयो विद्यते। अत्र डकारानुबन्धस्य सामान्यग्रहणाविधातः टिलोपश्चेति द्वे प्रयोजने स्तः।

तत्राद्यं यथा—ङ्याप्प्रातिपदिकात्—(पा. 4·1·1) 'हल्ङ्याब्भ्योदीर्घात् सुतिस्यपृक्तं हल्' (6·1·68) 'औङ.आपः' (7·1·18) 'आङि.चापः' (7·3·105) 'याडापः'—7·3·113)। असति चात्र डकारानुबन्धे एषु एकानुबन्धकग्रहणे न द्वयनुबन्धकस्य' इति परिषाषयास्यैव ग्रहणं स्यात् चाप् टापोर्ग्रहण न स्यात्। यतश्चाप् टापौ द्वयनुबन्ध कौ। सति चात्र डकारानुबन्धे चाप्-टाप्-डापां त्रयाणामेव द्वयनुबन्धकतया, एकानुबन्धकस्य कस्याचनापोऽभावात् तत्तत्सूत्रप्रामाण्यात् त्रयणामेषां ग्रहणं भवति। एषु सामान्यग्रहणाभावे हि (कौसल्या + आप्) अश्वा (अश्व + टाप्) इत्यादौ ङ्याप्प्रातिपदिकात् इतिस्वाद्युत्पत्तिः 'हल्ङ्याब्भ्योदीर्घात्' इति सुलोपः, कौसल्ये (कौसल्यया + औ) अश्वे (अश्वा + औ) औङ.आपः। इति आङ. श्यादेशः कौसल्याया (कौसल्य + टा) अश्वया (अश्वा + टा) इत्यादौ आङि.चापः इत्येत्वं, कौसल्यायै कौसल्यायाः 2 कौसल्यायाम् 'कौसल्या + ङे, ङसि, ङस्, ङि.) इत्यादौ याङापः इति याडागमश्च न जायेरन् तेषु सामान्यग्रहणेतु सर्वे जायन्ते विधयः।

---

1. परिभोषेन्दुशेखरः परिभाषा 38

द्वितीयं यथा :—पामा (पामन+डाप्) बहुराजा (बहुराजन्+डाप्) अत्र हि डापोड कारानुबन्धो डित्वसम्पादनद्वारा 'टेः (6·4·4·143) इति विहितं टेरनोलोपं सम्पादयति ।

**5. तत्रनकारः—**

ङीन् (पा. 4·1·73) इत्येक एव टाबादिप्रत्ययेषु नकारानुबन्धानुबद्धः प्रत्ययो वर्तते तत्र नकारानुबन्धस्य ञ्नित्यादिर्नित्यम्' (6·1·191) इति विहितस्या द्युदात्तत्वस्य सिद्धिरेव प्रयोजनम् । यथा शाङ्गॅरवी । अत्र ही ङीनो नित्वाद् इकारस्याद्युदातत्वं सिध्यति ।

**6. तत्रपकारः —**

ङीप्[1]-चाप्[2]-टाप्[3]-डाप्[4]-इत्येते चत्वारः पकारानुबन्धाष्टाबादि प्रत्ययाः । तत्र पकारानुबन्धानां स्वरः क्वचित्सामान्यग्रहणं कवचित्सामान्यग्रहणाविधातश्चेति त्रीणि प्रयोजनानि सन्ति । तत्र-आद्यं यथा कर्त्री (कर्तृ+ङीप्) अजा (अज+टाप्) सीमा (सीमन्+डाप्) । अत्र हि ङीपादीनां पकारानुबन्धाः पित्वसम्पादन द्वारा 'अनुदात्तौ सुप्पितौ' इति विहितमनुदात्तत्वम् आकारादीनां सम्पादयन्ति । असत्सु पकारानुबन्धेषु एषां चतुर्णां पित्वाभावात् पित्वप्रयुक्तमनुदात्तत्व तेन सूत्रेण न सिध्येत् । चापः पकारस्तु न स्वार्थः । यतः पित्वप्रयुक्तमनुदात्तत्वं, चितः (इति विहितमन्तोदात्तत्वं परत्वाद् बाधते । चापोहि चकारानुबन्धस्तं चितं सम्पादयति ।

द्वितीयं यथा 'ङ्याप्प्रातिपदिकात्' 'औङ आप', 'आङिचापः' 'याडापः', 'हल्ङ्याब्भ्यः' इति । एतेषु हि आप् पदेन टाप् प्रभृतीनां त्रयाणां ग्रहणमिष्टं तच्च यदि एतेषु त्रिषु कवचिदपि पकारोनानुबध्येत तदा न सिध्येत् । यतः 'सानुबन्धकग्रहणेननिरनुबन्धकस्य' इति परिभाषयापकारानुबन्धविहितस्य तेषु सूत्रेषु आप् पदेन ग्रहणं न स्यात् । सति तु सर्वत्र-पकारानुबन्धे एतेषांत्रयाणां ग्रहणं सिध्यति । इत्थं सामान्यग्रहणार्थं एषां त्रयाणां पकारानुबन्धा इतिनिश्चीयते । सामान्यग्रहणादेव च आम्बट्यायै अजे-सीमे-इत्येतेषु "औङ आप" इति विहित औ यादेशः आम्बष्ट्-

---

1. अष्टा. 4·15-8-15-16-20-21-26-31-36-60-61
2. अष्टा. 4·1·74-75
3. अष्टा. 4·1·4·9
4. अष्टा. 4·1·13

यया, अजया, सीमया इत्येतेषु 'औङ आपः' आङि. चापः इति विहितमेत्वम् आम्बष्ठ्यायै, आम्बष्ठ्यायाः—आम्बष्ठ्यायाम् अजायै, अजायाः अजायाम् सीमायै, सीमायाः सीमायाम् इत्येतेषु याडापः इति ङितोविहितो याडागमः आम्बष्ठ्याया, अजा, सीमा इत्येतेषु हलङ्याप् इति विहितः सुलोपश्च सिध्यन्ति । अन्यथा इमे विधयो न सिध्येयुः ।

तृतीयं यथा ङीपः पकारोऽनुबन्ध 'ङ्याप्प्रातिपदिकात्', 'हलङ्याब्भ्यः' इत्यत्र ङीन् ङीप् ङीषां ग्रहणार्थः । असति हि ङीपि पकारानुबन्धे तत्र सूत्रे—'एकानुबन्धकग्रहणेनद्वयनुबन्धकस्य' इति परिभाषया ङीप् एव ग्रहणं स्यात् ङीन्ङीषो ग्रहणं न स्याद् द्वयनुबन्धकत्वात् । सति पुनरत्र पकारानुबन्धे ङीन्ङीप्वद् ङीषोऽपि द्वयनुबन्धकतया, एकानुबन्धकस्य ङेरयावाद् ङ्याप्प्रातिपदिकात्, 'हल्ङ्याब्' इत्युभयत्र अगत्याङीन् ङीप्-ङीष् इति ङीसामान्यस्य तत्र ग्रहणं जायते । इत्थं सामान्यग्रहणाविधातार्थ ङीपः पकारानुबन्ध इति निश्चीयते । अनयोः सूत्रयोः ङीसामान्यस्य ग्रहणादेव शाङ्गरवी (शाङ्गरव + ङीन्) कर्त्री (कर्तृ + ङीप्) नर्तकी (नर्तक + ङीष्) इत्यादिषु ङ्याप्प्रातिपदिकात् इति स्वादि विधिः हलङ्याब्भ्यः' इति सुलोपश्चसिध्यतः । अन्यथा तेषु प्रयोगेषु तौ न सिध्येताम् ।

**7. तत्र षकारः—**

टाबादि प्रत्ययेषु षकारानुबन्धवान् ङीष्[1] इत्येक एवास्ति प्रत्ययः । तत्र षकारानुबन्धस्य सामान्य ग्रहणाविधातार्थं सम्पादनपूर्वकं स्वरः इत्यैकं प्रयोजनम् । यथा घटोघ्नी (घट उधस् + अनङ् + ङीष्) अत्र हि यदि षकारोनानुबध्येत तर्हि "ङ्याप्प्रातिपदिकात्" इत्यादौ ङी ग्रहणेन ङीन् ङीपोरेव ग्रहणं स्यान्नङीषः । सति तु षकारानुबन्धे ङीषोऽपि ङीन् ङीप्वद् ग्रहणं सम्भवति द्वयनुबन्धकत्वात् । इत्थं षकारानुबन्धो ङीष् टितसूत्रेषु सामान्य ग्रहणाविधातार्थइति निश्चीयते । यद्यप्यत्र पकारानुबन्धे कृतेऽपि सामान्यग्रहणा विधातः सिध्यति तथापि इष्टस्याद्युदात्तत्वलक्षणस्वरस्य सिद्धिर्नस्यात् । पित्वाद्धि 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्व प्रसज्येत । षकारानुबन्धे कृते तु ङीषः पित्त्वाभावात् अनुदात्तत्वस्याप्राप्त्या आद्युदातश्च (3·1·31) इति विहितमाद्युदात्तत्वमिष्टं सिध्यति ।

इत्थं सामान्यग्रहणाविधातपूर्वकमाद्युदात्तत्वलक्षणस्वरसिद्धिः षकारानुबन्धस्य प्रयोजनमिति स्फुटं विज्ञायते ।

---

1. अष्टा. 4·1·25-32-40-55-61-64-65

'तद्धिताः (4.1.76) इत्यधिकार विहिताश्च स्त्रीप्रत्याः 'ति-ष्फ-ष्यङ्'-इत्येतेत्रयः सन्ति। तत्र 'ति' प्रत्ययोनिरनुबन्धकः, ष्फस्ये षकारानुबन्धः 'षिद् गौरादिभ्यश्च' (4.1.41। इति षित्कार्यार्थः, ष्यङ्ः षकाराङ्कारानुबन्धौ 'यङश्चाप्' (4.1.74) इत्यत्र 'यङ्-ष्यङोः सामान्य ग्रहणार्था इत्यलं पल्लवितेन।

## (ङ) निष्कर्षः

यद्यपि लिङ्ग्यतेऽनेनेति व्युत्पत्या' लिगि धातोः करणे घञ् निष्पन्नोऽयं लिङ्गशब्दः। व्यवहारात् कोषाच्च क्लीवलिङ्गः नानार्थकश्चविद्यते, तथापि पानिणीय व्याकरणे लक्षणार्थकः नपुंसकोऽयंलिङ्गशब्दः गृह्यते। तथा च लक्षणत्वमेव लिङ्गत्वम्, लिङ्गञ्च पुंस्त्व स्त्रीत्व नपुंसकत्व भेदैः त्रिविधम्। त्रिविधं चैतत् लौकिकशास्त्रीय भेदेन द्विविधम्। तत्र लौकीक लिङ्गत्व लिङ्गपदशक्यतांवच्छेदक पुंस्त्वादिकम्। तत्र मेढ्वत्वं लौकिकं पुंस्त्वम्। योनिमत्वं लौकिक स्त्रीत्वम्, लौकिक नपुंसकत्वं तु रोगवय प्रभृत्य प्रयोज्यमिथुनकर्मयोग्यत्वाभावयुत मेढ्र भगान्यतर वत्वेसति पुंत्वस्त्रीत्वान्यतर प्रयुक्तश्मश्रुस्तनादि शून्यत्वम्। अत्र सत्यन्त निवेशः, बालेऽपि इयं व्यक्तिर्नपुंसकमिति व्यवहारोमाभूत इत्येतदर्थः। लौकिकं चेदं लिङ्गं चेतनामात्रवाचक ब्राह्मणकुमारादि वाच्यम्, नहि अचेतनेषु लौकिकं लिङ्गं संभवति मेढ्वत्वादि धर्माभावात्।

शास्त्रीयन्तु लिङ्गं लौकिकलिङ्गात् विलक्षणमेव व्याकरणशास्त्रे 'तस्माच्छसोनः पुंसि' (6.1.103) इत्यादौ निमित्ततयाऽऽश्रीयते। यतः तत्र लौकिकं लिङ्गनिमित्ततया शक्यमाश्रयितुं घटानि इत्यादौ नत्वाद्यभावापत्तेः।

शास्त्रीयंलिङ्गन्तु चेतना चेतन शकलपदार्थेषु विद्यते। अतः तत् केवलान्वयि। तत्र सत्वादिगुनानाम् उपचयः = वृद्धिः शास्त्रीयं पुंस्त्वं, सत्वादिगुणानाम् अपचयः = ह्रासः शास्त्रीयं पुंस्त्वम्, सत्वादिगुणानां साम्यं = स्थितिमात्रं शास्त्रीयं नपुंसकत्वम्

यतः सांख्यमते पुरुषातिरिक्त पदार्थमात्रस्य सत्वरजस्तमः स्वरूप प्रकृति परिणाम रूपतयात्रिगुणात्मकत्वेन सत्वादीनाञ्च स्वेतरगुणापेक्षया वृद्धि ह्रास साम्यरूपो पचयापचयस्थितीनां सद्भावः स्वीकृतः। अतएव पदार्थमात्रे 'अयं पदार्थः' इयंव्यक्तिः 'इदं वस्तु' इति त्रीलिङ्ग व्यवहारो दरीदृश्यते। नचैवं' पुरुषे ब्राह्मणी' 'ब्राह्मण्यां ब्राह्मणः' ब्राह्मण' मित्यादि प्रयोगापत्तिः शङ्क्या। यतः सर्वत्र लिङ्ग सत्वेऽपि तत्तल्लिङ्ग

---

1. लिङ्गं चिह्नेनुमानेच सांख्योक्त प्रकृतावपि।
शिवमूर्ति विशेषे च मेहनेऽपि नपुंसकम्॥ (इतिमेदिनीकोशे गान्तवर्गः तृतीयः श्लोक 21

विवक्षया तत्तल्लिङ्गबोधकत्व निमित्तक तत्तत् कार्य प्रवृत्तिः भवतीति स्वीक्रियते। अयमाशयः अचेतननिष्ठ प्रवृत्तिनिमित्तक शब्दानां सत्वादि गुणोपचयादिरूप शास्त्रीय-लिङ्ग बोधकत्वमेव विवक्षितम्, चेतननिष्ठ प्रवृत्ति निमित्तक शब्दानां तु शास्त्रीय-लिङ्गसहित लौकिक स्तनादि वत्वादिरूप लिङ्ग बोधकत्वमेव विवक्षितम्। कस्य शब्दस्य किं लिङ्गबोधकत्वमित्यत्रतु कोष एव प्रमाणम्। कस्य चिदेकलिङ्गबोध-कत्वं, कस्यचिल्लिङ्गद्वय बोधकत्वं, 'कस्य चिल्लिङ्गत्रय बोधकत्व' मित्यादि कोषादेवावगन्तुं शक्यम्। तथा च ब्राह्मणे ब्राह्मणी शब्दवाच्यस्य शास्त्रीयस्त्रीत्वस्य सत्वेऽपि लौकिकस्त्रीत्वस्याभावेन शास्त्रीयलिङ्गसहित लौकिक लिङ्गस्याभावात् न ब्राह्मणे ब्राह्मणी शब्दस्य नवा ब्राह्मण्यां ब्राह्मण शब्दस्य प्रयोगः। ब्राह्मण शास्त्रीय नपुंसकत्वलिङ्ग बोधकत्वाभावेन लोकिक नपुंसकत्वलिङ्गवत्वेपि, 'ब्राह्मणमिति प्रयोगो न जायते। शास्त्रघटके स्त्रीपुन्नपुंसकशब्दानां च शास्त्रीय स्त्रीत्वादिलिङ्ग-बोधकतया अचेतन बोधक शब्देषु शास्त्रीयलिङ्गबोधकेषु शास्त्रीयतत्तलिङ्गबोध-कत्व विवक्षितमिति लतेत्यादौ टाबादि सिद्धिः, चेतननिष्ठ प्रवृत्तिनिमित्तकेषु शब्देषु च शास्त्रीयतत्तलिङ्ग सहित लौकिक तत्तल्लिङ्ग बोधकेषु शास्त्रीयतत्तल्लि-ङ्गबोधकत्वमादाय शास्त्रीयं कार्यसिद्धिः। अतएव हरिणात्यादौ णत्वादयः सिद्धयन्ति।

पुंमादि शब्दस्य पुंस्त्वादिधर्मपरत्वं लिङ्ग शब्दस्य लक्षणाया लिङ्गरूपार्थ परत्वं स्वीकृत्यपुंस्त्वं लिङ्गम् अर्थो यस्य असौ पुंल्लिङ्गः, स्त्रीत्वं लिङ्म् अर्थो यस्यासौ स्त्रीलिङ्गः। नपुंसकत्व लिङ्गम् अर्थो यस्य स नपुंसकल्लिङ्गः। इत्थं पुंल्लिङ्गादि शब्दस्य व्युत्पत्तिः कार्या। पुंस्त्रीनपुंसक व्यक्तीनां लक्षण स्वरूप लौकिकं लिङ्गम् आकृतिग्राह्यमिति प्रत्यक्षेणैवावगन्तुं शक्यम्, 'इयं स्त्री' अयं पुमान् एष जनो नपुंसकमित्याद्युदेशेन च ग्रहितुं शक्यम्, नतु 'धञ्जपाःपुंसि' इति लिङ्गानुशासनेन, नापिकोषेन ताभ्यां हि न लौकिक लिङ्गमुपदिश्यते।

शास्त्रीयन्तु गुणोपचयादिरूपं लिङ्गम्, 'धञ्जपा पुंसि' देवतास्त्रियाम् इत्यादि शास्त्रेणैवावगन्तु योग्यम्, न प्रत्यक्षेण सत्वादिगुणाएवहि तावद्दुरधिगमाः र्तहि तत् परिणतिरूपलिङ्गं शास्त्रमन्तरेण कथमवधारणीयं स्यात्।

लिङ्गानुशासनञ्च द्विविधम्' ,धञ्जपाःपुंसि' स्त्रियांक्तिन् इत्यादिशास्त्र रूपं कोषरूपञ्च। प्रसिद्ध रूपेण च लिङ्गमपि द्विविधम्, प्रसिद्धम्, अप्रसिद्धम् च।

'तत्ररूपभेदेन'[1] 'साहचर्येण'[2] 'विशेषोक्त्या'[3]

'द्वयोरिति[1] कथनेन' यत्किञ्चि[2]-ल्लिङ्.ग निषेधमुखेन, वा यल्लिङ्.गम् अम-रकोषेण बोध्यते तत् प्रसिद्धम ।

यत्तु रूपभेदेन बोधितं सत् वा शब्दसहितेन पुंस्त्व इत्यादिना बोध्यते तत् अप्रसिद्धम् । यस्य च यल्लिङ्.गं कोषान्तराद्युक्तमपि स्वयं न बोध्यते तस्य शब्दस्य तदपि लिङ्.गम् अप्रसिद्धम् ।

लौकिक शास्त्रीयञ्च लिङ्.गम्अर्थ-निष्ठमेव नच लौकिकं लिङ्.गमर्थनिष्ठमेव इति निर्विवादम्, परन्तु शास्त्रीय शब्दनिष्ठ अर्थ-निष्ठमेव च विवादास्पदम् । तत्र सन्देह बीजन्तु 'अर्धनंपुंसकम्' 'अस्त्रीपङ्.कं पुमान् पाप्मा इत्यादि दर्शनेन तस्य शब्दगतत्वं लभ्यते, पुमादि शब्दानां पुंस्त्वादिविशिष्टार्थ परत्वात् । अत्रोच्यते— लिङ्.गमर्थनिष्ठमेव, लौकिक लिङ्.गस्यार्थनिष्ठतया शास्त्रीय लिङ्.गस्यापि तथा त्वौचित्यात् । भगवतापाणिनिमुनिना प्रातिपदिकार्थलिङ्.गेत्यादि शास्त्रेण लिङ्.गे प्रथमाविधानाच्च ।

वैयाकरणभूषण प्रतिपादितं शास्त्रीय लिङ्.गस्य शब्दनिष्ठत्व न युक्तम् । यतः शब्दगत धर्मेण अर्थपरिच्छेदस्य दुरुपपादत्वात् शब्दे च शास्त्री यस्यैव लिङ्.गस्य सम्भवेन तस्य च केवलान्वयिता अर्थ व्यावर्तकत्वा सम्भवाच्चेति प्रथमाध्यायस्थ क खण्डस्य निष्कर्षः ।

स्वस्व प्रकृत्यन्यतरार्थ प्रतिपादत्वं प्रत्ययत्वम् । यतः प्रत्ययः शब्दः प्रतीय-न्त्यनेनार्थान् इति व्युत्पत्या तृतीयाध्याय प्रथमपादस्यपञ्चमसूत्रविहित सन् प्रत्यय-मारभ्यपञ्चमाध्याय चतुर्थपादस्य चतुः पञ्चाशदधिक शततम् सूत्रविहितं क प्रत्ययं

---

1. रूपभेदेन—यथा मेधपुष्पं घन रसः ।
2. साहचर्येण—नीवृज्जनपदौ, अत्रजनपद शब्दस्यरूप विशेषण पुंस्त्व-निर्णयात् तत्साहचर्येण नीवृत् पुमानिति निर्णयः ।
3. विशेषोक्त्या—पुंगि क्लीबे च काकोल काल कूतहला हलाः स्त्रिया-प्रावृट् ।

1. द्वयोः पाटलिः । मिथुनेत् द्वयोरिति इतिपरिभाषणात् द्वयोरित्यनेन स्त्रीपुंसयोग्रहणम् ।
2. निषेधमुखेन—अर्गलं न ना, धर्मो स्त्री । अत्र पुंस्त्वनिषेधेन अव-शिष्टयोः स्त्रीत्वनपुंसकत्वयोर्गहणम् ।

यावदर्थ बोधकेषु प्रत्ययेषु पंङ्.कजवद्योगरूढ़:। प्रत्यय लक्षणेस्वार्थिक प्रत्ययेषु प्रत्ययत्वसिद्धये स्व प्रकृतीत्यूक्तम्। यत: केचन प्रत्यया: स्वोर्थं केचन प्रत्ययाश्च स्वप्रकृत्यर्थमेवबोधयन्तीति प्रत्यय संज्ञा अन्वर्थसंज्ञेति सिद्धान्त:। प्रत्ययश्च विभक्ति, धात्वंश तद्धित टाबादिभेदै: पञ्चविध:। टाबादिपदेन स्त्रियामित्यधिकारे विहिता: प्रत्यया: गृह्यन्ते, ते च वस्तुत: त्रय एव सन्ति, आकाररूपा:, ईकाररूपा: ऊकार रूपाश्च। तत्र आकाररूपा: टाप्, डाप्, चाप् इत्येते त्रय:, ईकाररूपा: ङीप्, ङीष्, ङीन् इत्येते त्रय: ऊकाररूपश्च ऊङ् इत्येकएव। तद्धित अधिकारविहित स्त्री प्रत्यया: ति रूपा: ष्फरूपा: ष्यङ्.रूपाश्च सन्तीति प्रथमाध्यायस्थ ख खण्डस्य निष्कर्ष:। ग खण्डस्य तु स्त्रीप्रत्यया: स्त्रीत्वस्य द्योतकाएवेति निष्कर्ष:।

द्वितीयाध्यायस्थ क खण्डस्य आरूप प्रत्ययेषु चाप् प्रत्यय विधीनां सूत्र द्वय वार्तिकद्वयरूपाणाञ्च चतुर्णाञ्च सम्यग् अध्ययनम्। टाप्प्रत्यय विधीनां सूत्रद्वय वार्तिकचतुष्टय रूपाणां टाप् निषेधकस्यैकस्य सूत्रस्याध्ययनम्, डाप् प्रत्ययविधेर-ध्ययनम्, ईकाररूप स्त्रीप्रत्ययेषु ङीन् प्रत्यय विधीनां सूत्रद्वय वार्तिकद्वयात्मकाना-मध्ययनं चेति निष्कर्ष:।

तृतीयाध्यायस्य तु ङीप्प्रत्ययविधीनाम् एकोनविंशति सूत्राणां पञ्च वार्ति-कानां ङीप्प्रत्ययनिषेधकानां पञ्चसूत्राणां द्वयो: वार्तिकयोश्चाध्ययनम् निष्कर्ष:।

चतुर्थाध्यायस्य ईकाररूप स्त्रीप्रत्ययेषु ङीप्प्रत्ययविधीनां द्वाविंशति—सूत्राणां सप्तदशवार्तिकानां ङीष् प्रत्ययनिषेधकानां त्रयाणां सूत्राणां त्रयाणांवार्ति-कानां चाध्ययनम्।

पञ्चमाध्यायस्य क खण्डस्य ऊकार रूप स्त्रीप्रत्ययानां विधायकानां सप्त-सूत्राणां चतुर्णां वार्तिकानाञ्च अध्ययनम्। ख खण्डस्य तद्धिताधिकारविहित ति, फ, य, रूपाणां ति ष्फ ष्यङ् ग शब्दै: विधायकानां षट्सूत्राणाम् एकस्य वार्तिकस्या-ध्ययनम्। ग खण्डस्य स्त्रीप्रत्ययानां स्त्रीप्रत्ययान्तर्गतकतिपय आदेशानाञ्च स्त्री-त्वव्यतिरिक्तार्थानामध्ययनम्। घ खण्डे टाबादि प्रत्ययानुबन्धानामध्ययनम्, तद्धि-ताधिकार स्त्रीप्रत्ययौ ष्फ, ष्यङो रनुबन्धानाञ्च प्रयोजनाध्ययनं निष्कर्ष।

— — —

# सङ्केताक्षर-सूची

अ०को०—अमर कोष

अ०प०अ०—अदादि परस्मैपद अनिट्

अ०प०से० – अदादि परस्मैपद सेट्

अरण्य०का०—अरण्यकाण्ड

अष्टा०—अष्टाध्यायी

क्रया०प०से०—क्रयादिपरस्मैपद सेट्

काशि०—काशिका

ग०सू०—गणसूत्र

चु०उ०से०—चुरादि उभयपद सेट्

जु०उ०अ०—जुहोत्यादि उभयपदी अनिट्

जु०उ०से०—जुहोत्यादि उभयपदी सेट्

जु०प०अ०—जुहोत्यादि परस्मैपदी अनिट्

तत्व०बोध०स्त्री०प्र०पृ०---तत्वबोधिनी स्त्रीप्रत्ययप्रकरणपृष्ठ ।

तु०आ०अ०—तुदादि आत्मनेपद अनिट्

दि०आ०अ०—दिवादि आत्मनेपद अनिट्

दिवा०प०से०—दिवादिपरस्मैपद सेट्

न्या०भा०—न्यायभाष्य

परि०शे०परि०—परिभाषेन्दुशेखर परिभाषा

प०ल०म०—परमलघुमञ्जूषा

भ०दी०वै०सि०कौ०—भट्टोजिदीक्षित वैयाकरणसिद्धान्तकौमुदी

स्त्री०प्र०पृ०—स्त्रीप्रत्यय प्रकरण पृष्ठ

भ्वा०उ०अ०—भ्वादि उभयपदी अनिट्

भ्वा०प०अ०– भ्वादिपरस्मैपद अनिट्

भ्वा०आ०से०—भ्वादि आत्मनेपद सेट्

भ्वा0प0से0—भ्वादिपरस्मैपदी सेट्

म0भा0—महाभाष्य

रू0प0से0—रूदाधि परस्मैपदी सेट्

ल0श0शे0—लघुशब्देन्दुशेखर

वा0—वार्तिक

वै0सि0कौ0त0अ0प्र0पृ0—वैयाकरण सिद्धान्तकौमुदी तद्धित अपत्याधिकार प्रकरण पृष्ठ

वै0भू0सा0—वैयाकरणभूषण सार।

———

# ग्रन्थ सूची

1· अमरकोष:—अमरसिंह:, कृत: सुधारामा श्रमी व्याख्या
सहित: भानुजी दीक्षित चौ. सं प्रतिष्ठान-ई· 1985

2. अष्टाध्यायी—पाणिनि:, कृत: श्री नारायण मिश्र: चौखम्बा ओरियन्टालिया । ई. 1976 सं· प्रथम

3. काशिका—हरदत्त मिश्र:, संस्कृत विश्वविद्यालय, वाराणसी, प्रथम सं0 ई. 1967

4. तर्कसंग्रह:—अन्नम्भट्ट:, चौखम्बा ओरियन्टालिया, वाराणसी,
द्वितीय सं. ई· 1978

5. न्यायभाष्यम्—महर्षिवात्स्यायन:, प्रसन्नपदाख्यटीकयासंवलितम् सुधीप्रकाशनम् वाराणसी, सं0 ई. 1986

6. परमलघुमञ्जूषा-नागेशभट्ट:। चौ.अमर भारतीय प्रकाशन, सं तृतीय, ई.1981

7. परिभाषेन्दुशेखर:—नागेशभट्ट:, श्री वासुदेव शास्त्री पटवर्धन:, राजेश्वरी प्रेस पुस्तकालय:, दुर्गाघाट, वाराणसी ।

7 ए प्रौढ़मनोरमा भट्टोजिदीक्षित: चौखम्बा ओरियन्टालिया, वाराणसी

8. ब्रह्मसूत्रशाङ्करभाष्यम्—आदिशङ्कराचार्य:, श्री वैंकटेश्वर स्टीम प्रेस, बम्बई, 2028

9. महाभाष्यम्—भगवान् पतञ्जलि:, श्री सुन्दरलाल जैन, मोतीलाल वाराणसीदास, द्वितीय, सं-2 1971

10. मेदिनीकोष—श्री मेदिनिकरनिर्मित:, चौखम्बा सं· सीरीज
आफिस संम 1968 वाराणसी

10 ए मनुस्मृति मेधातिथिभाष्य समलङ्कृता 5 क्लाइवरी कलकत्ता,
सं. प्रथम ई. 1971

11. लघुसिद्धान्तकौमुदी—वरदराजाचार्य:, चौ· सुरभारतीय प्रकाशनम् दशम संस्करणम् 1985 वाराणसी ।

रघुवंशम् महाकविकालिदास मल्लिनाथकृत संजीवनीटीकिया सहितम् चौखम्बा ओरियन्टालिया वाराणसी सं. 2,1987

12. लघुशब्देन्दुशेखर:—नागेशभट्ट: चन्द्रकलया टीकयासमेत: चौखम्बा संस्कृत संस्थान वाराणसी सं· द्वि· वि. सं. 2043

13. लिङ्गवचनविचार— पं. श्री दीनबन्धु झा, मिथिला सं. वि., दरभंगा, बिहार ।

14. वाक्यपदीयम्—भर्तृहरिः, भागीरथ प्रसाद त्रिपाठी, गौरीशङ्कर प्रेस, वाराणसी, प्र.सं. 1944

15. वैयाकरणभूषणसारः--कौण्डभट्टः, पं. श्री प्रभाकर मिश्र, गोपाल प्रेस; वाराणसी, प्र.सं. 1972

16. वैयाकरण सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता—श्री वेंकटेश्वर स्टीम प्रेस, बम्बई, 2015, शक. 1880

17. सांख्यकारिका—ईश्वर कृष्णः, चौखम्बा विद्या भवनम् वाराणसी । ई-सं. 1970 प्रथम


———



लेखक

जन्म तिथि : 10 अप्रेल, 1959
विशेष अध्ययन क्षेत्र व्याकरण

शिक्षा : विद्यालयीय शिक्षा (भवानी भवन संस्कृतोच्च विद्यालय, गोनौली) शास्त्री व्याकरणाचार्य, शिक्षा शास्त्री (बी.एड.) विद्यावारिधि (पी-एच.डी.) (श्री लाल बहादुर शास्त्री के. संस्कृत विद्यापीठ, नई दिल्ली)
8 वर्षों से प्राध्यापक के रूप में अध्ययन के कार्य में रत हैं।

सम्प्रति : केन्द्रिय संस्कृत विद्यापीठ, जयपुर में व्याकरण व्याख्याता के रूप में कार्य कर रहे हैं।